दिनांक	सदस्य संख्या	दिनांक	सदस्य संख्या

दिनांक	सदस्य संख्या	दिनांक	सदस्य संख्या

...kula Sanskrit Series. (No. IV.)

ओ३म्

गुरुकुलग्रन्थावलिः।

चतुर्थो ग्रन्थः।

काव्यलतिका।

मुख्याधिष्ठातृ-श्रीमुन्शीराममहोदयनिदेशेन
...लपुरनिवासिश्रीपं० भीमसेनशर्म्मणा
सङ्कलिता।

...पं० पद्मसिंहशर्म्मणा संशोधिता।

सा च
पं० अनन्तरामप्रबन्धेन
जालन्धरपत्तने
सद्धर्म्मप्रचारकयन्त्रालये
मुद्रिता।
संवत् १९६२

...तौ
...कानि

... जन-
...न्थाला-
विद-
...कारणा-
... दुर्भा-
...न्तः पा-
...विफलानि
...व्यररचन
...तार्थताका
...भासानव
... सुप्रसि-
...कृपासागरस्य श्री द... ...नन्दस्वे-
...ाकिञ्चनस्तदीयकरुणत्वमुपश्रुत्य तद्दृत्व-

पृष्ठ
१
२
५
५
५
५
७
८
८
९
१
१
१
१

भूमिका ।

जगति सम्प्रति यावत्यो भाषाः प्रचलितास्तासां सर्वासां जननी गीर्वाणवाणीति निश्चितमेव विपश्चिद्भिर्निराग्रहम् ।

तद्विषयस्थिरीकरणाय च ते दृढयुक्तीरवलम्ब्य बहून् ग्रन्थाना-चक्रुरिति पुनस्तत्प्रतिपादनं जलताडनवदपार्थक मेवेति विद्विज्ञाः ।

अहो ! कालप्रभावाददृष्टवैभवाद्वा लोकानामीश्वरेच्छया कारणान्तराद्वा तदादर्त्तारोपि क्वचिदेव भूविभागे समुल्लसन्ति तास्ता दुर्भोहसन्तस्तदुत्थप्रमोदरसं रसयन्तः सन्तः ।

अतएव "सा चेदानीं लुप्तप्राया मृतप्राया वेति" भणन्तः पाश्चात्या न दुरुक्तिमन्तः ।

तस्या भाषाम्बादेव्याः अङ्गानि नितरामकर्मण्यानि विफलानि अवधार्य केचिदाधुनिका "राजकृष्टोग्रामर"-प्रभृतिपुस्तकानि व्यरचन् पुनरुद्धरणेच्छया; तन्निर्माणादिना कथञ्चित्सम्पादितकृतार्थताका अपि न तदङ्गानि कार्यक्षमाणि कर्तुमपारयन्तेति तान् वैद्याभासानव निश्चिन्वती सकरुणं रुदन्तीव निजाप्रचारदुःखमावेदयन्ती सा सुप्रसिद्धवैद्यवरस्य योगपरस्यानुपधिकृपासागरस्य श्री ६ स्वामिदयानन्दस्यैवोपकण्ठमुपगतवती । स च दयाक्लिन्नस्तदीयकरुणरवमुपश्रुत्य तद्दरव-

स्थाजन्यां लौकिकानामपि दुरवस्थामभिलक्ष्य च सञ्जातदयो
कथञ्चिदुत्क्रान्तमर्याद इवासीत् । अवददिव चः–

भगवति भारति! किर्मीरयाणि, त्वद्दशामालक्ष्य निपतन्त्
विदीर्यते हृदयं, शोकाक्रान्तं चेतः, नेदानीन्त्वामलङ्कर्
विद्यान्धकारं त्वद्विपक्षं निराकरिष्णवः, प्राणपणेनापि त्वामुपचरि
श्रीभोजदेवादयः ।

इदानीन्तु केवलं स्वोदरपूरणसक्तास्त्वद्दासीभूतभाषा
अनुरक्ताश्च प्रतिकूलमार्गे, दृश्यन्ते द्विजाः । ते हि मेषीप्रपाता
म्परामेवानुधावन्ति,नच सदसद्विवेक्तुमर्हन्ति कथमन्यथेदृशी द
लोचनगोचरः स्यादिति तप्यते मे हृदयम् । देवि ! माविषत्त्व
तः परं स्वस्थीभूय तिष्ठ, त्वदप्रचाररोगं निवारयितुं यतिष्ये
शक्यं स्वोपदेशेन ब्रह्मचर्यादिरसप्रदानेन च, कृतार्थयिष्यामि च "
णेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति"-भगवन्महाभ
कृदुक्तिम् । इत्येवमाश्वासयन् तां, कृतप्रतिज्ञो यतिवरः स्थाने
"वेदादिपठनमेव श्रेयस्करं, तदुपदिष्ट एव धर्मोग्राह्यः, संस्कृतभ
सर्वतोमुख्येत्याद्युपदिदेश । यद्यपि निरवधिकतमोभूधराः
नरा न संस्कृतां तामध्येतुं प्रावर्तिषत तथापि सज्जनताधारा
विधविद्यासु दृष्टपारा बहवस्तदुपदेशं न निष्फलयाञ्चक्रुरित्यप
मेव परीक्षकाणाम् ।

अथ तादृशाप्रतिमप्रतिभाशालिनि तस्मिन् कार्यमसमाप्य

व देवनियोगात्स्वरलङ्कुर्वाणे तदुपदिष्टसरणिमनुसरन्तो देववाणी
दीयाप्रचारगदेन निर्मोक्तुकामा दयालवो हृदयालवः पञ्चाम्बुदेशी-
र्यप्रतिनिधिसभासभास्तारास्तस्या देव्याः शरीरपोषणाय ब्रह्मचर्य-
पं रसायनमेव (रसायनन्तु तद्द्रव्यं यज्जरामृत्युनाशनम्) निर्धा-
नवन्तः। अथ गते कियत्यपि काले तादृशरसायनसम्पत्तयेऽहर्निशं
श्रमास्ते हरद्वारक्षेत्रनिकटवर्त्तिनि काङ्गड़ीग्रामसीम्नि भागीरथी-
करपवित्रिते प्रदेशविशेषे तद्रसायनविधये गुरुकुलस्थानं प्रादु-
कुर्यास्मिंस्तत्सेवकाः केचन व्रतिनोऽष्टाध्यायीमहाभाष्यादिकमधीत्य
देवीमाश्वासयन्त इव चकासति।

अनुमिमिते चानुमातारो "ऽवश्यमेतादृशसततप्रयत्नेन पुनरु-
ज्जीविष्यति भगवती संस्कृतभारती भारते इति;" तथापि यावत्त-
मुखमण्डले साहित्यसौन्दर्यचमत्कृतिर्नोदीयात्तावत्तदीयजीवस्थानीये
द्रूपे शक्तिसञ्चरणे सत्यपि स्थविरेव सा प्रतिभायादिति निश्चि-
। गुरुकुलमुख्याध्यक्षश्रीमन्महात्मप्रवर**मुन्शीराम**महोदयै रादिष्टो-
हं द्वितीय-तृतीय-पुस्तकनिर्माणानन्तरं चतुर्थपुस्तकसंकलनावसरे
चीनान्येव काव्यानि बोधोपयोगीनीति मत्वा ततएव कांश्चिद्भागा-
दधरम्। यथा—किरातार्जुनीयस्य त्रयः पूर्वे सर्गाः, भट्टिकाव्यस्य
था; माघस्य द्वितीयः सर्गोऽश्लीलांशविरहितः। आत्मरक्षणकथा,

१—यद्यपि ग्रन्थाङ्गभङ्गादि नानुचित मनुष्ठेयं, तथापि काव्यादी-
नां शुत्यक्षरसमप्रतिष्ठाकत्वाभावेन तदध्ययनहेतुकदोषाधिक्यसम्भा-

बुद्धिप्राधान्यकथा च कथासरित्सागरीया, महाकविक्षेमेन्द्रश्लोककृता चैका विद्याप्राधान्यकथा। एष साहित्यसंग्रहः काव्यशास्त्रप्रवि... क्षूणामुपयोगायैव प्रकटीकृतोऽवश्यं बालानां काव्यरुचिं सम्पा... दिति मदीया मतिः । मित्रवरपं० पद्मसिंहशर्मणा संशोधि... ऽप्यस्मिन् मानुष्यकनैसर्गिकदोषापतितं यदि स्खलनं प्रतीयेत... सूचनीयं तत् कृपयद्भिः सज्जनैः, क्षन्तुमुचितश्चाल्पज्ञतयाऽ... संग्रहे जातो मे मन्तुरिति साञ्जलिबन्धमभ्यर्थयते—

हरद्वारीयगुरुकुलाध्यापकेष्वन्यतमः,

आगरानिवासी;

भीमसेनशर्मा

अनया च (स्त्रीकीर्त्तनादेर्वर्णित्वव्याघातकतया) आज्ञा गुरूणां ह्य... चारणीयेति न्यायेन च श्रीदयानन्दस्वाम्युक्तनिषेधस्यासत्काव्यविषयत... च तथाकृतवता मया न बह्वपराद्धम् । (भी० से०)

ओ३म्

॥ विद्याप्राधान्यविषये कथा ॥

कदाचित्कोशलदेशे वागीशशर्मा ऽनुष्ठितश्रुत्युक्तकर्मा विज्ञातशास्त्रषट्कमर्मा सुलक्षणोतिविचक्षणश्च कलासु बभूव। तेन स्वदेशस्थाः परदेशस्थाश्च बहवश्छात्राः सादरं पाठिताः। सन्तोषिताश्च दरिद्रदरिद्रतरा भोजनाच्छादनादिना, दापितं च विद्याधर्मसम्पन्नेषु तपःसमृद्धेषु भूरि द्रविणं विप्रमुख्येन, तस्य प्रख्यातवैदुष्यस्य पुत्रो विद्यानिधिर्नाम, साङ्गान्वेदानध्येतुकामः पूर्वं स्वपितृतोऽष्टाध्याय्यादिकं समाप्य काशीं प्रस्थितस्तत्र च स्थिरो भूत्वा बहूनब्दान् सव्याख्यानि वेदादीनि पठित्वा स्वपुरमागत्य स्वपित्रो श्चरणौ ववन्दे, तत्पिता च तदीयपठनवृत्तान्तमबोधि प्रासीदच्च तदीयानुपमं पाण्डित्यमालोक्य, अथ गच्छत्सु दिनेषु विद्यानिधेर्मनसि देशाटनाभिलाषा जागर्ति स्म ततः पितुः समक्षं बद्धहस्ताञ्जलिरुवाच– तात ! इदानीं देशाटनं मह्यं रोचते, नहि तेन विना लोके विद्याप्रकाशो महाराजेभ्यो धनावाप्तिश्च भवति, यावद्विदुषां महाराजेषु समादरो न भवति तावन्नहि विद्या शोभते, सांसारिकसुखावाऽऽप्तिश्चाध्ययनफलमत आज्ञापयतु मां परदेशं जिगमिषुम्। विद्यानिधेरिमां वाचमुपश्रुत्य वा-

गीष्टाशमोऽस्ह- पुत्र ! त्वोक्तिरियमविचारपूर्विका, यद्यपि त्वयमेतद्राजकृतादराद् वाञ्छितधनाद्येञ्च प्रत्येकं सुखभाग्भवतीति तथापि सांसारिकसुखावाप्ती राजसभायामादरश्चैतद्द्वयमेव विद्यायाः फलमिति तदिदं न साधु, यतो जगत्तुल्यं राजसम्मानादि विद्वांश्च सूर्यसंनिभः, सूर्योदये संसारः प्रकाशते नहि संसारेण सूर्यः प्रकाश्यते, यत्त्वमद्य वेदवेदाङ्गदर्शनसाहित्यादिकमधीत्याप्यज्ञ इवावोचस्तदिदं मामतीव खेदयति, विद्याया विद्वत्ताया वा वास्तवं रूपं च नाज्ञासीरित्यहं निश्चयमन्यथा कथमेतद् भणितुं शक्तः स्याः, अथवा त्वया काश्यां वसता काव्यादीनां नूतना ग्रन्था येषु राजाश्रयो विशेषतो वर्णनमितिहासाश्च तादृशा एवावलोकिता येन बाह्यच्छविच्छटाचमत्कृतो विषयलोलुपश्च संवृत्तोऽत एव तादृशीं वाणीं विद्याविरहित इव स्वमुखान्निस्सारितवान्, पुत्र ! यतास्तुच्छं विद्यारूपमैश्वर्यमवगच्छतस्तव कारणद्वयं प्रतिभाति कृतेऽपि पठने न किञ्चित्त्वं सम्यग् विचारितवानित्याद्यं, कथंचित्लोभेनाभिभूतश्चेति द्वितीयं, लोभाक्रान्तस्य च गुणास्तुच्छतामायान्ति, यथोक्तम्:—

"यशो यशस्विनां दिव्यं श्लाघ्या ये गुणिनां गुणाः ॥
लोभः स्वल्पोऽपि तान् हन्ति श्वित्रं रूपमिवेप्सितम्"

यद्यपि

"विद्यया वपुषा वाचा वस्त्रेण विभवेनच ॥
वकारैः पञ्चभिर्युक्तो नरः प्राप्नोति गौरवम्"

इत्युक्तरीत्या विभवोऽपि गौरवहेतु स्तथापि विद्या सर्वतो मुख्यैव यथा:-

"किं कुलेन विशालेन विद्याहीनेन देहिनाम् ॥
अकुलीनोऽपि यो विद्वान् देवताभिः स पूज्यते"

शृणु पुत्र ! विपश्चितां माहात्म्यं याथार्थ्येन न कोऽपि वर्णयितुं शक्त एतस्मिन् विषये चैकमद्भुतमुपाख्यानं श्रावयामि-

एकदा मगधदेशे विजयकेतुनाम्ना परमधार्मिको विद्यारसिकश्च महीभृद्बभूव। तस्य च राज्ञो वंशभूषणनामकः पुत्र आसीत्। स च पाठयितुं प्रवर्तितोऽपि कृतेष्वपि परःशतेषूपायेषु नाध्ययने मनो लगयांचकार, बाल्यमुल्लङ्घ्य यौवनदशामाप्तः, बहुभिः प्रकारैरहं शिक्षयिष्यामीति प्रतिज्ञावतः समासन्नान् सूरीन् वार्धविव्यथे च। राजा च नीचैकसेव्यं तदीयं कर्म मृगयारसिकतादि ज्ञात्वा क्लान्तमनाः कदाचित् कार्यवशादयोध्यामगमत्। अयोध्यावास्तव्यस्य त्रयीनिपुणस्य प्राज्ञमणेः पार्श्वे स्वपुत्रस्य सर्वमुदन्तमचकथत्। तल्लपनात्तदीयवृत्तान्तमवगम्य प्राज्ञमणिरिदमूचे-राजन् ! त्वत्पुत्रमहं पाठयिष्यामि परमहं पण्डितत्वेन तत्र न प्रकाशनीयः, ततो राजा तत्सङ्गमजातहर्षः स्वपुरं प्रति निवृत्तः प्राज्ञमणिश्च कदाचित्तद्राजधानीमलंचकार, क्रीडनरुचिं राजपुत्रमवलोक्य सोऽपि तथैव गुटिकाक्रीडनं कुर्वन् बहूनि दिनान्यतिवाहयामास, संजातप्रत्ययश्च

स तमुवाच–राजपुत्र! सदृशाकारा एव गोलिका विद्यन्ते नैतच्छोभनं, तासामाकारैः पृथग्विधैर्भवितव्यम्, तासां नामान्यपि पृथक् २ रचणीयानि तथैव चिह्नान्यपि, येन तदवबोधो नयनानयनादिक्रियासु कष्टं च न भविष्यति, एकैकस्मिन् वर्गे पञ्च पञ्च चतस्रश्चतस्रो वा गोलिका स्थाप्याः एवं पृथक् पृथक् पेटकभागेऽपीति। राजपुत्रो मित्रतयैतत्सर्वं स्वीचकार। तदनु प्राज्ञमणि र्बह्वीर्गोलिका निर्माय तासामुपरि वर्णभेदेनाकाराद्यक्षरचिह्नानि विधाय गोलिकापञ्चकस्य चैकं वर्गं नियम्य पृथक् पृथक् समुद्गके स्थापयांचकार, यथा–(क) (ख) (ग) (घ) (ङ) एतेषामेको वर्ग एवं सर्वेषां विभज्य वर्गान् संरक्ष्य क्रीडनेऽपि प्रकारविशेषं दर्शयन् तदक्षरनाम्नैवाह्वाययितुमादिदेश, एवं समयानुकूल्येन संयुक्ताक्षराणां मात्रासहितानामभ्यासं क्रीडनावसर एव कारयामास, स च सोल्लासं किमपि रहस्यमजानन् तथैव चिक्रीड, कारिताक्षराभ्यासः स प्राज्ञमणिः कदाचिदेकं श्लोकं पत्रे लिखित्वा तदीयक्रीडाभवने चिक्षेप तच्च शोभनाक्षरं पत्रमुत्थाप्य कश्चित् सहचारी शिशू राजपुत्रमदर्शयत्, अगादीच्च-महाराज! अस्मिन् गोलिकानां चिन्हानीव दृश्यन्ते, राजपुत्रश्चावलोक्य विलक्षो प्राज्ञमणिं पप्रच्छ, भगवन्! किमित्यस्मिन् गोलिकानां चिन्हानीव लक्ष्यन्ते प्राज्ञमणिरवदत्। राजन्! गोलिकानां चिह्नजातस्य पत्रोपरि लेखनेन बहुवृत्तांत मवगन्तुं शक्नोषि यदि त्वं पठने समुद्यतोऽसि तर्हि तव तद्युक्तिं

कथयामि ! राजपुत्रः प्रसन्नचेता योजनां श्रुत्वा अक्ष-
राणि संयोज्य पपाठ ।

"रूपयौवनसंपन्ना विशालकुलसंभवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः" ॥

श्लोकं पठन्नपि तदर्थं बोद्धुमशक्नुवन् प्रोवाच
कोऽभिप्रायोऽस्येति, प्राज्ञमणिश्चार्थं सुबोधयिषुः रूप-
सौन्दर्येण तारुण्येन युक्ताःमहातिकुले प्रसूता अपि यदि
विद्यया रहिताः स्युस्तदा गन्धशून्या पलाशा इव न दी-
प्यन्ते सौन्दर्य्यसम्पन्नान्यपि पलाशकुसुमानि शोभा-
न्नाप्नुवन्तीत्यभिप्रायः निशम्य चेदं परां ग्लानिमुपतो
राजपुत्रः, हा ॥

"प्रथमे नार्जिता विद्या द्वितीये नार्जितं धनम् ।
तृतीये नार्जितो धर्मश्चतुर्थे किं करिष्यती"

त्यादितथ्यमेवेति वदन् बहु विललाप, तदा प्राज्ञम-
णिः स्वकीयं समस्तगुप्तवृत्तं प्रकटीकृत्य गोलिकाद्वारा
शिक्षिताक्षरस्त्वमिदानीं शास्त्रादिकं शीघ्रमभ्यसि-
ष्यसीत्युक्तवान् ततो राजपुत्रस्तत्पादयोः पतित्वा
नाहं तवानृण्यं कर्तुं शक्तोऽस्मीति कथयन् शास्त्राण्य-
ध्येतुं प्रावर्तिष्ट ॥

वागीशशर्माऽभिदधौ पुत्र विद्यानिधे ! ततः प्रभृ-
ति स विद्वान् राजपुत्रसहितान् बहूनमात्यादिबा-
लकान् पाठयन्नास्त ते च स्वल्पेनैव कालेनाधीतनीत्या-
दिशास्त्रा राज्यधुरं वहमाना आसन्, तेन गुणरासि-
केन राजपुत्रेण बह्व्यः पाठशालास्समस्थापयिषत, प्र-
तिदिनं विद्याप्रकाशश्च ववृधे । पुत्र ! असाध्यप्रायाण्य-

पि साध्यानि विद्वान् करोति विद्ययाऽलंकृतस्य चित्तवृत्तिः स्थिरा राज्ञश्चास्थिरेत्यादि महदनयो रन्तरम्। यथा तन्निकटे ग्रामादिधनं तथा त्वत्समीपे ततोऽपि प्रशस्यं विद्याधनम्:-

'न चौरहार्यं नच राजहार्यं नभ्रातृभाज्यं नच भारकारि, व्यये कृते वर्द्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्"

अतः पुत्र ! द्रव्यलिप्सुः क्वचिन्मागच्छाथाश्रितवृत्तिमास्थाय सुखं वस त्वदीयविद्यामाहात्म्येन सर्वे त्वत्सन्निधावेवागमिष्यन्तीति अधीताऽपि त्वया ब्रह्मविद्या विस्मृतप्राया मम प्रतिभाति नान्यथैवं वदितुमुत्सुक्तःस्याः (पुत्रः) संसारे कतिविधा विद्या भवन्ति (पिता) प्रिय ! यद्यपि×"विद्या ह्यनन्ताश्च ×कलाः संख्यातुं नैव शक्यन्ते" तथापि तस्या द्वैविध्यं शास्त्रेषु परापरभेदेन वर्णितम्। अपरा विद्यायामेवैतानि वक्ष्यमाणानि सर्वाणि शास्त्राणि अन्तर्भवन्ति (१) षट्तंत्रोपेतं चिकित्साशास्त्रम् (२) व्यवहार (क़ानून) शास्त्रम् (३) युद्धशास्त्रम् (४) कृषिशास्त्रम् (५) नौकाशास्त्रम् (६) व्यापारशास्त्रम् (७) शिल्पशास्त्रम् (८) कलाशास्त्रम् (९) गणितशास्त्रम् (१०) खनिजपदार्थविज्ञानम् (११) सिद्धपदार्थविज्ञानम् (१२) रसायनशास्त्रम् (१३) भूगोलशास्त्रम् (१४) ज्योतिःशास्त्रम् (१५) सामान्यनीतिः (१६) राज-

× स्वर्णकारादि कर्म × पुराण न्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः। वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दशेति ॥ये।गि याज्ञवल्क्यः १ अ० ३ श्लो०।

नीतिः (१७) भूगर्भ शास्त्रम् (१८) मनुष्य-पशु-पक्षि-कीट-पतंग-मत्स्यादि जलचर-वनस्पति जाति-पाषाण-जाति विषयक शास्त्राणि (१९) इतिहास शास्त्रम् (२०) रसालंकारशास्त्रम्(साहित्यशास्त्रम्)(२१)छन्दःशास्त्रम् (२२) गानशास्त्रम् (२३) दर्शनशास्त्राणि (२४) धर्म शास्त्रम्(२५) व्याकरणविद्या चेति। परा विद्या तु ब्रह्म-विद्यैव यस्यां जीवेश्वरयोर्विचारः साधुसम्पादितः। एतासां सर्वासामेव वेदाः मूलन्तेभ्य एव तासां निःसृ-तत्वात् पुत्र ! "शास्त्राण्यधीत्याऽपि भवन्ति मूर्खा यस्तु क्रियावान् पुरुषः स विद्वान्" इति केषांचिद्-वचनमत्यादरार्हम् यो विद्वानपि निर्लोभतादिकं न-संपादयेत्तस्य पठनं गजस्नानायितमेव विद्याविमर्शा-वसरे महाकविक्षेमेन्द्रेणैवमुक्तम्।

" शीलं परहितासक्तिरनुत्सेकः क्षमा धृतिः।
अलोभश्चेति विद्यायाः परिपाकोज्ज्वलं फलम् ॥१॥
विवेकरहिता विद्या द्वेषरोषोष्मतापिता।
दर्पाशनिनिपातेन हता वल्लीव निष्फला ॥ २ ॥
एतदर्थं श्रुते बुद्धिं करोति द्वेषदूषितः।
यद्विवादे करिष्यामि म्लानिं मनीषिणाम् ॥३॥
त्यक्त्वा प्रशमसन्तोषौ विद्यायाः प्रथमं फलम्।
नानाविपर्ययपथैर्ग च्छन्त्यर्थफलार्थिनः ॥ ४ ॥
उपकाराय या विद्या न परस्य नचात्मनः।
पत्रसंचयसंभारैः किन्तया भारविद्यया ॥ ५ ॥
अन्यायःप्रौढवादेन नीयते न्यायतां यया।

न्यायश्चान्यायतां लोभात् किंतया क्षुद्रविद्यया ॥६॥
स्वजिह्वास्तुतिभिर्नित्यं पत्नीवोद्घाटितांशुका।
क्रियते या सभामध्ये किं तया धृष्टविद्यया ॥ ७॥
अनुष्ठानेन रहिता पाठमात्रेण केवलम् ।
रञ्जयत्येव या लोकं किं तया शुकविद्यया ॥ ८॥
गोप्यते याश्रुतज्ञस्यमूर्खस्याग्रे प्रकाश्यते ।
न दीयते च शिष्येभ्यः किंतया शठविद्यया ॥ ९ ॥
परोत्कर्षं समाच्छाद्य विक्रयाय प्रसार्यते ।
या मुहुर्धनिनामग्रे किं तया पण्यविद्यया ॥ १० ॥
न तीर्यतेयया घोरः संसारमकराकरः ।
नित्यं चित्तानुबन्धिन्या किं तया मोहविद्यया ॥११॥
नित्याऽभ्यासप्रयासेन जीवितं क्षीयते यया ।
त्रिवर्गस्योपरोधेन किं तया कष्टविद्यया ॥ १२ ॥
न विवेकोचितां बुद्धिं न वैराग्यमयं मनः ।
संपादयति या पुंसां किं तया जड़विद्यया ॥१३ ॥
परमात्सर्यशल्येन व्यथा संजायते यया ।
सुखनिद्रापहारिण्या किं तया शूलविद्यया ॥ १४ ॥
परसूक्तापहारेण स्वसुभाषित वादिना ।
उत्कर्षः ख्याप्यते यस्याः किं तया चौरविद्यया॥१५
अनभ्यासहतोत्साहा परेण परिभूयते ।
या लज्जाजननी जाड्यात् किन्तया मन्दविद्यया॥१६
लोभः प्रभूतवित्तस्य रागः प्रव्राजितस्य च ।
न यया शान्तिमाप्नोति किन्तयाऽलीकविद्यया॥१७
यया भूपतिमाश्रित्य परेषां गुणनिन्दकः ।

दानमानोन्नतिं हन्ति किं तया दोषविद्यया ॥ १८ ॥
गृहे धाराधिरूढापि सभायां न प्रवर्तते ।
प्रतिभाभंगसंगाद्या किं तया मूकविद्यया ॥ १९ ॥
चण्डं पिण्डार्थिनां द्वेषपिशुनानां शुनामिव ।
यया संजायते युद्धं किन्तया बधविद्यया ॥ २० ॥
विस्मृता याऽवलिप्तस्य कण्ठे कृतगताऽऽगता ।
जीववृत्तिरिव क्षीणा किन्तया मृतविद्यया॥ २१ ॥
रसायनी जराजीर्णश्चिररोगी यया भिषक् ।
धातुवादी दरिद्रश्च किं तया हास्यविद्यया ॥२२॥
यया मुग्धमृगाः कूटैः पीड्यन्ते तीव्रमार्गणैः+ ।
आशापाशावलम्बिन्या किन्तया लुब्धविद्यया ॥२३॥
परोपतापः क्रियते वश्यादिकुहकै*र्यया ।
यन्त्रतन्त्रानुसारिण्या किन्तया व्याजविद्यया ॥२४॥
गुरुर्गर्वात् कविर्द्वेषात् यतिर्भोगपरिग्रहात् ।
नृपः पापात् द्विजः क्रोधात्सा विद्या वार्यते यया॥२५॥
विद्यागुणास्ते विदुषां ये विवेकनिबन्धना ।
स्वल्पशिल्पकलातुल्याः शेषा जीवितहेतवः ॥ २६ ॥
वीणेव श्रोत्रहीनस्य लोलाक्षीव विचक्षुषः ।
व्यसोः कुसुममालेव विद्या स्तब्धस्य निष्फला॥ २७ ॥
द्वेषदर्पहता विद्या कामक्रोधहता मतिः ।
लोभमोहहता वृत्तिर्येषां तेषां किमायुषा ॥ २८ ॥

आत्मरक्षणं सर्वथा कुर्यात् ।

अस्ति मित्र ! तथाचात्र कथामाख्यामि ते शृणु ।

+ मार्गणाः-शराः । * कुहकम्-माया

विदिशानगरीबाह्ये न्यग्रोधोऽभूत् पुरा महान् ॥ १
चत्वारः प्राणिनस्तत्र वसन्ति स्म महातरौ ।
नकुलोलूकमार्जारमूषकाः पृथगालयाः ॥ २॥
भिन्ने भिन्ने बिले मूल आस्तां नकुलमूषकौ ।
मार्जारो मध्यभागस्थे तरोर्महति कोटरे ॥ ३ ॥
उलूकस्तु शिरोभागेऽनन्यलभ्ये लतालये ।
मूषकोऽत्र त्रिभिर्वध्यो मार्जारेण त्रयोऽपरे ॥ ४ ॥
अन्नाय मार्जारभयान्मूषको नकुलस्तथा ।
स्वभावेनाप्युलूकश्च परिभ्रेमुर्निशि त्रयः॥ ५ ॥
मार्जारश्च दिवारात्रौ निर्भयः प्रभ्रमत्यसौ ।
तत्रासन्ने यवक्षेत्रे सदा मूषकलिप्सया ॥ ६ ॥
येऽन्येऽपि युक्त्या जग्मुस्तत्स्वकालेऽन्नाभिवाञ्छय
एकदा लुब्धकस्तत्र चण्डालः कश्चिदाययौ ॥ ७ ॥
स मार्जारपदश्रेणिं दृष्ट्वा तत्क्षेत्रगामिनीम् ।
तद्बधायाभितः क्षेत्रं पाशान् दत्त्वा ततो ययौ ॥८
तत्र रात्रौ च मार्जारः स मूषकजिघांसया ।
एत्य प्रविष्टस्तत्पाशैः क्षेत्रे तस्मिन्नबध्यत ॥ ९ ॥
मूषकोऽपि ततोऽन्नार्थी स तत्र निभृतागतः ।
बद्धं तं वीक्ष्य मार्जारं जहर्ष च ननर्त च ॥ १० ॥
यावद् विशति तत्क्षेत्रं दूरादेकेन वर्त्मना ।
तत्र तौ तावदायातावुलूकनकुलावपि ॥ ११ ॥
दृष्टमार्जारबन्धौ च मूषकं लब्धुमैच्छताम् ।
मूषकोऽपि च तद् दृष्ट्वा दूराद्विग्नो व्यचिन्तयत्॥१२
नकुलोलूकभयदं मार्जारं संश्रये यदि ।
बद्धोऽप्येकप्रहारेण शत्रुर्मामेष मारयेत् ॥ १३ ॥

मार्जाराद् दूरगं हन्यादुलूको नकुलश्च माम्।
तच्छत्रुसंकटगतः क्व गच्छामि करोमि किम्? ॥ १४ ॥
हन्त मार्जारमेवेह श्रयाम्यापद्गतोऽप्ययम् ।
आत्मत्राणाय मां रक्षेत् पाशच्छेदोपयोगिनम् ॥१५॥
इत्यालोच्य शनैर्गत्वा मार्जारं मूषकोऽब्रवीत् ।
बद्धे त्वय्यतिदुःखं मे तत्ते पाशं छिनद्म्यहम् ॥ १६ ॥
ऋजूनां जायते स्नेहः सहवासाद्रिपुष्वपि ।
किन्तु मे नास्ति विश्वासस्तव चित्तमजानतः ॥ १७ ॥
तच्छ्रुत्वोवाच मार्जारो भद्र! विश्वस्यतां त्वया ।
अद्यप्रभृति मे मित्रं भवान् प्राणप्रदायकः ॥१८॥
इति श्रुत्वैव मार्जारात्तस्योत्सङ्गं स शिश्रिये ।
तद् दृष्ट्वा नकुलोलूकौ निराशौ ययतुस्ततः॥ १९ ॥
ततो जगाद मार्जारो मूषकं पाशपीडितः ।
गतप्राया निशा मित्र! तत्पाशांश्छिन्धि मे द्रुतम्॥ २०॥
मूषकोपि शनैश्छिन्दन् लुब्धकागमनोन्मुखः ।
मृषाकटकटायद्भिर्दशनैरकरोच्चिरम् ॥ २१ ॥
क्षणाद् रात्रौ प्रभातायां लुब्धके निकटागते ।
मार्जारेऽर्थ्यमाने द्राक् पाशांश्चिच्छेद मूषकः ॥२२॥
छिन्नपाशेऽथ मार्जारे लुब्धकत्रासविद्रुते ।
मूषको मृत्युमुक्तः सन् पलाय्य प्राविशद् बिलम्॥२३॥
नाश्वसत् पुनराहूतो मार्जारेण जगाद च ।
कालयुक्त्या ह्यरिर्मित्रं जायते न च सर्वदा ॥२४॥
एवं बहुभ्यः शत्रुभ्यः प्रज्ञयाऽऽत्माऽभिरक्षितः ।
मूषकेन तिरश्चापि किं पुनर्मानुषेषु यत् ॥ २५ ॥

बुद्धिप्राधान्यविषये कथा ।

बुद्धिर्नाम च सर्वत्र मुख्यं मित्रं न पौरुषम् ।
योगेश्वर ! तथा चैनामत्रापि त्वं कथां शृणु ॥ १॥
श्रावस्तीत्यस्ति नगरी तस्यां पूर्वं प्रसेनजित्- ।
राजाऽभूत्तत्र चाभ्यागात् कोऽप्यपूर्वो द्विजः पुरि॥
स शूद्रान्नभुगेकेन वणिजा गुणवानिति ।
ब्राह्मणस्य गृहे तत्र कस्यचित् स्थापितो द्विजः॥३
तत्रैव तेन शुष्कान्नदक्षिणादिभिरन्वहम् ।
आपूर्यत ततोऽन्यैश्च शनैर्बुद्ध्वा वणिग्वरैः ॥ ४॥
तेनासौ हेमदीनारसहस्रं कृपणः क्रमात् ।
संचित्य गत्वारण्ये तन्निहत्य क्षिप्तवान् भुवि॥५
एकाकी प्रत्यहं गत्वा तच्च स्थानमवैक्षत ।
एकदा हेमशून्यं तत्खातं व्यात्तं च दृष्टवान् ॥ ६॥
शून्यं तत्खातकं तस्य पश्यतो हतचेतसः ।
न परं हृदि संक्रान्ता चित्रं दिक्ष्वपि शून्यता ॥ ७॥
अथोपागाच्च विलपंस्तं विप्रं यद्गृहे स्थितः ।
पृष्टस्तं च स्ववृत्तान्तं तस्मै सर्वं न्यवेदयत् ॥ ८ ॥
गत्वा तीर्थमभुञ्जानः प्राणांस्त्यक्तुमियेष च ।
बुद्ध्वा च सोऽन्यदाताऽस्य वणिगन्यैः सहाययौ॥९
स तं जगाद किं ब्रह्मन् ! वित्तहेतोर्मुमूर्षसि ।
अकालमेघवद् वित्तमकस्मादेति याति च ॥ १० ॥
इत्याद्युक्तोऽपि तेनासौ न जहौ मरणग्रहम् ।
प्राणेभ्योऽप्यर्थमात्रा हि कृपणस्य गरीयसी ॥ ११॥
ततश्च मृतये तीर्थं गच्छतोऽस्य द्विजन्मनः ।

स्वयं प्रसेनजिद्राजा तद् बुद्ध्वान्तिकमाययौ ॥१२॥
पप्रच्छ चैनं किं किंचिदस्ति तत्रोपलक्षणम् ।
यत्र भूमौ निखातास्ते दीनारा ब्राह्मण ! त्वया॥१३॥
तच्छ्रुत्वा स द्विजोऽवादीदस्ति क्षुद्रोऽत्र पादपः ।
अटव्यां, देव ! तन्मूले निखातं तन्मया धनम् ॥१४॥
इत्याकर्ण्याब्रवीद्राजा दास्याम्यन्विष्य तत्तव ।
धनं स्वकोषादथवा मा त्याक्षीर्जीवितं द्विज !॥१५॥
इत्युक्त्वा मरणोद्योगान्निवार्य विनिधाय च ।
द्विजं तं वणिजो हस्ते, स राजाऽभ्यन्तरं गतः॥१६॥
तत्रादिश्य प्रतीहारं शिरोऽर्त्तिव्यपदेशतः ।
वैद्यानानाययत् सर्वान्दत्वा पटहघोषणाम् ॥ १७ ॥
आतुराः के कियन्तोऽत्र तस्याऽदाः किन्त्वमौषधम् ।
इत्युपानीय पप्रच्छ तानेकैकं विविक्तगः ॥ १८ ॥
तेऽपि तस्मै तदैकैकः सर्वमूचुर्महीपतेः ।
एकोऽथ वैद्यस्तन्मध्यात् क्रमपृष्टोऽब्रवीदिदम् ॥१९॥
वणिजो मातृदत्तस्य देव ! नागबला मया ।
अस्वस्थस्योपदिष्टाऽद्य द्वितीयं दिनमौषधिः ॥२०॥
तच्छ्रुत्वा स तमाहूय राजा वणिगमभ्यधात् ।
ननु नागबला केन तवानीतोच्यतामिति॥२१॥
देव ! कर्मकरेणेति तेनोक्ते वणिजा तदा ।
क्षिप्रमानाय्य तं राजा स कर्मकरमब्रवीत् ॥ २२ ॥
त्वया नागबलाहेतोः खनता शाखिनस्तलम् ।
दीनारजातं यल्लब्धं ब्रह्मस्वं तत्समर्पय ॥ २३ ॥
इत्युक्तो भूभृता भीतः प्रतिपद्यैव तत्क्षणम् ।
स तानानीय दीनारांस्तत्र कर्मकरो जहौ ॥ २४ ॥

राजाऽप्युपोषितायास्मै द्विजायाहूय तान् ददौ ।
दीनारान् हारितप्राप्तान् प्राणानिव बहिश्चरान्॥२५॥
एवं स लब्धवान् बुद्ध्या नीतं मूलतलात्तरोः ।
द्विजार्थं भूपतिर्जानन्नोषधिं तां तदुद्भवाम् ॥ २६ ॥
तदेवं सर्वदा बुद्धेः प्राधान्यं जितपौरुषम् ।
ईदृशेषु च कार्येषु किं विदध्यात् पराक्रमः ॥ २७ ॥

ओ३म्

॥ किरातार्जुनीयम् ॥

घण्टापथेन समेतम्

॥ प्रथमः सर्गः ॥

वाणीं काणभुजीमजीगणदवाशासीच्च वैयासकी,
मन्तस्तन्त्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत् ।
वाचामाकलयद्रहस्यमखिलं यश्चाक्षपादस्फुरां
लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः ॥
मल्लिनाथकविः सोऽयं मन्दात्मानुजिघृक्षया ।
तत्किरातार्जुनीयाख्यं काव्यं व्याख्यातुमिच्छति ॥

नारिकेलफलसंमितं वचो,
भारवेः सपदि तद्विभज्यते ।
स्वादयन्तु रसगर्भनिर्भरं
सारमस्य रसिका यथेप्सितम् ॥

नानानिबन्धविषमैकपदैर्निंतान्तं
साशङ्कचङ्क्रमणखिन्नधियामशङ्कम् ।
कर्तुं प्रवेशमिह भारविकाव्यबन्धे
घण्टापथं कमपि नूतनमातनिष्ये ॥

इहान्वयमुखेनैव सर्वं व्याख्यायते मया ।
नामूलं लिख्यते किंचिन्नानपेक्षितमुच्यते ॥

अथ तत्रभवान्भारविनामा कविः "काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिर्वृतये कान्तासंमिततयोपदेशयुजे" इत्याद्यालंकारिकवचनप्रामाण्यात्काव्यस्यानेकश्रेयःसाधनताम् "काव्यालापांश्च वर्जयेत्" इति निषेधशास्त्रस्यासत्काव्यविषयतां च पश्यन्किरातार्जुनीयाख्यं महाकाव्यं चिकीर्षुश्चिकीर्षितार्थाविघ्नपरिसमाप्तिसंप्रदायाविच्छेदलक्षणफलसाधनत्वात् "आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्" इत्याद्याशीर्वादाद्यन्यतमस्य प्रबन्धमुखलक्षणत्वाच्च वनेचरस्य युधिष्ठिरप्राप्तिरूपं वस्तु निर्दिशन् कथामुपक्षिपति—

श्रियः कुरूणामधिपस्य पालनीं
प्रजासु वृत्तिं यमयुंक्त वेदितुम् ।
स वर्णिलिङ्गी विदितः समाययौ
युधिष्ठिरं द्वैतवने वनेचरः ॥ १ ॥

श्रिय इति । आदितः श्रीशब्दप्रयोगाद्वर्णगणादिशुद्धिरत्रोपयुज्यते । तदुक्तम्—"देवतावाचकाः शब्दा ये च भद्रादिवाचकाः । ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा" इति ॥ कुरूणां निवासाः कुरवो जनपदाः ॥ "तस्य निवासः" इत्यण्प्रत्ययः । "जनपदे लुप्"॥ तेषामधिपस्य,दुर्योधनस्य सम्बन्धिनीम् ॥ शेषेष-

छी॥ श्रियो राज्यलक्ष्म्याः॥ "कर्तृकर्मणोः कृति" इति कर्मणि षष्ठी॥ पाल्यतेऽनयेति पालनी ताम्। प्रतिष्ठापिकामित्यर्थः प्रजारागमूलत्वात्संपद इति भावः॥ "करणाधिकरणयोश्च" इति सूत्रेणात्र करणे ल्युट्। "टिड्ढाणञ्—" इत्यादिना ङीप्॥ प्रजासु जनेषु विषये॥ "प्रजा स्यात्संततौ जने" इत्यमरः॥ वृत्तिं व्यवहारं वेदितुं ज्ञातुं यं वनेचरमयुङ्क्त नियुक्तवान्। वर्णः प्रशस्तिरस्यास्तीति वर्णी ब्रह्मचारी। तदुक्तम्— "स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम्। संकल्पोऽध्यवसायश्च क्रियानिर्वृतिरेव च॥ एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः। विपरीतं ब्रह्मचर्यमेतदेवाष्टलक्षणम्"। एतदष्टविधमैथुनाभावः प्रशस्तिः॥ "वर्णाद् ब्रह्मचारिणि" इतीनिप्रत्ययः॥ तस्य लिङ्गं चिह्नमस्यास्तीति वर्णिलिङ्गी। ब्रह्मचारिवेषवानित्यर्थः। स नियुक्तः। वने चरतीति वनेचरः किरातः॥ "भेदाः किरातशबरपुलिन्दा म्लेच्छजातयः" इत्यमरः॥ "चरेष्टः" इति टप्रत्ययः। "तत्पुरुषे कृति बहुलम्" इत्यलुक्॥ विदितं वेदनमस्यास्तीति विदितः परवृत्तान्तज्ञानवानित्यर्थः॥ "अर्शआदिभ्योऽच्" इत्यच्प्रत्ययः॥ अथवा कर्तरि कर्मधर्मोपचाराद्विदितवृत्तान्तो विदित इत्युच्यते। उभयत्रापि "पीता गावः" "भुक्ता ब्राह्मणाः" "विभक्ता भ्रातरः" इत्यादिवत्साधुत्वम्। न तु कर्तरि क्तः। सकर्मकेभ्यस्तस्य विधानाभावात्। अतएव भाष्यकारः—"अकारो मत्वर्थीयः। विभक्तमेषामस्तीति विभक्ताः। पीतमेषामस्तीति पीताः। भुक्तमेषामस्तीति भुक्ताः" इति सर्वत्र॥

अथवोत्तरपदलोपोऽत्र द्रष्टव्यः। विभक्तधनाः विभक्ताः, पीतोदकाः पीताः, भुक्तान्ना भुक्ता इति। अत्र लोपशब्दार्थमाह कैयटः–'गम्यार्थस्याप्रयोग एव लोपोऽभिमतः। विभक्ता भ्रातरः, इत्यत्र च धनस्य यद्विभक्तत्वं तद्भ्रातृषूपचर्यते। 'पीता गावः, इत्यवाप्युदकस्य पीतत्वं गोष्वारोप्यते। 'भुक्ता ब्राह्मणाः' इत्यत्रान्नस्य भुक्तत्वं ब्राह्मणेषूपचर्यते" इति। तद्वदत्रापि वृत्तिगतं विदितत्वं वेदितरि वनेचर उपचर्यते। एतेन "वनाय पीतप्रतिबद्धवत्साम्" इति "पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु" एवमादयो व्याख्याताः॥ अथवा विदितोविदितवान्। सकर्मकादप्यविवक्षिते कर्मणि कर्तरि क्तः। "आशितः कर्ता" इत्यादौ यथाहुः—"धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया" इति॥ प्रतीहारादिना ज्ञापित इति वा॥ द्वैतवने, द्वैताख्ये तपोवने। यद्वा, द्वे इते गते यस्मात्तद् द्वीतम्। द्वीतमेव द्वैतम्। तच्च तद्वनं च तस्मिन्। शोकमोहादिरहित इत्यर्थः॥ युधि रणे स्थिरं युधिष्ठिरं धर्मराजम्॥ "हलदन्तात्सप्तम्याः संज्ञायाम्" इत्युलक्। "गवियुधिभ्यां स्थिरः" इति षत्वम्॥ समाययौ सम्प्राप्तः॥ अत्र "वने वनेचरः" इति द्वयोः स्वरव्यञ्जनसमुदाययोरेकधैवावृत्त्या वृत्यनुप्रासो नामालंकारः॥ अस्मिन्सर्गे वंशस्थं वृत्तम्। तस्य लक्षणम्–"जतौ तु वंशस्थमुदीरितं जरौ" इति॥

सम्प्रति तत्कालोचितत्वमादेशयंस्तस्य तद्गुणसंपन्नत्वमादर्शयन्नाह–

कृतप्रणामस्य महीं महीभुजे
जितां सपत्नेन निवेदयिष्यतः ।
न विव्यथे तस्य मनो नहि प्रियं
प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥२॥

कृतप्रणामस्येति ॥ कृतप्रणामस्य तत्कालोचितत्वात्कृतनमस्कारस्य सपत्नेन रिपुणा दुर्योधनेन ॥ "रिपौ वैरिसपत्नारिद्विषद्द्वेषणदुर्हृदः" इत्यमरः ॥ जितां स्वायत्तीकृतां महीं महीभुजे युधिष्ठिराय ॥ क्रियाग्रहणात्संप्रदानत्वम् ॥ निवेदयिष्यतोज्ञापयिष्यतः ॥ "लृटः सद्वा" इति शतृप्रत्ययः ॥ तस्य वनेचरस्य मनो न विव्यथे । कथमीदृगप्रियं राज्ञे विज्ञापयामीति मनसि न चचालेत्यर्थः ॥ "व्यथ भयचलनयोः" इति धातोर्लिट् ॥ उक्तमर्थमर्थान्तरोपन्यासेन समर्थयते—नहीति ॥ हि यस्मात् । हितमिच्छन्तीति हितैषिणः स्वामिहितार्थिनः पुरुषा मृषा मिथ्याभूतं प्रियं प्रवक्तुं नेच्छन्ति । अन्यथा कार्यविघातकतया स्वामिद्रोहिणः स्युरिति भावः ॥ "असौख्यममान्द्यममृषाभाषित्वमभ्यूहकत्वं चेति चारगुणाः" इति नीतिवाक्यामृते ॥

तथापि प्रियार्हे राज्ञि कटुनिष्ठुरोक्तिर्न युक्तेत्याशङ्क्य स्वाम्यनुज्ञायां न दुष्यतीत्याशयेनाह—

द्विषां विघाताय विधातुमिच्छतो,
रहस्यनुज्ञामधिगम्य भूभृतः ।

स सौष्ठवौदार्यविशेषशालिनीं
विनिश्चितार्थामिति वाचमाददे ।३॥

द्विषामिति ॥ रहस्येकान्ते स वनेचरो द्विषां शत्रूणाम् ॥ कर्मणि षष्ठी ॥ विघाताय । द्विषो विहन्तुमित्यर्थः ॥ "तुमर्थाच्च भाववचनात्" इति चतुर्थी । "भाववचनाश्च" इति तुमर्थे घञ्प्रत्ययः । अत्र तादर्थ्ये चतुर्थ्यामपि न दोषः । तथापि प्रयोगवैचित्र्यविशेषस्याप्यलंकारत्वादेवं व्याचक्षते ॥ विघातुं व्यापारं कर्तुमिच्छतः ॥ "समानकर्तृकेषु तुमुन्" ॥ द्विषो-विहन्तुमुद्युक्तज्ञानस्येत्यर्थः ।अतएव भूभृतो युधिष्ठिरस्यानुज्ञामधिगम्य प्राप्य । सुष्ठु भावः सौष्ठवं शब्दसामर्थ्यम् ॥ सुष्ठुशब्दादव्ययादुद्गात्रादित्वादञ्प्रत्ययः ॥ उदारस्य भाव औदार्यमर्थसंपत्तिः । तयोर्द्वन्द्वः सौष्ठवौदार्ये ॥ अत्रौदार्यशब्दस्याजाद्यदन्तत्वेऽपि "लक्षणहेत्वोः क्रियायाः" इत्यत्राल्पस्वरस्यापि हेतुशब्दस्य पूर्वनिपातमकुर्वता सूत्रकृतैव पूर्वनिपातशास्त्रस्यानित्यत्वज्ञापनान्न पूर्वनिपातः । उक्तं च काशिकायाम्—"अयमेव लक्षणहेत्वोरिति निर्देशः पूर्वनिपातव्यभिचारचिह्नम्" इति ॥ त एव विशेषः । तयोर्वा विशेषः । तेन शालते शोभत इति सौष्ठवौदार्यविशेषशालिनी ताम् ॥ ताच्छील्ये णिनिः॥ विनिश्चितार्थां विशेषतः प्रमाणतो निर्णीतार्थामिति वक्ष्यमाणरूपां वाचमाददे स्वीकृतवान् । उवाचेत्यर्थः ॥ प्रथमं तावदप्रियनिवेदकमात्मानं प्रत्यक्षोभं याचते-

क्रियासु युक्तैर्नृप चारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः ॥ ४ ॥

क्रियास्विति ॥ हे नृप, क्रियासु कृत्यवस्तुषु युक्तैर्नियुक्तैरनुजीविभिर्भृत्यैः । चारादिभिरित्यर्थः । चरन्तीति चराः । पचाद्यच् । त एव चाराः । चरेः पचाद्यजन्तात्प्रज्ञादित्वादण्प्रत्ययः । त एव चक्षुर्येषां ते चारचक्षुषः । 'स्वपरमण्डले कार्याकार्यावलोकने चाराश्चक्षूंषि क्षितिपतीनाम्' इति नीतिवाक्यामृते । प्रभवो निग्रहानुग्रहसमर्थाः स्वामिनो न वञ्चनीया न प्रतारणीयाः । सत्यमेव वक्तव्या इत्यर्थः । चारापचारे चक्षुरपचारवद्राज्ञां पदे पदे निपात इति भावः । अतोऽप्रतार्यत्वाद्धेतोः । असाध्वप्रियं साधु प्रियं वा । मदुक्तमिति शेषः । क्षन्तुं सोढुमर्हसि । कुतः । हितं पथ्यं मनोहारि प्रियं च वचो दुर्लभम् । अतो मद्वचोऽपि हितत्वादप्रियमपि क्षन्तव्यमित्यर्थः ॥

तर्हि तूष्णींभाव एव वरमित्याशङ्क्याह—

स किंसखा साधु न शास्ति योऽधिपं
हितान्न यः संशृणुते स किंप्रभुः ।
सदानुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसंपदः ॥ ५ ॥

स इति ॥ यः सखामात्यादिरधिपं स्वामिनं साधु

हितं न शास्ति नोपदिशति । 'ब्रुविशासि–' इत्यादिना शासेर्दुहादिपाठाद्द्विकर्मकत्वम् । स हितानुपदेष्टा । कुत्सितः सखा किंसखा । दुर्मन्त्रीत्यर्थः । 'किमः क्षेपे' इति समासान्तप्रतिषेधः । तथा यः प्रभुर्निग्रहानुग्रहसमर्थः स्वामी हिताद्आप्तजनाद्धितोपदेष्टुः सकाशात् । 'आख्यातोपयोगे' इत्यपादानत्वात्पञ्चमी । न संशृणुते न शृणोति । हितमिति शेषः । 'समो गम्यृच्छि–' इत्यादिना संपूर्वाच्छृणोतेरकर्मकादात्मनेपदम् । अकर्मकत्वं वैवक्षिकम् । स हितमश्रोता प्रभुः किंप्रभुः कुत्सितस्वामी । पूर्ववत्समासः । सर्वथा सचिवेन वक्तव्यं श्रोतव्यं स्वामिना । एवं च राजमन्त्रिणोरैकमत्यं स्यादित्यर्थः । ऐकमत्यस्य फलमाह–सदेति । हि यस्मान्नृपेषु स्वामिषु । अमा सह भवा अमात्यास्तेषु च । 'अव्ययात्त्यप्' । अनुकूलेषु परस्परानुरक्तेषु सत्सु सर्वसंपदः सदा रतिमनुरागं कुर्वते कुर्वन्ति । न जातु जहतीत्यर्थः । अतो मया वक्तव्यं त्वया च श्रोतव्यमिति भावः । अत्रैवं राजमन्त्रिणोर्हितानुपदेशतदश्रवणनिन्दासामर्थ्यसिद्धेरैकमत्यलक्षणकारणस्य निर्दिष्टस्य सर्वसंपत्सिद्धिरूपकार्येण समर्थनात्कार्येण कारणसमर्थनरूपोऽर्थान्तरन्यासोऽलंकारः । तदुक्तम्– 'सामान्यविशेषकार्यकारणभावाभ्यां निर्दिष्टप्रकृतसमर्थनमर्थान्तरन्यासः' इति ॥

संप्रति स्वाहंकारं परिहरति—

निसर्गदुर्बोधमबोधविक्लवाः
क्व भूपतीनां चरितं क्व जन्तवः ।
तवानुभावोऽयमवेदि यन्मया
निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥ ६ ॥

निसर्गेति ॥ निसर्गदुर्बोधं स्वभावदुर्ग्रहम् । 'ईष-दुःसु-' इत्यादिना खल्प्रत्ययः । भूपतीनां चरितं क्व । अबोधविक्लवा अज्ञानोपहता जन्तवः । मादृशाः पामरजना इत्यर्थः । क्व । नोभयं संघटत इत्यर्थः । तथापि निगूढतत्त्वं संवृततयाथार्थ्यं विद्विषां नयवर्त्म षाड्गुण्यप्रयोगः 'संधिविग्रहयानानि संस्थाप्यासनमेव च । द्वैधीभावश्च विज्ञेयाः षड्गुणा नीतिवेदिनाम्' ॥ इत्यादिरूपो यन्मयावेदि । ज्ञातमिति यावत् । विदेः कर्मणि लुङ् । अयम् इदं वेदनमित्यर्थः । विधेयप्राधान्यात्पुंलिङ्गनिर्देशः । तवानुभावः सामर्थ्यम् । अनुगतो भावोऽनुभाव इति घञन्तेन प्रादिसमासः । न तूपसृष्टाद्भुवः प्रत्ययः । 'श्रिणीभुवोऽनुपसर्गे' इत्यनुपसर्गाद्भवतेर्धातोर्घञ्विधानात् । अतएव काशिकायाम्—'कथं प्रभावो राज्ञां प्रकृष्टो भाव इति प्रादिसमासः' इति । दोषपरिहारौ सम्यग्ज्ञात्वैव विज्ञापयामि । न तु वृथा कर्णकठोरं प्रलपामीत्याशयः ॥

संप्रति यद्वक्तव्यं तदाह—

विशङ्कमानो भवतः पराभवं
नृपासनस्थोऽपि वनाधिवासिनः ।

दुरोदरच्छद्मजितां समीहते
नयेन जेतुं जगतीं सुयोधनः ॥ ७॥

विशङ्कमान इति ॥ सुखेन युध्यते सुयोधनः । 'भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज्वाच्यः'। नृपासनस्थः सिंहासनस्थोऽपि । वनमधिवसतीति वनाधिवासिनो वनस्थात् । राज्यभ्रष्टादपीत्यर्थः। भवतस्त्वत्तः पराभवं पराजयं विशङ्कमान उत्प्रेक्षमाणःसन् । दुष्टमुदरमस्येति दुरोदरं द्यूतम् । पृषोदरादित्वात्साधु । 'दुरोदरो द्यूतकारे पणे द्यूते दुरोदरम्' इत्यमरः । तस्य च्छद्मना मिषेण जितां लब्धां दुर्णयार्जितां जगतीं महीम् । 'जगती विष्टपे मह्यां वास्तुच्छन्दोविशेषयोः' इति वैजयन्ती । नयेन नीत्या जेतुं वशीकर्तुं समीहते व्याप्रियते । न तूदास्त इत्यर्थः। बलवत्स्वामिकमविशुद्धागमं च धनं भुञ्जानस्य कुतो मनसः समाधिरिति भावः । अत्र 'दुरोदरच्छद्मजिताम्' इति विशेषणद्वारेण पदार्थस्य चतुर्थपादार्थं प्रति हेतुत्वेनोपन्यासाद्द्वितीयकाव्यलिङ्गमलंकारः । तदुक्तम्–'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्'इति॥

'नयेन जेतुं जगतीं समीहते' इत्युक्तम् । तत्प्रकारमाह—

तथापि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसंपदा यशः ।
समुन्नयन्भूतिमनार्यसंगमा-
द्वरं विरोधोऽपि समं महात्मभिः ॥ ८॥

तथापीति ॥ तथापि साशङ्कोपि । जिह्मो वक्रः । वञ्चक इति यावत् । स दुर्योधनो भवज्जिगीषया । गुणैर्भवन्तमाक्रमितुमिच्छयेत्यर्थः । 'हेतौ' इति तृतीया । गुणसंपदा दानदाक्षिण्यादिगुणगरिम्णा करणेन । शुभ्रं यशस्तनोति । स खलो गुणलोभनीयां त्वत्संपदमात्मसात्कर्तुं त्वत्तोऽपि गुणवत्तामात्मनः प्रकटयतीत्यर्थः । नन्वेवं गुणिनः सतोऽपि सज्जनविरोधो महानस्त्यस्य दोष इत्याशङ्क्य सोऽपि तत्संसर्गालाभे नीचसंगमाद्वरमुत्कर्षावहत्वादित्याह— समिति । तथाहि । भूतिं समुन्नयन्नुत्कर्षमापादयन् । 'लटः शतृशानचौ—' इत्यादिना शतृप्रत्ययः । पुनर्लड्ग्रहणसामर्थ्यात्प्रथमासामानाधिकरण्यम् । महात्मभिः समम् । सहेत्यर्थः 'साकं सत्रा समं सह' इत्यमरः । अनार्यसंगमाद् दुर्जनसंसर्गात् । 'पञ्चमी विभक्ते' इति पञ्चमी । विरोधोऽपि वरं मनाक्प्रियः । 'देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबं मनाक्प्रिये' इत्यमरः । अत्र मैत्र्यपेक्षया मनाक्प्रियत्वं विरोधस्य 'भूतिं समुन्नयन्' इत्यस्य पूर्ववाक्यान्वये समाप्तस्य वाक्यार्थस्य पुनरादानात्समाप्तपुनरात्ताख्यानदोषापत्तिः । तदुक्तं काव्यप्रकाशे— 'समाप्तपुनरादानात्समाप्तपुनरात्तकम्' इति । न च वाक्यान्तरमेतत् । येनोक्तदोषपरिहारः स्यात् । अर्थान्तरन्यासोऽलंकारः । स च भूतिसमुन्नयनस्य पदार्थविशेषणद्वारा विरोधवत्त्वं प्रति हेतुत्वाभिधानरूपकाव्यलिङ्गानुप्राणित इति ॥

ननु 'कार्त्स्न्येन केवला नीतिः' इत्याशङ्क्य नीति-युक्तं पौरुषमस्येत्याह—

कृतारिषड्वर्गजयेन मानवी-
मगम्यरूपां पदवीं प्रपित्सुना ।
विभज्य नक्तंदिवमस्ततन्द्रिणा
वितन्यते तेन नयेन पौरुषम् ॥ ९ ॥

कृतेति ॥ षण्णां वर्गः षड्वर्गः । अरीणामन्तःशत्रूणां कामक्रोधादीनां षड्वर्गोऽरिषड्वर्गः । शिवभागवतवत्समासः । तस्य जयः कृतो येन तेन तथोक्तेन । विनीतेनेत्यर्थः । विनीताधिकारं प्रजापालनमिति भावः । अगम्यरूपां पुरुषमात्रदुःप्राप्याम् । मनोरिमां मानवीम् । मनूपदिष्टसदाचारलक्षणामित्यर्थः । पदवीं प्रजापालनपद्धतिं प्रपित्सुना प्रपत्तुमिच्छुना । प्रपद्यतेः सन्नन्तादुप्रत्ययः । 'सनि मीमा–' इत्यादिनेसादेशः । 'अत्र लोपोऽभ्यासस्य' इत्यभ्यासलोपः । अस्ता तन्द्रिरालस्यं यस्य तेनास्ततन्द्रिणा । अनलसेनेत्यर्थः । तदिः सौत्रो धातुः । तस्मात् 'वङ्क्र्यादयश्च' इत्यौणादिकः क्रिन्प्रत्ययः । 'कृदिकारादक्तिनो वा ङीष् वक्तव्यः' इति । 'वन्दीघटीतरीतन्द्रीति ङीषन्तोऽपि' इति क्षीरस्वामी । तथा रामायणे प्रयोगः—'निस्तन्द्रिरप्रमत्तश्च स्वदोषपरदोषवित्' इति । तेन दुर्योधनेन । पुरुषस्य कर्म पौरुषं पुरुषकारः । उद्योग इति यावत् । युवादित्वादणप्र-

त्यर्थः। 'पौरुषं पुरुषस्योक्ते भावे कर्मणि तेजसि' इति विश्वः। नक्तं च दिवा च नक्तंदिवम्। अहोरात्रयोरित्यर्थः। 'अचतुर–' इत्यादिना सप्तम्यर्थवृत्त्योरव्यययोर्द्वन्द्वनिपातेऽचसमासान्तः। विभज्यास्यां वेलायामिदं कर्मेति विभागं कृत्वा नयेन नीत्या वितन्यते विस्तार्यते ॥

संप्रति भृत्याद्यनुरागमाह--

सखीनिव प्रीतियुजोऽनुजीविनः
समानमानान्सुहृदश्च बन्धुभिः।
स संततं दर्शयते गतस्मयः
कृताधिपत्यामिव साधु बन्धुताम् ॥१०॥

सखीनिति ॥ गतस्मयो निरहंकारोऽतएव स दुर्योधनः संततमनारतं साधु सम्यक्। अकपटमित्यर्थः। अनुजीविनो भृत्यान्। प्रीतियुजः स्निग्धान्सखीनिव मित्राणीव। दर्शयते। लोकस्येति शेषः। 'हेतुमति च' इति णिच्। 'णिचश्च' इत्यात्मनेपदम्। शोभनं हृदयं येषां तान्सुहृदो मित्राणि च। 'सुहृद्दुर्हृदौ मित्रामित्रयोः' इति निपातः। बन्धुभिर्भ्रात्रादिभिः समानमानांस्तुल्यसत्कारान्दर्शयते। बन्धूनां समूहो बन्धुता ताम्। 'ग्रामजनबन्धुसहायेभ्यस्तल्'। कृतमाधिपत्यं स्वाम्यं यस्यास्तां कृताधिपत्यामिव दर्शयते। बन्धूनधिपतीनिव दर्शयतीत्यर्थः। यथा भृत्यादिषु सख्यादिबुद्धिर्जायते लोकस्य तथा तान् संभावयतीत्यर्थः। अनुजीव्यादीनाम् 'कर्तुरी-

प्सिततमं कर्म' इति कर्मत्वम् । पूर्वे त्वस्मिन्नेव पदान्वये वाक्यार्थमित्थं वर्णयन्ति-- स राजानुजीव्यादीन्सख्यादीनिव दर्शयते । सख्यादय इव ते तु तं पश्यन्ति । सख्यादिभावेन पश्यतस्तांस्तथा दर्शयते, स्वयमेव छन्दानुवर्तितया स्वदर्शनं तेभ्यः प्रयच्छतीत्यर्थः । अर्थात्तस्येप्सितकर्मत्वम् । अणि कर्तुरनुजीव्यादेः 'अभिवादिदृशोरात्मनेपदमुपसंख्यानम्' इति पाक्षिकं कर्मत्वम् । एवं चात्राण्यन्तकर्मणो राज्ञोऽण्यन्ते कर्तृत्वेऽपि 'आरोहयते हस्ती स्वयमेव' इत्यादिवदश्रूयमाणकर्मान्तरत्वाभावान्नायं णेरणादिसूत्रस्य विषय इति मत्वा 'णिचश्च' इत्यात्मनेपदं प्रतिपेदिरे । भाष्ये तु णेरणादिसूत्रविषयत्वमप्यस्योक्तम् । यथाह--'पश्यन्ति भृत्या राजानम्' 'दर्शयते भृत्यान्राजा', 'दर्शयते भृत्यै राजा' अत्रात्मनेपदं सिद्धं भवति' इति । अत्राह कैयटः-- ननु कर्मान्तरसद्भावादत्रात्मनेपदेन भाव्यम्। उच्यते-अस्मादेवोदाहरणाद्भाष्यकारस्यायमेवाभिप्राय ऊह्यते। अण्यन्तावस्थायां ये कर्तृकर्मणी तद्व्यतिरिक्तकर्मान्तरसद्भावादात्मनेपदं न भवति । यथा-'स्थलमारोहयति मनुष्यान्' इति। इह त्वण्यन्तावस्थायां कर्तृणां भृत्यानां णौ कर्मत्वमिति भवत्येवात्मनेपदमिति॥

न चायं त्रिवर्गात्प्रमाद्यतीत्याह—

असक्तमाराधयतो यथायथं

विभज्य भक्त्या समपक्षपातया ।

गुणानुरागादिव सख्यमीयिवा-
न्नबाधतेऽस्य त्रिगणः परस्परम् ॥ ११ ॥

असक्तमिति ॥ यथायथं यथास्वं विभज्य । असंकीर्णरूपं विविच्येत्यर्थः । 'यथास्वे यथायथम्' इति निपातनाद्वृद्धिभावो नपुंसकत्वं च । 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वत्वम् । पक्षे पातः पक्षपात आसक्तिविशेषः समस्तुल्यो यस्यां तया समपक्षपातया । भक्त्यानुरागविशेषेण । पूज्येष्वनुरागो भक्तिरित्युपदेशः । पूज्यश्चायं त्रिवर्ग इति । असक्तमनासक्तम् । अव्यसनितयेति यावत् । आराधयतः सेवमानस्यास्य दुर्योधनस्य त्रयाणां धर्मार्थकामानां गणस्त्रिगणस्त्रिवर्गः । 'त्रिवर्गो धर्मकामार्थैश्चतुर्वर्गः समोक्षकैः' इत्यमरः । गुणानुरागात्तदीयगुणेष्वनुरागात् । गुणवदाश्रयलोभादित्यर्थः । सख्यं मैत्रीम् । 'सख्युर्यः' इति यप्रत्ययः । ईयिवानुपगतवानिवेत्युत्प्रेक्षा । 'उपेयिवाननाश्वाननूचानश्च' इति क्वसुप्रत्ययान्तो निपातः । 'नात्रोपसर्गस्तन्त्रम्' इति काशिकाकार आह स्म । परस्परं न बाधते । समवर्तित्वादस्य धर्मार्थकामाः परस्परानुपमर्देन वर्धन्त इत्यर्थः । उक्तं च—'धर्मार्थकामाः सममेव सेव्या यो ह्येकसक्तः स जनो जघन्यः' इति ॥

अथ श्लोकत्रयेणोपायकौशलं दर्शयन्नादौ सामदाने दर्शयति—

निरत्ययं साम न दानवर्जितं
न भूरि दानं विरहय्य सत्क्रियाम्।
प्रवर्तते तस्य विशेषशालिनी
गुणानुरोधेन विना न सत्क्रिया ॥ १२ ॥

निरत्ययमिति ॥ तस्य दुर्योधनस्य निरत्ययं निर्बाधम्। अमायिकमित्यर्थः। अन्यथा जनानां दुर्ग्रहत्वादिति भावः। साम सान्त्वम्। 'साम सान्त्वमुभे समे' इत्यमरः। दानवर्जितं न प्रवर्तते। अन्यथा लुब्धाद्यावर्जनस्य शुष्कप्रियैर्वाक्यैर्दुष्करत्वादिति भावः। उक्तं च—'लुब्धमर्थेन गृह्णीयात्साधुमञ्जलिकर्मणा। मूर्खं छन्दानुरोधेन तत्त्वार्थेन च पण्डितम्' इति। तथा भूरि प्रभूतम्। न तु कदाचित्स्वल्पमित्यर्थः। दानं धनत्यागः। सदित्यादरार्थेऽव्ययम् 'आदरानादरयोः सदसती' इति निपातसंज्ञास्मरणात्। तस्य क्रियां सत्क्रियां विरहय्य विहाय 'ल्यपि लघुपूर्वात्' इत्ययादेशः। न प्रवर्तते। अनादरे दानवैफल्यादिति भावः। न चैवं सर्वत्र, येनाविवेकित्वं कोशहानिश्च स्यादित्याह—प्रेति। विशेषशालिन्यतिशययोगिनी सत्क्रियादरक्रिया गुणानुरोधेन गुणानुरागेण विना न प्रवर्तते। 'पृथग्विना-' इत्यादिना तृतीया। गुणेष्वेवादरो भूरिदानं चेति नोक्तदोषावकाश इत्यर्थः। अत्रोत्तरोत्तरस्य पूर्वपूर्वविशेषणतया स्थापनादेकावल्यलंकारः। तदुक्तं काव्यप्रकाशे—'स्थाप्यतेऽपोह्यते वापि यथापूर्वं प

परम् । विशेषणतया वस्तु यत्र सैकावली द्विधा' ॥ इति ॥

अथ दण्डप्रकारमाह—

वसूनि वाञ्छन्न वशी न मन्युना
स्वधर्म इत्येव निवृत्तकारणः ।
गुरूपदिष्टेन रिपौ सुतेऽपि वा
निहन्ति दण्डेन स धर्मविप्लवम् ॥ १३ ॥

वसूनीति ॥ वशी दुर्योधनो वसूनि धनानि वाञ्छन्न । लोभान्नेत्यर्थः । 'वसु तोये धने मणौ' इति वैजयन्ती । निहन्तीति शेषः । तथा मन्युना कोपेन न च । 'मन्युर्दैन्ये क्रतौ क्रुधि' इत्यमरः । 'धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः' इति स्मरणादित्यर्थः । किन्तु निवृत्तकारणो निवृत्तलोभादिनिमित्तः सन्स्वधर्म इत्येव । स्वस्य राज्ञः सतो ममायं धर्मो ममेदं कर्तव्यमित्यस्मादेव हेतोरित्यर्थः । 'अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् । अयशो महदाप्नोति नरकं चैव गच्छति' ॥ इति स्मरणादिति भावः । गुरूपदिष्टेन प्राड्विवाकोपदिष्टेन । 'धर्मशास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थितः । समाहितमतिः पश्येद्व्यवहाराननुक्रमात्' ॥ इति नारदस्मरणात् । दण्डेन दमेन । शिक्षयेत्यर्थः । रिपौ सुतेऽपि वा । स्थितमिति शेषः । एतेनास्य समदर्शित्वमुक्तम् । धर्मविप्लवं धर्मव्यतिक्रमम् । अधर्ममिति यावत् । निहन्ति निवार-

यति । दुष्ट एवास्य शत्रुः शिष्ट एव बन्धुः । न तु सं-
न्धनिबन्धनः पक्षपातोऽस्तीत्यर्थः ॥

संप्रति भेदकौशलं दर्शयति—

विधाय रक्षान्परितः परेतरान-
शङ्किताकारमुपैति शङ्कितः ।
क्रियापवर्गेष्वनुजीविसात्कृताः
कृतज्ञतामस्य वदन्ति संपदः ॥ १४ ॥

विधायेति ॥ शङ्का संजातास्य शङ्कितोऽविश्वस्त-
सन्परितः सर्वत्र स्वपरमण्डले परेतरानात्मीयान-
वञ्चकानिति यावत् । यद्वा परानितरयन्ति भे-
नात्मसात्कुर्वन्तीति परेतरान् । तत्करोतीति ण्यन्ता-
त्कर्मण्यण्प्रत्ययः । रक्षन्तीति रक्षान्रक्षकान् । मन्त्र-
गुप्तिसमर्थानित्यर्थः । 'नन्दिग्रहि–' इत्यादिना पचा-
द्यच् । विधाय कृत्वा । नियुज्येत्यर्थः । अशङ्किताका-
रमुपैति । स्वयमविश्वस्तोऽपि विश्वस्तवदेव व्यव-
हरन्परमुखेनैव परान्भिनत्तीत्यर्थः । न च तान्रक्षा-
नुपेक्षते येन तेऽपि विकुर्वीरन्नित्याह—क्रियेति । क्रि-
यापवर्गेषु कर्मसमाप्तिष्वनुजीविसात्कृता भृत्या-
धीनाः कृताः । अपरावर्तितया दत्ता इत्यर्थः । 'देये
त्रा च' इति सातिप्रत्ययः । संपदोऽस्य राज्ञः कृतज्ञ-
तामुपकारित्वं वदन्ति । प्रीतिदानैरेवास्य कृतज्ञत्वं
प्रकाश्यते, न तु वाङ्मात्रेणेत्यर्थः । कृतज्ञे राजन्यनु-
जीविनोऽनुरज्यन्तेऽनुरक्ताश्च तं रक्षन्तीति भावः ।

अथोपायप्रयोगस्य फलवत्तां दर्शयति–

अनारतं तेन पदेषु लम्भिता
विभज्य सम्यग्विनियोगसत्क्रियाः ।
फलन्त्युपायाः परिबृंहितायती-
रुपेत्य संघर्षमिवार्थसंपदः ॥ १५ ॥

अनारतमिति ॥ तेन राज्ञा पदेषूपादेयवस्तुषु । 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । सम्यगसंकीर्णमव्यस्तं च विभज्य विविच्य । विनियोग एव सत्क्रियानुग्रहः । सत्कार इति यावत् । येषां ता लम्भिताः । स्थानेषु सम्यक्प्रयुक्ता इत्यर्थः । उपायाः सामादयः । संघर्षं परस्परस्पर्धामुपेत्येवेत्युत्प्रेक्षा । परिबृंहितायतीः प्रचितोत्तरकालाः । स्थिरा इत्यर्थः । अर्थसंपदोऽनारतमजस्रं फलन्ति । प्रसुवत इत्यर्थः ॥

अर्थसंपदमेवाह—

अनेकराजन्यरथाश्वसंकुलं
तदीयमास्थाननिकेतनाजिरम् ।
नयत्ययुग्मच्छदगन्धिरार्द्रतां
भृशं नृपोपायनदन्तिनां मदः ॥ १६ ॥

अनेकेति ॥ अयुग्मच्छदस्य सप्तपर्णपुष्पस्य गन्ध इव गन्धो यस्यासावयुग्मच्छदगन्धिः । 'सप्तम्युपमान-' इत्यादिना बहुव्रीहिरुत्तरपदलोपश्च । 'उपमानाच्च' इति समासान्त इकारः । नृपाणामुपायनान्युपहारभूता ये दन्तिनस्तेषां मदः । 'उपायनमुपग्राह्यमुपहा-

रस्तथोपदा' इत्यमरः। राज्ञामपत्यानि पुमांसो राजन्याः क्षत्रियाः। 'राजश्वशुराद्यत्' इति यत्प्रत्ययः राज्ञोऽपत्ये जातिग्रहणादन्। रथाश्चाश्वाश्च रथाश्वम्। सेनाङ्गत्वादेकवद्भावः। अनेकेषां राजन्यानां रथाश्वेन संकुलं व्याप्तं तदीयमास्थाननिकेतनाजिरं सभामण्डपाङ्गणं भृशमत्यर्थं मार्द्रतां पङ्किलत्वं नयति एतेन महासमृद्धिरस्योक्ता। अतएवोदात्तालंकारः। तथा चालंकारसूत्रम्--'समृद्धिमद्वस्तुवर्णनमुदात्तः' इति ॥

संप्रति जनपदक्षेमकरत्वमाह—

सुखेन लभ्या दधतः कृषीवले-
रकृष्टपच्या इव सस्यसंपदः।
वितन्वति क्षेममदेवमातृका-
श्चिराय तस्मिन्कुरवश्चकासति ॥१७॥

सुखेनेति ॥ चिराय तस्मिन् दुर्योधने क्षेमं वितन्वति क्षेमंकरे सति। देवः पर्जन्य एव माता येषां ते देवमातृका वृष्ट्यम्बुजीविनो देशाः। ते न भवन्तीत्यदेवमातृकाः। नदीमातृका इत्यर्थः। 'देशो नद्यम्बुवृष्ट्यम्बुसंपन्नव्रीहिपालितः। स्यान्नदीमातृको देवमातृकश्च यथाक्रमम्' ॥ इत्यमरः। एतेनास्य कुल्यादिपूर्तप्रवर्तकत्वमुक्तम्। कुरूणां निवासाः कुरवो जनपदविशेषाः। कृष्टेन पच्यन्त इति कृष्टपच्याः। 'राजसूय-' इत्यादिना कर्मकर्तरि क्यप्प्रत्ययान्तो निपा-

तः । तद्विपरीता अकृष्टपच्या इव । कृषिर्येषामस्तीति कृषीवलैः । कर्षकैरित्यर्थः । 'रजः कृषि-' आदिना वलच्प्रत्ययः । 'वले' इति दीर्घः । सुखेनाक्लेशेन लभ्या लब्धुं शक्याः सस्यसंपदो दधतो धारयन्तः । 'नाभ्यस्ताच्छतुः' इति नुमागमप्रतिषेधः । चकासति । सर्वोत्कर्षेण वर्तन्त इत्यर्थः । 'अदभ्यस्तात्' इति झेरदादेशः । 'जक्षित्यादयः षट्' इत्यभ्यस्तसंज्ञा । संपन्नजनपदत्वादसंतापकरत्वाच्च दुःसाध्योऽयमिति भावः ॥

नन्वेवं जनपदानुवर्तिनः कथमर्थलाभ इत्यत आह—

उदारकीर्तेरुदयं दयावतः
प्रशान्तबाधं दिशतोऽभिरक्षया ।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता
वसूपमानस्य वसूनि मेदिनी ॥ १८ ॥

उदारेति ॥ उदारकीर्तेर्महायशसः । 'उदारोदातृमहतोः' इत्यमरः । दयावतः परदुःखप्रहाणेच्छोः । अतएव प्रशान्तबाधं प्रशमितोपद्रवं यथा स्यात्तथेति क्रियाविशेषणम् । उदयविशेषणम् वा । 'वा दान्तशान्त-' इत्यादिना शमिधातोर्ण्यन्तान्निष्ठान्तो निपातः । अभिरक्षया सर्वतस्त्राणेनोदयं वृद्धिं दिशतः संपादयतो वसूपमानस्य कुबेरोपमस्य । 'वसुर्मयूखाग्निधनाधिपेषु' इति विश्वः । अस्य दुर्योधनस्य गुणैर्दयादाक्षिण्यादिभिरुपस्नुता द्राविता मेदिनी वसूनि

घनानि । 'वसु तोये धने मणौ' इति वैजयन्ती। स्वयं प्रदुग्धे । अक्लेशेन दुह्यत इत्यर्थः । दुहेः कर्मकर्तरि लट् । 'न दुहस्नुनमां यक्चिणौ' इति यक्प्रतिषेधः । यथा केनचिद्दुदुग्धेन नवप्रसूता रक्षिता च गौः स्वयं प्रदुग्धे तद्वदिति भावः । अलंकारस्तु— 'विशेषणमात्रसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिः' इति सर्वस्वकारः । अत्र प्रतीयमानया गवा सह प्रकृताङ्गया मेदिन्या भेदेऽभेदलक्षणातिशयोक्तिवशादोह्यत्वेनोक्तिरिति संक्षेपः ॥

वीरभटानुकूल्यमाह—

> महौजसो मानधना धनार्चिता
> धनुर्भृतः संयति लब्धकीर्तयः ।
> नसंहतास्तस्य न भिन्नवृत्तयः
> प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ॥१९

महौजस इति ॥ महौजसो महाबलाः । अन्यथा दुर्बलानामनुपकारित्वादिति भावः । मानः कुलशीलाद्यभिमान एव धनं येषां ते मानधनाः । अन्यथा कदाचिद्बलदर्पाद्विकुर्वीरन्निति भावः । धनार्चिता धनैरर्चिताः सत्कृताः । अन्यथा दारिद्र्यादेनं जह्युरिति भावः । संयति सङ्ग्रामे लब्धकीर्तयः । बहुयशस इत्यर्थः । अन्यथा कदाचिन्मुह्येयुरिति भावः । संहता मिथःसंगताः स्वार्थनिष्ठा न भवन्तीति नसंहताः । नञर्थस्य नशब्दस्य सुप्सुपेति समासः । भिन्नवृत्तयो

मिथोविरोधात्स्वामिकार्याकरा न भवन्तीति नभिन्नवृत्तयः। पूर्ववत्समासः। अन्यथा स्वामिकार्यविघातकतया स्वामिद्रोहिणः स्युरित्युभयत्रापि तात्पर्यार्थः। धनुर्भृतो धानुष्काः। आयुधीयमात्रोपलक्षणमेतत्। प्राधान्याद्धनुर्ग्रहणम्। तस्य दुर्योधनस्यासुभिः प्राणैः प्रियाणि समीहितुं कर्तुं वाञ्छन्ति। आनृण्यार्थं प्राणान्दातुमिच्छन्ति। अन्यथा दोषस्मरणादिति भावः। अत्र महौजसादिपदार्थानां प्राणदानकर्तव्यतां प्रति विशेषणगत्या हेतुत्वाभिधानात्काव्यलिङ्गमलंकारः। लक्षणं सूक्तम्। तथा साभिप्रायविशेषणत्वात्परिकरालंकार इति द्वयोस्तिलतण्डुलवद्विभक्तता स्फुरणात्संसृष्टिः॥

संप्रति स्वराष्ट्रवत्परराष्ट्रवृत्तान्तमपि वेत्तीत्याह—

महीभृतां सच्चरितैश्चरैः क्रियाः
स वेद निःशेषमशेषितक्रियः।
महोदयैस्तस्य हितानुबन्धिभिः
प्रतीयते धातुरिवेहितं फलैः॥ २०॥

महीभृतामिति॥ अशेषितक्रियः समापितकृत्यः। आफलोदयकर्मेत्यर्थः। स दुर्योधनः सच्चरितैः शुद्धचरितैः। अवञ्चकैरित्यर्थः। चरन्तीति चरास्तैश्चरैः प्रणिधिभिः। पचाद्यच्। महीभृतां क्रियाः प्रारम्भान्निःशेषं वेद वेत्ति। 'विदो लटो वा' इति णलादेशः। स्वरहस्यं तु न कश्चिद्वेदेत्याह—महोदयैरिति। धातु-

रिव तस्य दुर्योधनस्योहितमुद्योगो महोदयैर्महावृद्धिभिः हितमनुबध्नन्त्यनुरुन्धन्तीति हितानुबन्धिभिः। स्वन्तैरित्यर्थः। फलैः कार्यसिद्धिभिः प्रतीयते ज्ञायते। फलानुमेयास्तस्य प्रारम्भा इत्यर्थः॥

मित्रबलमाह—

न तेन सज्यं क्वचिदुद्यतं धनुः
कृतं न वा कोपविजिह्ममाननम्।
गुणानुरागेण शिरोभिरुह्यते
नराधिपैर्माल्यमिवास्य शासनम् ॥२१॥

नेति॥ तेन राज्ञा क्वचित्कुत्रापि। सह ज्यया मौर्व्या सज्यम्। 'मौर्वी ज्या शिञ्जिनी गुणः' इत्यमरः। 'तेन सहेति तुल्ययोगे' इति बहुव्रीहिः। धनुर्नोद्यतं नोर्ध्वीकृतम्। आननं वा कोपविजिह्मं कोपकुटिलं न कृतम्। यस्य कोप एव नोदेति कुतस्तस्य युद्धप्रसक्तिरिति भावः। कथं तर्ह्याज्ञां कारयति राज्ञ इत्यत्राह—गुणेति। गुणेषु दयादाक्षिण्यादिष्वनुरागेण प्रेम्णा। माल्यपक्षे सूत्रानुषङ्गेण। यद्वा सौरभ्यगुणलोभेन। नराधिपैरस्य शासनमाज्ञा माल्यं मालैव माल्यं तदिव। 'चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्' इति चीरस्वामी। शिरोभिरुह्यते धार्यते। 'वचिस्वपियजादीनां किति' इति यकि संप्रसारणम्। अत्रोपमा स्फुटैव॥

संप्रत्यस्य धार्मिकत्वमाह—

स यौवराज्ये नवयौवनोद्धतं
निधाय दुःशासनमिद्धशासनः ।
मखेष्वखिन्नोऽनुमतः पुरोधसा
धिनोति हव्येन हिरण्यरेतसम् ॥ २२ ॥

स इति ॥ इद्धशासनोऽप्रतिहताज्ञः स दुर्योधनो नवयौवनेनोद्धतं प्रगल्भम् । धुरन्धरमित्यर्थः । दुःखेन शास्यत इति दुःशासनस्तम् । 'भाषायां शासियुधि-' इत्यादिना खलर्थे युच्प्रत्ययः । यौवराज्ये युवराजकर्मणि । ब्राह्मणादित्वात्ष्यञ् । निधाय । नियुज्येत्यर्थः । पुरोधसा पुरोहितेनानुमतोऽनुज्ञातः । तस्मिन् याजके । सतीत्यर्थः । तदुल्लङ्घने दोषस्मरणादिति भावः । 'निष्ठा' इति भूतार्थे क्तः । न तु 'मतिबुद्धि-' इत्यादिना वर्तमानार्थे । अन्यथा 'पुरोधसा' इत्यत्र 'क्तस्य च वर्तमाने' इति षष्ठी स्यात् । अखिन्नोऽनलसो मखेषु क्रतुषु हव्येन हविषा । हिरण्यं रेतो यस्य तं हिरण्यरेतसमनलं धिनोति प्रीणयति । धिन्वेः प्रीणनार्थात् 'धिन्विकृण्व्योर च' इत्युप्रत्ययः । अकारश्चान्तादेशः ॥

न चैतावता निरुद्योगैर्भाव्यमित्याशङ्क्याशां दर्शयति—

प्रलीनभूपालमपि स्थिरायति
प्रशासदावारिधि मण्डलं भुवः ।
स चिन्तयत्येव भियस्त्वदेष्यती-
रहो दुरन्ता बलवद्विरोधिता ॥ २३ ॥

प्रलीनेति ॥ स दुर्योधनः। प्रलीनभूपालम्। निःसपत्नमित्यर्थः। स्थिरायति। चिरस्थायीत्यर्थः। भुवो मण्डलमा वारिधिभ्य आवारिधि। 'आङ्मर्यादाभिविध्योः' इत्यव्ययीभावः। प्रशासदाज्ञापयन्नपि। 'जक्षित्यादयः षट्' इत्यभ्यस्तसंज्ञा। 'नाभ्यस्ताच्छतुः' इति नुमागमप्रतिषेधः। त्वत्त्वत्त एष्यन्तीरागमिष्यन्तीः। धातूनामनेकार्थत्वादुक्तार्थसिद्धिः। अथवाङ्पूर्वः पाठः। 'एत्येधत्यूठ्सु' इति वृद्धिः। 'लृटः सद्वा' इति शतृप्रत्ययः। 'उगितश्च' इति ङीप्। 'आच्छीनद्योर्नुम्' इति विकल्पान्नुमभावः। भियो भयहेतून्। विपद इत्यर्थः। चिन्तयत्यालोचयत्येव। स एवाह—अहो बलवद्विरोधिता दुरन्ता दुष्टावसाना। सार्वभौमस्यापि प्रबलैः सह वैरायमाणत्वमनर्थपर्यवसाय्येवेति तात्पर्यम्। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः॥

ननु गूढाकारेङ्गितस्य तस्य भयं त्वया कथं निरधारीत्यत्राह—

कथाप्रसङ्गेन जनैरुदाहृता-
दनुस्मृताखण्डलसूनुविक्रमः।
तवाभिधानाद्व्यथते नताननः
स दुःसहान्मन्त्रपदादिवोरगः॥ २४॥

कथेति ॥ कथाप्रसङ्गेन गोष्ठीवचनेन जनैः। अन्यत्र कथाप्रसङ्गेन विषवैद्येन। 'कथाप्रसङ्गो वार्तायां

विषवैद्येऽपि वाच्यवत्' इति विश्वः। एकवचनस्याऽतन्त्रत्वाज्जनविशेषणम्। उदाहृतादुच्चारितात्तवाभिधानान्नामधेयात्स्मारकाद्धेतोः। 'हेतौ' इति पञ्चमी। 'आख्याह्वे अभिधानं च नामधेयं च नाम च' इत्यमरः। अन्यत्र तवाभिधानात्। 'नामैकदेशग्रहणे नाममात्रग्रहणम्' इति न्यायात् तश्च वश्च तवौ तार्क्ष्यवासुकी तयोरभिधानं यस्मिन्पदे तस्मात्। यद्वा कथाप्रसङ्ग इनाश्च ते जनाश्चेत्येकं पदम्। अनुस्मृताखण्डलसूनुविक्रमः स्मृतार्जुनपराक्रमः सन्दुःसहात्दतिदुःसहान्मन्त्रपदान्मन्त्रशब्दात् स्मारकाद्धेतोः। आखण्डलसूनुरिन्द्रानुजः। उपेन्द्रो विष्णुरिति यावत्। 'सूनुः पुत्रेऽनुजे रवौ' इति विश्वः। तस्य विः पक्षी। गरुड इत्यर्थः। तस्य क्रमः पादविक्षेपः। सोऽनुस्मृतो येन स तथोक्तः स्मृतगरुडमहिमा। उरग इव। नताननः सन्। व्यथते दुःखायते। 'पीडा बाधा व्यथा दुःखम्' इत्यमरः। अत्युत्कटभयदोषादिविकारा दुर्वारा इति भावः। 'सर्वतो जयमन्विच्छेत्पुत्रादिच्छेत्पराजयम्' इति न्यायादर्जुनोत्कर्षकथनं युधिष्ठिरस्य भूषणमेवेति सर्वमवदातम्॥

निगमयति—

तदाशु कर्तुं त्वयि जिह्ममुद्यते
विधीयतां तत्र विधेयमुत्तरम्।
परप्रणीतानि वचांसि चिन्वतां
प्रवृत्तिसाराः खलु मादृशां गिरः॥२५॥

तदिति ॥ तत्तस्मात्त्वयि जिह्मं कपटं कर्तुमुद्यते। त्वां जिघांसावित्यर्थः। तत्र तस्मिन्दुर्योधने विधेयं कर्तव्यमुत्तरं प्रतिक्रियाशु विधीयतां क्रियतां। ननु कर्तव्यमपि त्वयैवोच्यतामिति चेत्तत्राह—परेति। परप्रणीतानि परोक्तानि वचांसि चिन्वतां गवेषयतां मादृशाम्। वार्ताहारिणामित्यर्थः। गिरः प्रवृत्तिसारा वार्तामात्रसाराः खलु। 'वार्ता प्रवृत्तिर्वृत्तान्तः' इत्यमरः। वार्तामात्रवादिनो वयम्' न तु कर्तव्यार्थोपदेशसमर्थाः। अतस्त्वयैव निर्धार्य कार्यमिति भावः। सामान्येन विशेषसमर्थनादर्थान्तरन्यासः ॥

इतीरयित्वा गिरमात्तसत्क्रिये
गतेऽथ पत्यौ वनसंनिवासिनाम्।
प्रविश्य कृष्णासदनं महीभुजा
तदाचचक्षेऽनुजसंनिधौ वचः ॥ २६ ॥

इतीति॥ वनसंनिवासिनां पत्यौ वनचराधिप इति गिरमीरयित्वोक्त्वात्तसत्क्रिये गृहीतपारितोषिके गते सति। 'तुष्टिदानमेव चाराणां हि वेतनम्। ते हि तल्लोभात्स्वामिकार्येष्वतीव त्वरयन्ते' इति नीतिवाक्यामृते। अथ महीभुजा राज्ञा कृष्णासदनं द्रौपदीभवनं प्रविश्यानुजसंनिधौ तद्वनेचरोक्तं वचो वाक्यमाचचक्ष आख्यातम्। अथवा। कृष्णेति पदच्छेदः। सदनं प्रविश्यानुजसंनिधौ तद्वचः कृष्णाचचक्ष आख्याता। चक्षिङो दुहादेर्द्विकर्मकत्वादप्रधाने कर्मणि लिट् ॥

निशम्य सिद्धिं द्विषतामपाकृती-
स्ततस्ततस्त्या विनियन्तुमक्षमा ।
नृपस्य मन्युव्यवसायदीपिनी-
रुदाजहार द्रुपदात्मजा गिरः ॥ २७ ॥

निशम्येति ॥ अथ द्रुपदात्मजा द्रौपदी द्विषतां सिद्धिं वृद्धिरूपां निशम्य ततस्तदनन्तरम् । ततो द्विषद्भ्य आगतास्ततस्त्याः । 'अव्ययात्त्यप्' इति त्यप् । अपाकृतीर्विकारान्विनियन्तुं निरोद्धुमक्षमा सती नृपस्य युधिष्ठिरस्य मन्युव्यवसाययोः क्रोधोद्योगयोः दीपिनीः संवर्धिनीर्गिरो वाक्यान्युदाजहार । जगादेत्यर्थः ॥

भवादृशेषु प्रमदाजनोदितं
भवत्यधिक्षेप इवानुशासनम् ।
तथापि वक्तुं व्यवसाययन्ति मां
निरस्तनारीसमया दुराधयः ॥ २८ ॥

भवादृशेष्विति ॥ भवादृशा भवद्विधाः । पण्डिता इत्यर्थः । तेषु विषये । 'त्यदादिषु-' इत्यादिना कञ् । 'आ सर्वनाम्नः' इत्याकारादेशः । प्रमदाजनोदितं स्त्रीजनोक्तम् । वदेः क्तः । 'वचिस्वपि-' इत्यादिना संप्रसारणम् । अनुशासनं नियोगवचनमधिक्षेपस्तिरस्कार इव भवति । अतो न युक्तं वक्तुमित्यर्थः । तथापि वक्तुमनुचितत्वेऽपि निरस्तनारीसमयास्त्याजितशालीनतारूपस्त्रीसमाचाराः । 'समयाः शपथा-

चारकालसिद्धान्तसंविदः' इत्यमरः। दुराधयः सम-
योल्लङ्घनहेतुत्वाद्दुष्टा मनोव्यथाः। 'पुंस्याधिर्मानसी
व्यथा' इत्यमरः। मां वक्तुं व्यवसाययन्ति प्रेरयन्ति।
न किंचिदयुक्तं दुःखिनामिति भावः॥

अखण्डमाखण्डलतुल्यधामभि-
श्चिरं धृता भूपतिभिः स्ववंशजैः।
त्वयात्महस्तेन मही मदच्युता
मतङ्गजेन स्रगिवापवर्जिता॥ २९॥

अखण्डमिति॥ आखण्डलतुल्यधामभिरिन्द्रतु-
ल्यप्रभावैः। स्ववंशजैः भूपतिभिर्भरतादिभिश्चिर-
मखण्डमविच्छिन्नं धृता मही त्वया। मदं च्योततीति
मदच्युत्। क्विप्। तेन मदस्राविणा मतङ्गजेन स्रगि-
वात्महस्तेन स्वकरेण। स्वचापलेनेत्यर्थः। अपवर्जिता
परिहृता त्यक्ता। स्वदोषादेवायमनर्थागम इत्यर्थः॥
स्वदोषादेवायमनर्थागम इत्युक्तम्। स च दोषः कु-
टिलेष्वकौटिल्यमेवेत्याह—

व्रजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु ये न मायिनः।
प्रविश्य हि घ्नन्ति शठास्तथाविधा-
नसंवृताङ्गान्निशिता इवेषवः॥ ३०॥

व्रजन्तीति॥ मूढधियो निर्विवेकबुद्धयस्ते परा-
भवं व्रजन्ति ये मायाविषु मायावत्सु विषये।
'अस्मायामेधा–'इत्यादिना विनिप्रत्ययः। मायिनो

मायावन्तः। व्रीह्यादित्वादिनिप्रत्ययः। न भवन्ति। अत्रैवार्थान्तरं न्यस्यति—प्रविश्येति। शठा अपकारिणो धूर्तास्तथाविधानकुटिलान् असंवृताङ्गानवर्जितशरीरान्निशिता इषव इव प्रविश्य प्रवेशं कृत्वा मायां धृत्वा घ्नन्ति हि। 'आर्जवं हि कुटिलेषु न नीतिः' इति भावः॥

न च लक्ष्मीचाञ्चल्यादयमनर्थागमः, किन्तु स्वोपेक्षादोषमूलत्वादित्याशयेनाह—

गुणानुरक्तामनुरक्तसाधनः
कुलाभिमानी कुलजां नराधिपः।
परैस्त्वदन्यः क इवापहारयेन्
मनोरमामात्मवधूमिव श्रियम्॥३१॥

गुणेति॥ अनुरक्तसाधनोऽनुकूलसहायवान्। उक्तं च कामन्दकीये—'उद्योगादनिवृत्तस्य सुसहायस्य धीमतः। छायेवानुगता तस्य नित्यं श्रीः सहचारिणी॥' इति। कुलाभिमानी क्षत्रियत्वाभिमानी कुलीनत्वाभिमानी च त्वदन्यस्त्वत्तोऽन्यः। 'अन्यारात्—' इत्यादिना पञ्चमी। क इव नराधिपो गुणैः संध्यादिभिः सौन्दर्यादिभिरनुरक्तामनुरागवतीं कुलजां कुलक्रमादागतां कुलीनां च मनोरमां श्रियमात्मवधूमिव स्वभार्यामिव। 'वधूर्जाया स्नुषा स्त्री च' इत्यमरः। परैः शत्रुभिरन्यैश्चापहारयेत्। स्वयमेवापहारं कारयेदित्यर्थः। कलत्रापहारवल्लक्ष्म्यपहारोऽपि राज्ञा मानहानिकरत्वादनुपेक्षणीय इति भावः।

अथ दशभिः कोपोद्दीपनं करोति—

भवन्तमेतर्हि मनस्विगर्हिते
विवर्तमानं नरदेव ! वर्त्मनि ।
कथं न मन्युर्ज्वलयत्युदीरितः
शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥३२॥

भवन्तमिति ॥ हे नरदेव नरेन्द्र, एतर्हीदानीम् । अस्मिन्नापत्कालेऽपीत्यर्थः । 'एतर्हि संप्रतीदानीमधुना सांप्रतं तथा' इत्यमरः । 'इदमो र्हिल्' इति र्हिल्प्रत्ययः । 'एतेतौ रथोः' इत्येतादेशः । आपदमेवाह—मनस्विगर्हिते शूरजनजुगुप्सिते वर्त्मनि मार्गे विवर्तमानम् । शत्रुकृतां दुर्दशामनुभवंतमित्यर्थः । भवन्तं त्वामुदीरित उद्दीपितो मन्युः क्रोधः । शुष्कं नीरसम् । 'शुषः कः' इति निष्ठातकारस्य ककारः । शमी चासौ तरुश्चेति विशेषणसमासः । तम् । शमीग्रहणं शीघ्रज्वलनस्वभावात्कृतम् । उच्छिख उद्गतज्वालः । 'घृणिज्वाले अपि शिखे' इत्यमरः । वह्निरिव । कथं न ज्वलयति । ज्वलयितुमुचितमित्यर्थः । 'मितां ह्रस्वः' इति ह्रस्वः ॥

नन्वन्तःशत्रुत्वादयं क्रोधस्त्याज्य एवेत्याशङ्क्याह—

अवन्ध्यकोपस्य विहन्तुरापदां
भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना
न जातहार्देन न विद्विषादरः ॥ ३३ ॥

अवन्ध्येति ॥ अवन्ध्यः कोपो यस्य तस्यावन्ध्यकोपस्यात एवापदां विहन्तुः । निग्रहानुग्रहसमर्थस्येत्यर्थः । पुंस इति शेषः । देहिनो जन्तवः स्वयमेव वश्या वशंगता भवन्ति। 'वशं गतः' इति यत्प्रत्ययः । अतस्त्वया कोपिना भवितव्यमित्यर्थः । व्यतिरेके त्वनिष्टमाचष्टे—अमर्षशून्येन निःकोपेन जन्तुना । अन्यथा शोक इतिवत् । 'हेतौ' इति तृतीया । हृदयस्य कर्म हार्दं स्नेहः । 'प्रेमा ना प्रियता हार्दं प्रेम स्नेहः' इत्यमरः । युवादित्वादण् । 'हृदयस्य हृल्लेखयदण्लासेषु' इति हृदादेशः । जातहार्देन जातस्नेहेन सता जनस्यादरो न । विद्विषा द्विषता च सतादरो न । अमर्षहीनस्य रागद्वेषावकिंचित्करत्वादगण्यावित्यर्थः । अथवा विद्विषा सता दरो भयं न। 'दरोऽस्त्रियां भये श्वभ्रे' इत्यमरः। एतस्मिन्नेव प्रयोगे संधिवशाद्द्विधा पदच्छेदः । पुंवाक्येषु न दोषः । अतः स्थाने कोपः कार्यस्त्याज्यस्त्वस्थाने कोप इति भावः ॥

परिभ्रमंल्लोहितचन्दनोचितः
पदातिरन्तर्गिरि रेणुरूषितः ।
महारथः सत्यधनस्य मानसं
दुनोति नो कच्चिदयं वृकोदरः ॥ ३४ ॥

परिभ्रमन्निति ॥ लोहितचन्दनोचित उचितलोहितचन्दनः । 'वाहिताग्न्यादिषु—' इति साधुः । अभ्यस्तरक्तचन्दन इत्यर्थः । 'अभ्यस्तेत्युचितं न्या-

ण्यम्' इति यादवः। महारथी रथचारी। उभयत्रापि प्रागिति शेषः। अद्य तु रेणुरूषितो धूलिच्छुरितः। पादाभ्यामतति गच्छतीति पदातिः पादचारी। 'अज्यतिभ्यां च' इत्यनुवृत्तौ 'पादे च' इत्यौणादिक इणप्रत्ययः। 'पादस्य पदाज्यातिगोपहतेषु' इति पदादेशः। अन्तर्गिरि गिरिष्वन्तः। विभक्त्यर्थेऽव्ययीभावः। 'गिरेश्च सेनकस्य' इति विकल्पात्समासान्ताभावः। परिभ्रमत्ययं वृकोदरो भीमः। सत्यधनस्येति सोल्लुण्ठनवचनम्। अथापि सत्यमेव रक्ष्यते, न तु भ्रातर इति भावः। तवेति शेषः। मानसं नो दुनोति। कच्चिन्न परितापयति। 'कच्चित्कामप्रवेदने' इत्यमरः। स्वाभिप्रायाविष्करणं कामप्रवेदनम् ॥

विजित्य यः प्राज्यमयच्छदुत्तरान्
कुरूनकुप्यं वसु वासवोपमः।
स वल्कवासांसि तवाधुनाहरन्
करोति मन्युं न कथं धनंजयः ॥ ३५ ॥

विजित्येति ॥ वासव इन्द्र उपमा उपमानं यस्य स वासवोपम इन्द्रतुल्यो यो धनंजयः। उत्तरान्कुरून्मेरोरुत्तरान्मानुषान्देशविशेषान्विजित्य प्राज्यं प्रभूतम्। 'प्रभूतं प्रचुरं प्राज्यम्' इत्यमरः। कुप्यादन्यदकुप्यं हेमरूप्यात्मकम्। 'स्यात्कोशश्च हिरण्यं च हेमरूप्ये कृताकृते। ताभ्यां यदन्यत्तत्कुप्यम्' इत्यमरः। वसु धनमयच्छद्दत्तवान्। 'पाघ्रा-

इत्यादिना दाणो यक्छादेशः । स धनं जयतीति धनंजयोऽर्जुनः । 'संज्ञायां भृतृवृजि-' इत्यादिना खच्प्रत्ययः । 'अरुर्द्विषत्-' इत्यादिना मुमागमः । अधुनास्मिन्काले । 'अधुना' इति निपातनात्साधुः । वल्कवासांस्याहरन्कथं तव मन्युं क्रोधं दुःखं वा न करोति ॥

वनान्तशय्याकठिनीकृताकृती
कचाचितौ विष्वगिवागजौ गजौ ।
कथं त्वमेतौ धृतिसंयमौ यमौ
विलोकयन्नुत्सहसे न बाधितुम् ॥ ३६ ॥

वनान्तेति ॥ वनान्तो वनभूमिरेव शय्या तया कठिनीकृताकृती कठिनीकृतदेहौ । 'आकारो देह आकृतिः' इति वैजयन्ती । विष्वक्समन्तात् । 'स-मन्ततस्तु परितः सर्वतो विष्वगित्यपि' इत्यमरः । कचाचितौ कचव्याप्तौ । विशीर्णकेशावित्यर्थः । अ-तएवागजौ गिरिसंभवौ गजाविव स्थितावेतौ यमौ युग्मजातौ । माद्रीपुत्रावित्यर्थः । 'यमो दण्डधरे ध्वाङ्क्षे संयमे यमजेऽपि च' इति विश्वः । विलोक-यंस्त्वं कथं धृतिसंयमौ सन्तोषनियमौ । 'धृतिर्योगा-न्तरे धैर्ये धारणाध्वरतुष्टिषु' इति विश्वः । बाधितुं नोत्सहसे न प्रवर्तसे । 'शकधृष-' इत्यादिना तुमुन् । अहो ते महद्धैर्यमिति भावः ॥

अथ राज्ञो दुर्दशां दर्शयितुमुपोद्घातमाह । प्रकृतार्थं वर्णयितुमर्थान्तरवर्णनमुपोद्घातः—

इमामहं वेद न तावकीं धियं
विचित्ररूपाः खलु चित्तवृत्तयः ।
विचिन्तयन्त्या भवदापदं परां
रुजन्ति चेतः प्रसभं ममाधयः ॥ ३७ ॥

इमामिति ॥ इमां वर्तमानाम् । तवेमां तावकीं त्वदीयाम् । 'तस्येदम्' इत्यणप्रत्ययः । 'तवकममकावेकवचने' इति तावकादेशः । धियं त्वदापद्विषयां चित्तवृत्तिमहं न वेद कीदृशी वा न वेद्मि । परबुद्धेरप्रत्यक्षत्वादिति भावः । 'विदो लटो वा' इति लटो णलादेशः । न चात्मदृष्टान्तेनापन्नत्वादृदुःखित्वमनुमातुं शक्यते । धीरादिष्वनैकान्तिकत्वादित्याशयेनाह—चित्तवृत्तयो विचित्ररूपा धीराधीराद्यनेकप्रकाराः खलु । किन्तु परामुत्कृष्टां भवदापदं विचिन्तयन्त्या भावयन्त्या मम चेतश्चित्तम् । आधयो मनोव्यथाः । 'उपसर्गे घोः किः' इति किप्रत्ययः । प्रसभं प्रसह्य रुजन्ति भञ्जन्ति । 'रुजो भङ्गे' इति धातोर्लट् । पश्यतामपि दुःसहा दुःखजननी त्वद्विपत्तिरनुभवितारं त्वां न विकरोतीति महच्चित्रमित्यर्थः । चेत इति 'रुजार्थानां भाववचनानामज्वरेः' इति षष्ठी न भवति । तत्र शेषाधिकाराच्छेषत्वस्य विवक्षितत्वादिति ॥

तदापदमेव श्लोकत्रयेणाह—

पुराधिरूढः शयनं महाधनं
विबोध्यसे यः स्तुतिगीतिमङ्गलैः ।

अदभ्रदर्भामधिशय्य स स्थलीं
जहासि निद्रामशिवैः शिवारुतैः ॥३८॥

पुरेति ॥ यस्त्वं महाधनं बहुमूल्यं श्रेष्ठम् । 'महाधनं महामूल्य' इति विश्वः । शयनं शय्यामधिरूढः सन् । स्तुतयो गीतयश्च ता एव मङ्गलानि तैः करणभूतैः पुरा विबोध्यसे । वैतालिकैरिति शेषः । पूर्वं बोधित इत्यर्थः । 'पुरि लुङ् चास्मे' इति भूतार्थे लट् । स त्वमदभ्रदर्भां बहुकुशाम् । 'अस्त्री कुशं कुथो दर्भः' इति । 'अदभ्रं बहुलं बहु' इति चामरः । स्थलीमकृत्रिमभूमिम् । 'जानपद-' इत्यादिनाकृत्रिमार्थे ङीष् । एतेन दुःसहस्पर्शत्वमुक्तम् । 'अधिशीङ्स्थासां कर्म' इति कर्मत्वम् । अधिशय्य शयित्वा । 'अयङ्यिक्ङिति' इत्ययङादेशः । अशिवैरमङ्गलैः शिवारुतैः क्रोष्टुवासितैः । 'शिवा हरीतकी क्रोष्टा शमी नव्यमलक्युभे' इति वैजयन्ती । निद्रां जहासि । अद्येति शेषः ॥

पुरोपनीतं नृप रामणीयकं
द्विजातिशेषेण यदेतदन्धसा ।
तदद्य ते वन्यफलाशिनः परं
परैति कार्श्यं यशसा समं वपुः ॥ ३९॥

पुरेति ॥ हे नृप, यदेतत्पुरोवर्ति वपुः पुरा द्विजातिशेषेण द्विजभुक्तावशिष्टेनान्धसान्नेन । 'भिस्सा स्त्री भक्तमन्धोऽन्नम्' इत्यमरः । रमणीयस्य भावो रामणीयकं मनोहरत्वमुपनीतं प्रापितम् । नयतेर्द्वि-

कर्मकृत्वात्प्रधाने कर्मणि क्तः । 'प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम्' इति वचनात् । अद्य वन्यफलाशिनस्ते तव तद्यपुर्यशसा समं परमातिमात्रं कार्श्यं परैति प्राप्नोति । उभयमपि चीयत इत्यर्थः । अत्र सहोक्तिरलंकारः । तदुक्तं काव्यप्रकाशे—'सा सहोक्तिः सहार्थस्य बलादेकं द्विवाचकम्' इति ॥

अनारतं यौ मणिपीठशायिना-
वरञ्जयद्राजशिरःस्रजां रजः ।
निषीदतस्तौ चरणौ वनेषु ते
मृगद्विजालूनशिखेषु बर्हिषाम् ॥ ४० ॥

अनारतमिति ॥ अनारतमजस्रं मणिपीठशायिनौ मणिमयपादपीठस्थायिनौ यौ चरणौ राजशिरःस्रजां नमद्भूपालमौलिस्रजां रजः परागोऽरञ्जयत्, तौ ते चरणौ मृगैर्द्विजैश्च तपस्विभिरालूनशिखेषु छिन्नाग्रेषु बर्हिषां कुशानाम् । 'बर्हिः कुशहुताशयोः' इति विश्वः । वनेषु निषीदतस्तिष्ठतः ॥

ननु सर्वप्राणिसाधारण्यामापदि का परिदेवनेत्यत आह—

विपन्निमित्ता यदियं दशा ततः
समूलमुन्मूलयतीव मे मनः ।
परैरपर्यासितवीर्यसंपदां
पराभवोऽप्युत्सव एव मानिनाम् ॥४१॥

विपदिति ॥ यद्यतः कारणादियं दशावस्था ।

'दशा वर्तावस्थायाम्' इति विग्रहः । छिषन्तो निमित्तं यस्याः सा । 'छिषोऽमित्रे' इति शतृप्रत्ययः । अतो मे मनः समूलं साशयमुन्मूलयतीवोत्पाटयतीव । दैविकी त्वापन्न दुःखायेत्याह--परैरिति । परैः शत्रुभिरपर्यासितापर्यावर्तिता वीर्यसंपद्येषां तेषां मानिनां पराभवो विपदप्युत्सव एवेति वैधर्म्येणार्थान्तरन्यासः । मानहानिर्दुःसहा, न त्वापदिति भावः ॥

विहाय शान्तिं नृप धाम तत्पुनः
प्रसीद संधेहि वधाय विद्विषाम् ।
व्रजन्ति शत्रूनवधूय निःस्पृहाः
शमेन सिद्धिं मुनयो न भूभृतः ॥ ४२ ॥

विहायेति ॥ हे नृप, शान्तिं विहाय तत्प्रसिद्धं धाम तेजो विद्विषां वधाय पुनः संधेह्यङ्गीकुरु प्रसीद । प्रार्थनायां लोट् । ननु शमेन कार्यसिद्धौ किं क्रोधेनेत्यत्राह-व्रजन्तीति । निःस्पृहा मुनयः शत्रूनवधूय निर्जित्य शमेन क्रोधवर्जनेन सिद्धिं व्रजन्ति । भूभृतस्तु न । कैवल्यकार्यवद्राजकार्यं न शान्तिसाध्यमित्यर्थः ॥

पुरःसरा धामवतां यशोधनाः
सुदुःसहं प्राप्य निकारमीदृशम् ।
भवादृशाश्चेदधिकुर्वते रतिं
निराश्रया हन्त हता मनस्विता ॥ ४३ ॥

पुर इति ॥ किं च धामवतां तेजस्विनाम् । पर-

निकारासहिष्णूनामित्यर्थः। पुरः सरन्तीति पुरःसरा अग्रेसराः। 'पुरोऽग्रतोऽग्रेषु सर्तेः' इति टप्रत्ययः। यशोधना भवादृशाः सुदुःसहमतिदुःसहमीदृशमुक्तप्रकारं निकारं पराभवं प्राप्य रतिं संतोषमधिकुर्वते स्वीकुर्वते चेत्तर्हि। हन्त इति खेदे। मनस्विताभिमानिता निराश्रया सती हता। तेजस्विजनैकशरणत्वान्मनस्वितायाः इत्यर्थः। अतः पराक्रमितव्यमिति भावः। यद्यप्यत्र प्रसहनस्यासङ्गतेरधिपूर्वात्करोतेः 'अधेः प्रसहने' इत्यात्मनेपदं न भवति। 'प्रसहनं परिभवः' इति काशिका। तथाप्यस्याः कर्त्रभिप्रायविवक्षायामेव प्रयोजकत्वात्कर्त्रभिप्राये 'स्वरितञितः' इत्यात्मनेपदं प्रसिद्धम्॥

अथ क्षमामेव निरस्तविक्रम-
श्चिराय पर्येषि सुखस्य साधनम्।
विहाय लक्ष्मीपतिलक्ष्म कार्मुकं
जटाधरः सञ्जुहुधीह पावकम्॥ ४४॥

अथेति॥ अथ पक्षान्तरे निरस्तविक्रमः सन्। चिराय चिरकालेनापि क्षमां क्षान्तिमेव। 'क्षितिक्षान्त्योः क्षमा' इत्यमरः। सुखस्य साधनं पर्येष्यवगच्छसि तर्हि लक्ष्मीपतिलक्ष्म राजचिह्नं कार्मुकं विहाय। धरतीति धरः। पचाद्यच्। जटानां धरो जटाधरः सन्निह वने पावकं जुहुधि। पावके होमं कुर्वित्यर्थः। अधिकरणे कर्मत्वोपचारः। विरक्तस्य किं धनुषेत्यर्थः। 'हुझल्भ्यो हेर्धिः'॥

अथ समयोल्लङ्घनाद्बिभेषि तदपि न किंचिदित्याह—

न समयपरिरक्षणं क्षमं ते
निकृतिपरेषु परेषु भूरिधाम्नः।
अरिषु हि विजयार्थिनः क्षितीशा
विदधति सोपधि संधिदूषणानि ॥४५॥

नेति ॥ परेषु शत्रुषु। निकृतिः परं प्रधानं येषु तेषु। तथोक्तेष्वपकारतत्परेषु सत्सु भूरिधाम्नो महौजसः प्रतीकारक्षमस्य ते तव समयस्त्रयोदशसंवत्सरान्वने वत्स्यामीत्येवंरूपा संवित्। 'समयाः शपथाचारकालसिद्धान्तसंविदः' इत्यमरः। तस्य परिरक्षणं प्रतीक्षणं न क्षमं न युक्तम्। 'युक्ते क्षमं शक्ते हिते त्रिषु' इत्यमरः। हि यस्माद्विजयार्थिनो विजिगीषवः क्षितीशा अरिषु विषये सोपधि सकपटं यथा तथा। 'कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे' इत्यमरः। संधिदूषणानि विदधति केनचिद्व्याजेन दोषमापाद्य संधिं दूषयन्ति। विघटयन्तीत्यर्थः। शक्तस्य हि विजिगीषोः सर्वथा कार्यसाधनं प्रधानमन्यत्समयरक्षणादिकमशक्तस्येति भावः। अर्थान्तरन्यासोऽलंकारः। पुष्पिताग्रावृत्तम् ॥

उक्तमर्थमाशीर्वादपूर्वकमुपसंहरति—

विधिसमयनियोगाद्दीप्तिसंहारजिह्मं
शिथिलवसुमगाधे मग्नमापत्पयोधौ।

रिपुतिमिरमुदस्योदीयमानं दिनादौ
दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः ॥४६॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये
प्रथमः सर्गः ।

विधाविति ॥ विधिर्दैवम् । 'विधिर्विधाने दैवे च' इत्यमरः । समयः कालस्तयोर्नियोगान्नियमनाद्धेतोः । तयोर्दुरतिक्रमत्वादिति भावः । अगाधे दुस्तरे । आपत्पयोधाविवेत्युपमितसमासः । दिनकृतमिवेति वक्ष्यमाणानुसारात्तस्मिन्नापत्पयोधौ मग्नम् । सूर्योऽपि सायं सागरे मज्जति परेद्युरुन्मज्जतीत्यागमः । दीप्तिः प्रताप आतपश्च तस्याः संहारेण जिह्ममप्रसन्नम् । शिथिलवसुं शिथिलधनम्, अन्यत्र शिथिलरश्मिम् । 'वसुर्देवेऽग्नौ रश्मौ च वसु तोये धने मणौ' इति वैजयन्ती । 'शिथिलबलम्' इति पाठे तूभयत्रापि शिथिलशक्तिकमित्यर्थः । रिपुस्तिमिरमिवेति रिपुतिमिरमुदस्य निरस्योदीयमानमुद्यन्तम् । 'ईङ् गतौ' इति धातोर्दैवादिकात्कर्तरि शानच् । त्वां दिनादौ दिनकृतमिव लक्ष्मीर्भूयः समभ्येतु भजतु । 'आशिषि लिङ्लोटौ' इति लोट् । चमत्कारकारितया मङ्गलाचरणरूपतया च सर्गान्त्यश्लोकेषु लक्ष्मीशब्दप्रयोगः । यथाह भगवान्भाष्यकारः—'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते वीरपुरुषकाण्यायुष्मत्पुरुषकाणि च भवन्त्यध्ये-

भारश्च प्रचक्षारो भवन्ति' इति । पूर्णोपमेयम् । मालिनीवृत्तम् । सर्गान्तत्वाद्वृत्तभेदः । यथाह दण्डी—'सर्गैरनतिविस्तीर्णैः श्राव्यवृत्तैः सुसंधिभिः । सर्वत्र भिन्नवृत्तान्तैरुपेतं लोकरञ्जकम् ॥' इति ॥

अथ कविः काव्यवर्णनीयाख्यानपूर्वकं सर्गपरिसमाप्तिं कथयति—इतीत्यादि । इतिशब्दः परिसमाप्तौ । भारविकृताविति कविनामकथनम् । महाकाव्य इति महच्छब्देन लक्षणसंपत्तिः सूचिता । किरातार्जुनीय इति काव्यवर्णनीययोः कथनम् । प्रथमः सर्गः । समाप्त इति शेषः । एवमुत्तरत्रापि द्रष्टव्यम् । किरातार्जुनावधिकृत्य कृतो ग्रन्थः किरातार्जुनीयम् । 'शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः' इति द्वन्द्वाच्छप्रत्ययः । राघवपाण्डवीयमितिवत् । तथा ह्यर्जुन एवात्र नायकः । किरातस्तु तदुत्कर्षाय प्रतिभटतया वर्णितः । यथाह दण्डी—'वंशवीर्यप्रतापादि वर्णयित्वा रिपोरपि । तज्जयान्नायकोत्कर्षकथनं च धिनोति नः ॥' इति । अथायं संग्रहः—'नेता मध्यमपाण्डवो भगवतो नारायणस्यांशजस्तस्योत्कर्षकृते त्ववर्ण्यततरां दिव्यः किरातः पुनः । शृङ्गारादिरसोऽङ्गमत्र विजयी वीरः प्रधानो रसः शैलाद्यानि च वर्णितानि बहुशो दिव्यास्त्रलाभः फलम् ॥' इति ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसू-

Teacher book.

रिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायां प्रथमः सर्गः समाप्तः ।

द्वितीयः सर्गः ।

विहितां प्रियया मनःप्रिया-
मथ निश्चित्य गिरं गरीयसीम् ।
उपपत्तिमदूर्जिताश्रयं
नृपमूचे वचनं वृकोदरः ॥ १ ॥

विहितामिति ॥ अथ वृकोदरो भीमः प्रियया द्रौपद्या । प्रियाग्रहणमस्या हितोपदेशतात्पर्यसूचनार्थम् । विहिताम् । अभिहितामित्यर्थः । विपूर्वस्य दधातेः क्रियासामान्यवाचिनो योग्यविशेषपर्यवसानात् । मनःप्रियामभिमतार्थयोगान्मनोहराम् । विशेषणद्वयेनापि गिरो ग्राह्यत्वमुक्तम् । गिरं गरीयसीं सारवत्तरां निश्चित्य नृपं धर्मराजमुपपत्तिमद्युक्तियुक्तमूर्जिताश्रयमुदारार्थं वचनमूचे उक्तवान् । कर्तरि लिट् । ब्रुवो वचिरादेशः । 'ब्रुविशासि—' इत्यादिना द्विकर्मकत्वम् । 'अकथितं च' इति नृपस्य कर्मत्वम् ॥

किं तद्वचनं तदाह—

यदवोचत वीक्ष्य मानिनी
परितः स्नेहमयेन चक्षुषा ।
अपि वागधिपस्य दुर्वचं
वचनं तद्विदधीत विस्मयम् ॥ २ ॥

यदिति ॥ मानिनी क्षत्रियकुलाभिमानवती द्रौपदी स्नेहमयेन स्नेहप्रचुरेण । 'तत्प्रकृतवचने मयट्' । चक्षुषा ज्ञानचक्षुषा । एतेनाप्तत्वमुक्तम् । परितो वीक्ष्य समन्ततो विविच्य यद्वचनमवोचत । ब्रुवोर्वक्तेर्वा लुङ् । 'वच उम्' इत्युमागमः । वागधिपस्य बृहस्पतेरपि दुर्वचं वक्तुमशक्यम् । शेषे षष्ठीयम्, न कृद्योगलक्षणा । अतो 'न लोक–' इत्यादिना षष्ठीप्रतिषेधो नास्ति । तद्वचनं विस्मयं विदधीत । सर्वस्यापीति शेषः । अथवा वागधिपस्यापि विस्मयं विदधीतेति सम्बन्धः । दुर्वचम् । केनापीति शेषः । यतः स्त्रैणमपि शास्त्रमनुरुणद्धि हितं चानुबध्नाति अतो विस्मयकरं ग्राह्यं चैतद्वचनमिति तात्पर्यार्थः ॥

विस्मयकरत्वे हेतुमाह——

विषमोऽपि विगाह्यते नयः
कृततीर्थः पयसामिवाशयः ।
स तु तत्र विशेषदुर्लभः
सदुपन्यस्यति कृत्यवर्त्म यः ॥ ३ ॥

विषम इति ॥ विषमोऽपि दुर्बोधोऽपि । अन्यत्र

दुःप्रवेशोऽपि । नयो नीतिशास्त्रम् । पयसामाशयो ह्रद इव । कृततीर्थः कृताभ्यासाद्युपायः सन् । 'तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु' इति विश्वः ॥ अन्यत्र कृतजलावतारः सन् । 'तीर्थं योनौ जलावतारे च' इति हलायुधः । विगाह्यते गृह्यते प्रविश्यते च । किन्तु तत्र नये जलाशये च स तादृशः पुरुषो विशेषदुर्लभोऽत्यन्तदुर्लभो यः कृत्यं संधिविग्रहादि कार्यं स्नानादिकं च तस्य वर्त्म सत्साधु देशकालाद्यविरुद्धम् । यथा तथा । अन्यत्र गर्तग्राहपाषाणादिरहितम् । यथा तथोपन्यस्यत्युदाहरति । 'उपन्यासस्तु वाङ्मुखम् । उपोद्घाते उदाहारः' इत्यमरः । यथा केनचित्कृततीर्थे पयसि गम्भीरेऽपि प्रवेष्टारः सन्ति तीर्थकरस्तु विरलः । तद्वन्नीतावपि गूढमपि तत्त्वं वक्तरि सति बोद्धारः सन्ति । वक्ता तु न सुलभः । अत इयमपठितापि साधु वक्तीति युज्यते विस्मय इत्यर्थः ॥

अथ ग्राह्यत्वे हेतुमाह——

परिणामसुखे गरीयसि
व्यथकेऽस्मिन्वचसि क्षतौजसाम् ।
अतिवीर्यवतीव भेषजे
बहुरल्पीयसि दृश्यते गुणः ॥ ४ ॥

परिणामेति ॥ परिणामः फलकालः परिपाकावस्था च । तत्र सुखे हिते । 'शस्तं चाथ त्रिषु द्रव्ये

पापं पुण्यं सुखादि च' इति सुखशब्दस्य विशेष्यलिङ्गत्वम्। गरीयसि भूयिष्ठे श्रेष्ठे च। चतौजसामुभयत्रापि चीणशक्तीनां व्यथके युद्धोपोद्वलकत्वादर्थंकरे। अन्यत्रादौ संशयादिदुःखजनके। अल्पीयस्यल्पाचरेऽल्पमात्रे च। उक्तं च— 'स्वल्पा च मात्रा बहुलो गुणश्च' इति। अस्मिन्वचसि द्रौपदीवाक्ये। अतिवीर्यवत्यत्यन्तसामर्थ्यवति भेषज औषध इव। 'भेषजौषधभैषज्यम्' इत्यमरः। बहुरनेको गुणो मानत्राणराज्यलाभादिरारोग्यबलपोषादिश्च दृश्यते। अतो ग्राह्यमस्या वचनमिति भावः॥

सत्यमेवं तथापि मह्यं न रोचते। किं करोमीत्यत्राह—

इयमिष्टगुणाय रोचतां
रुचिरार्था भवतेऽपि भारती।
ननु वक्तृविशेषनिःस्पृहा
गुणगृह्या वचने विपश्चितः॥ ५॥

इयमिति॥ रुचिरार्था महितार्थसंपन्नेति रुचिहेतूक्तिः। इयं भारती द्रौपदीवाक्यमिष्टगुणाय। गुणग्राहिण इत्यर्थः। भवते तुभ्यमपि। 'रुच्यर्थानां प्रीयमाणः' इति संप्रदानत्वाच्चतुर्थी। रोचतां स्वदताम्। विध्यर्थे लोट्। हितवचने बलादपीच्छां कुर्यादौषधवदिति भावः। तथापि स्त्रैणे वचसि का श्रद्धा तत्राह—नन्विति। गुणानां गृह्या गुणगृह्याः।

गुणपक्षपातिन इत्यर्थः। 'पदास्वैरिबाह्यापक्ष्येषु च' इति ग्रहेः क्यप्। विपश्चितो विद्वांसः। 'विद्वान्विपश्चिद्दोषज्ञः' इत्यमरः। वचने विषये वक्तृविशेषे स्त्रीपुंसादिलक्षणे निःस्पृहा ननु निरास्थाः खलु। 'बालादपि सुभाषितं ग्राह्यम्' इति न्यायादिति भावः॥

संप्रति स्वयमुपालभते—

चतसृष्वपि ते विवेकिनी
नृप विद्यासु निरूढिमागता।
कथमेत्य मतिर्विपर्ययं
करिणी पङ्कमिवावसीदति॥ ६॥

चतसृष्विति॥ हे नृप, चतसृष्वपि विद्यास्वान्वीक्षिक्यादिषु। 'आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती। विद्याश्चैताश्चतस्रस्तु लोकसंस्थितिहेतवः॥' इति कामन्दकः। निरूढिमागता प्रसिद्धिं गता। अतएव विवेकिनी सदसद्विवेकवती। यथाह मनुः—'आन्वीक्षिक्यां तु विज्ञानं धर्माधर्मौ त्रयीस्थितौ। अर्थानर्थौ तु वार्तायां दण्डनीत्यां नयानयौ॥' इति। ते मतिः कथं करिणी पङ्कमिव विपर्ययं वैपरीत्यमविवेकरूपमेत्यावसीदति नश्यति। तन्न युक्तमिति भावः॥

किं नश्छिन्नमिदानीं येनेत्थमुपालभ्येमहीत्यत्राह—

विधुरं किमतःपरं परै-
रवगीतां गमिते दशामिमाम्।

अवसीदति यत्सुरैरपि
त्वयि संभावितवृत्ति पौरुषम् ॥ ७ ॥

विधुरमिति ॥ त्वयि परैः शत्रुभिरिमामीदृशीमवगीतां गर्हिताम् । 'अवगीतं तु निर्वादे मुहुर्दृष्टे च गर्हिते' इति विश्वः । दशां गमिते प्रापिते सति । सुरैरपि संभावितवृत्ति बहुकृतप्रसारम् । अथवा निश्चितसद्भावम् । पौरुषं पुरुषकारः । युवादित्वादण्प्रत्ययः । अवसीदति नश्यतीति यत् । अतःपरं अतोऽन्यदधिकं किं विधुरं किं कष्टम् । न किंचिदित्यर्थ. । 'विधुरं प्रत्यवाये स्यात्कष्टविश्लेषयोरपि' इति वैजयन्ती । अस्तीति शेषः । अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्ति' इति भाष्यकारः । भवन्तीति लटः पूर्वाचार्याणां संज्ञा । यद्वा पुरुषाधिकारस्य दुर्दशा सा च शत्रुकृता । तदुपरि महत्कष्टं तच्च त्वदुपेक्षयेत्युपालभ्यस इत्यर्थः ॥

अथोपेक्षाकालत्वादियमुपेक्षेत्याशङ्क्य नायमुपेक्षाकाल इति वक्तुं तदेव तावच्छ्लोकद्वयेन विविनक्ति—

द्विषतामुदयः सुमेधसा
गुरुरस्वन्ततरः सुमर्षणः ।
न महानपि भूतिमिच्छता
फलसंपत्प्रवणः परिक्षयः ॥ ८ ॥

द्विषतामिति ॥ भूतिमुदयमिच्छता । शोभना

मेधा यस्य तेन सुमेधसा सुधिया। 'नित्यमसिच्प्रजामेधयोः' इत्यसिच्प्रत्ययः। गुरुर्महानप्यस्वन्ततरोऽस्यन्तदुरन्तः। क्षयोन्मुख इत्यर्थः। क्षिषतामुदयो वृद्धिः। सुखेन मृष्यत इति सुमर्षणः सुसहः। उपेक्ष्य इत्यर्थः। स्वन्तश्चेद्दुर्मर्षण इति भावः। 'भाषायां शासि–' इत्यादिना खलर्थे युच्प्रत्ययः। महानपि फलसंपत्प्रवणः फलसंपदुन्मुखः। 'प्रनिरन्तर्–' इत्यादिना णत्वम्। परिक्षयो न सुमर्षणः। नोपेक्ष्य इत्यर्थः। अन्यथा तूपेक्ष्य इति भावः। नह्युदय एव प्रतीकार्यो न च क्षय इत्येवोपेक्ष्यः। किंतु स्वन्तत्वास्वन्तत्वाभ्यामुभावपि प्रतीकार्यावुपेक्ष्यौ च भवत इत्यर्थः॥

अथोभयोरपि मध्य एकतरस्योदयक्षययोर्गतिमुक्त्वेदानीं युगपत्परिक्षयागमे गतिमाह–

अचिरेण परस्य भूयसीं
विपरीतां विगणय्य चात्मनः।
क्षययुक्तिमुपेक्षते कृती
कुरुते तत्प्रतिकारमन्यथा॥ ६॥

अचिरेणेति॥ कृतमनेनेति कृती। कुशल इत्यर्थः। 'इष्टादिभ्यश्च' इतीनिप्रत्ययः। परस्य शत्रोः क्षययुक्तिं क्षययोगमचिरेणाशुभाविनीं भूयसीं दुरन्तां च, तथात्मनः क्षययुक्तिं विपरीतां चिरभाविनीमल्पीयसीं च विगणय्य विचार्य। 'ल्यपि लघुपूर्वात्' इत्ययादेशः। उपेक्षते। अन्यथोक्तवैपरीत्ये। परस्य क्षययु-

क्षावल्पीयस्याम्, स्वस्य भूयस्यां च सत्यामित्यर्थः। तत्प्रतिकारं तस्याः क्षययुक्तेः प्रतिकारमचिरेणाशु कुरुते। एवं सति यदा शत्रोरभ्युदयः स्वस्य चातिपरिक्षयो यथास्माकं तदा किं वक्तव्यम्। सद्यः प्रतिकुरुत इत्यर्थात्सिद्धमनुसंधेयम्॥

तथाप्युपेक्षायामनिष्टमाचष्टे—

अनुपालयतामुदेष्यतीं
प्रभुशक्तिं द्विषतामनीहया।
अपयान्त्यचिरान्महीभुजां
जननिर्वादभयादिव श्रियः॥ १०॥

अनुपालयतामिति॥ उदेष्यतीं वर्धिष्यमाणाम्। 'आच्छीनद्योर्नुम्' इति विकल्पान्नुमभावः। द्विषतां प्रभुशक्तिं कोशदण्डजं तेजः। 'स प्रभावः प्रतापश्च यत्तेजः कोशदण्डजम्' इत्यमरः। अनीहयानुत्साहेनानुपालयतामुपेक्षमाणानां महीभुजां श्रियः संपदो जननिर्वादभयान्निकृष्टपुरुषानुरागोत्थलोकापवादभयादिवेति हेतूत्प्रेक्षा। अचिरादपयान्त्यपसरन्ति। यथाह कामन्दकः—'स्त्रीभिः षण्ढ इव श्रीभिरलसः परिभूयते' इति। अतः पराक्रमितव्यमित्यर्थः॥

ननु परिक्षीणः कथं प्रबलेनाभियुज्यत इत्यत्राह—

क्षययुक्तमपि स्वभावजं
दधतं धाम शिवं समृद्धये।

प्रणमन्त्यनपायमुत्थितं

प्रतिपच्चन्द्रमिव प्रजा नृपम् ॥ ११ ॥

क्षयेति ॥ क्षययुक्तमपि तथा क्षीणमपि सन्तं स्वभावजं सहजं शिवं सर्वलोकाह्लादकं धाम क्षात्रं तेजः प्रकाशं च दधतं समृद्धये वृद्ध्यर्थमुत्थितमुद्युक्तम् । वर्धिष्णुमित्यर्थः । नृपं प्रजाः । प्रतिपच्चन्द्रं द्वितीयाचन्द्रमिवेत्यर्थः । प्रतिपच्छब्देन द्वितीयाग्रहणम् । प्रतिपदि तस्यादृश्यत्वादिति । प्रणमन्ति । प्रह्वीभावेन वर्तन्त इति भावः । चन्द्रं तु नमस्कुर्वन्ति । क्षीणस्याप्युत्साहः कार्यसिद्धेर्निदानमित्यर्थः । 'जयं हि सततोत्साही दुर्बलोऽपि समश्नुते' इति कामन्दकः ॥

ननु प्रभुशक्तिशून्यस्योत्साहः कुत्रोपयुज्यत इत्यत्राह—

प्रभवः खलु कोशदण्डयोः

कृतपञ्चाङ्गविनिर्णयो नयः ।

स विधेयपदेषु दक्षतां

नियतिं लोक इवानुरुध्यते ॥ १२ ॥

प्रभव इति ॥ कर्मणामारम्भोपायः पुरुषद्रव्यसंपद्देशकालविभागो विनिपातप्रतीकारः कार्यसिद्धिश्चेति पञ्चाङ्गानि । यथाह कामन्दकः—'सहायाः साधनोपाया विभागो देशकालयोः । विनिपातप्रतीकारः सिद्धिः पञ्चाङ्गमिष्यते ॥' इति पञ्चानामङ्गानां

विनिर्णयः पञ्चाङ्गविनिर्णयः। 'तद्धितार्थ-' इत्यादिनोत्तरपदसमासः। कृतः पञ्चाङ्गविनिर्णयो यस्य येन वा स तथोक्तः। नयो नीतिः। मन्त्र इति यावत्। कोशोऽर्थराशिः। 'कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः' इत्यमरः। दण्डश्चतुरङ्गसैन्यम्। 'दण्डोऽस्त्री शासने राज्ञां हिंसायां लगुडे यमे। यात्राज्ञायां सैन्यभेदे' इति वैजयन्ती। तयोः कोशदण्डयोः। प्रभुशक्तेरित्यर्थः। प्रभवत्यस्मादिति प्रभवः कारणम्। 'ऋदोरप्'। स नयो विधेयपदेषु कार्यवस्तुषु। 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः। दक्षतां क्षिप्रकारित्वम्। उत्साहमित्यर्थः। लोकः कृष्यादिप्रवृत्तो जनः। नियतिं दैवमिव। 'नियतिर्नियमे दैवे' इति विश्वः। अनुरुध्यतेऽनुसरति। रुधेर्दैवादिकात्कर्तरि लट्। मन्त्रस्यापि मूलमुत्साहस्तन्मूलायाः प्रभुशक्तेर्मूलमिति किमु वक्तव्यम्। अतः स एवाश्रयणीयः। यतो नक्तंदिवं मन्त्रयत्नस्तस्यापि प्रभोर्निरुत्साहस्य न किंचित्सिद्ध्यतीति॥

ननु सोत्साहस्यासहायस्य कथमर्थसिद्धिरित्यत आह—

अभिमानवतो मनस्विनः
प्रियमुच्चैःपदमारुरुक्षतः।
विनिपातनिवर्तनक्षमं
मतमालम्बनमात्मपौरुषम्॥ १३॥

अभिमानवत इति॥ अभिमानवतो मानधनस्य। प्रियमिष्टमुच्चैरुन्नतं पदं स्थानं राज्यादिकमारुरुक्षत आरोढुमिच्छतः प्राप्तुकामस्य। मनस्विनो धीरस्यात्मपौरुषं स्वपुरुषकार एव विनिपातनिवर्तनक्षममनर्थप्रतीकारसमर्थमालम्बनं सहकारि मतमिष्टम्। यथा कस्यचित्तुङ्गमारोहतः किंचित्पतनप्रतिबन्धकमनुचरहस्तादिकमालम्बनं तद्वदिति ध्वनिः। किं पौरुषादन्यैः सहायैः शूराणामिति भावः॥

पौरुषानङ्गीकारे दोषमाह—

विपदोऽभिभवन्त्यविक्रमं
रहयत्यापदुपेतमायतिः।
नियता लघुता निरायते-
रगरीयान्न पदं नृपश्रियः॥ १४॥

विपद इति॥ अविक्रमं पौरुषहीनं विपदोऽभिभवन्त्याक्रामन्ति। आपदुपेतं विपन्नमायतिरुत्तरकालः। 'उत्तरः काल आयतिः' इत्यमरः। रहयति त्यजति। निरायतेः। आसन्नक्षयस्येत्यर्थः। लघुता गौरवं नियतावश्यंभाविनी। न कश्चिदेनमाद्रियत इत्यर्थः। अगरीयांल्लघीयान्नृपश्रियो राजलक्ष्म्याः पदमास्पदं न भवति। यद्वा नृपेति पदच्छेदः। तस्मात्पौरुषं कर्तव्यमेवेत्यर्थः। अत्र पूर्वपूर्वस्याविक्रमत्वादेरुत्तरोत्तरविपदादिकं प्रति कारणत्वात्कारणमालाख्योऽलंकारः। तथा सूत्रम्—'पूर्वपूर्वस्योत्तरोत्तरहेतुत्वे कारणमाला' इति॥

फलितमाह—

तदलं प्रतिपक्षमुन्नते-
रवलम्ब्य व्यवसायवन्ध्यताम् ।
निवसन्ति पराक्रमाश्रया
न विषादेन समं समृद्धयः ॥ १५ ॥

तदिति ॥ तत्तस्मात् । उपेक्षायां दोषसंभवादित्यर्थः । उन्नतेरभ्युदयस्य प्रतिपक्षमन्तरायं व्यवसायवन्ध्यतामुद्योगशून्यतामवलम्ब्यालम् । अवलम्बनं नालमित्यर्थः । 'अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा' इति क्त्वाप्रत्ययः । तस्य ल्यबादेशः । तथाहि पराक्रम आश्रयः कारणं यासां तास्तथोक्ताः समृद्धयः संपदो विषादेन समननुत्साहेन सह न निवसन्ति । पौरुषसाध्याः संपदो नानुत्साहसाध्याः । उभयोः सहावस्थानविरोधादित्यर्थः । वैधर्म्येण कार्यकारणरूपोऽर्थान्तरन्यासः ॥

ननु समयः प्रतीक्ष्यते, किं वेगेनेत्यत्राह—

अथ चेदवधिः प्रतीक्ष्यते
कथमाविष्कृतजिह्मवृत्तिना ।
धृतराष्ट्रसुतेन सुत्यजा-
श्चिरमास्वाद्य नरेन्द्रसम्पदः ॥ १६ ॥

अथेति ॥ अथावधिः कालः प्रतीक्ष्यते चेत् । 'अवधिस्त्ववधाने स्यात्सीम्नि काले बिलेऽपि च' इति

विश्वः। आविष्कृतजिह्मवृत्तिना प्रकटितकपटव्यवहारेण धृतराष्ट्रसुतेन दुर्योधनेन नरेन्द्रसंपदो राज्यसम्पदः। नरेन्द्रेति वा पदच्छेदः। चिरं चतुर्दशवर्षाण्यास्वाद्यानुभूय कथं सुत्यजाः। ज्ञातास्वादेन तेन पश्चादपि सुखेन युद्धक्लेशं विना न त्यक्ष्यन्त एवेत्यवधिप्रतीक्षणं व्यर्थमित्यर्थः॥

अथवा तदा दैववशात्स्वयमेव संपदो दास्यति चेत्तथापि तत्कथं रोचयेमहीत्याह—

द्विषता विहितं त्वयाथवा
यदि लब्धा पुनरात्मनः पदम्।
जननाथ तवानुजन्मनां
कृतमाविष्कृतपौरुषैर्भुजैः॥ १७॥

द्विषतेति॥ अथवा द्विषता विहितं पुनः प्रत्यर्पितमात्मनः पदं राज्यं त्वया लब्धा लप्स्यते यदि। लभेः कर्मणि लुट्। हे जननाथ, तवानुजन्मनामनुजानामाविष्कृतपौरुषैः प्रकटितपराक्रमैर्भुजैः कृतमलम्। अस्मद्भुजैर्न किंचित्साध्यमित्यर्थः। राज्यदानादानयोर्द्विषतामेव स्वातन्त्र्येऽस्मद्भुजवैफल्यात्। 'क्षत्रियस्य विजितव्यम्' इति शास्त्रात् क्षात्रेणैव राज्यं ग्राह्यमिति भावः। कृतमिति प्रतिषेधार्थमव्ययं चादिषु पठ्यते 'कृतमिति निवारणनिषेधयोः' इति गणव्याख्याने। भुजैरिति गम्यमानसाधनक्रियापेक्षया करणत्वात्तृतीया। उक्तं च न्यासोद्योते—'न

केवलं श्रूयमाणैव क्रिया निमित्तं कारकभावस्यापि तु गम्यमानापि' इति ॥

ननु साम्नैव कार्यसिद्धौ किं चात्रेण। यथाह मनुः—'साम्ना दानेन भेदेन समस्तैरथवा पृथक्। विजेतुं प्रयतेतारीन्न युद्धेन कदाचन ॥' इति। तत्किमाग्रहेणेत्याशङ्क्याह—

मदसिक्तमुखैर्मृगाधिपः
करिभिर्वर्तयते स्वयं हतैः।
लघयन्खलु तेजसा जगन्
न महानिच्छति भूतिमन्यतः ॥ १८ ॥

मदेति ॥ मृगाधिपः सिंहो मदसिक्तमुखैः। मदवर्षिभिरित्यर्थः। स्वयं स्वेनैव हतैः करिभिर्वर्तयते वृत्तिं करोति। तैरेव जीवतीत्यर्थः। चौरादिकाद् वृतेर्लट्। भौवादिकस्य तु 'अणावकर्मकाच्चित्तवत्कर्तृकात्' इति परस्मैपदनियमादिति। तथाहि। तेजसा प्रभावेण। 'तेजो बले प्रभावे च ज्योतिष्यर्चिषि रेतसि' इति वैजयन्ती। जगल्लघयँल्लघूकुर्वन्महांस्तेजस्व्यन्यतोऽन्यस्मात्पुरुषाद्भूतिं वृद्धिं नेच्छति खलु। नहि तेजस्विनः परायत्तवृत्तित्वं युक्तम्। मनुवचनं त्वशूरविषयमिति भावः। विशेषेण वक्ष्यमाणसामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥

ननु युद्धात्पाक्षिको लाभः, उपायान्तरैस्तु न तथेत्याशङ्क्याह—

अभिमानधनस्य गत्वरै-
रसुभिः स्थास्नु यशश्चिचीषतः ।
अचिरांशुविलासचञ्चला
ननु लक्ष्मीः फलमानुषङ्गिकम् ॥ १९ ॥

अभिमानेति ॥ अभिमानधनस्य वैरनिर्यातनमात्रनिष्ठस्य । अतएव गत्वरैर्गमनशीलैरस्थिरैः । 'गत्वरश्च' इति करबन्तो निपातः । असुभिः प्राणैः करणैः । 'पुंसि भूम्न्यसवः प्राणाः' इत्यमरः । स्थास्नु स्थिरम् । 'ग्लाजिस्थश्च ग्स्नुः' इति ग्स्नुप्रत्ययः । यशश्चिचीषतश्चेतुं संग्रहीतुमिच्छतः । चिनोतेः सन्नन्ताच्छतृप्रत्ययः । अचिरमंशवो यस्याः साचिरांशुर्विद्युत्तस्या विलासः स्फुरणं तद्वच्चञ्चला । क्षणिकेत्यर्थः । लक्ष्मीः संपदनुषङ्गादागतमानुषङ्गिकमन्वाचयशिष्टमल्पं फलम् । मानत्राणजं यश एव मुख्यं फलमभ्युच्चयं तु लक्ष्मीरिति मानिनामिदमेव श्लाघ्यमित्यर्थः । अत्रास्थिरप्राणत्यागेन स्थिरयशःस्वीकाराभिधानान्न्यूनाधिकाविनिमयाख्यः परिवृत्त्यलंकारः । तदुक्तं काव्यप्रकाशे—'परिवृत्तिर्विनिमयो योऽर्थानां स्यात्समासमैः' इति ॥

नन्वल्पस्य मानस्य हेतोः कथं प्राणत्यागः शक्यते कर्तुम्, यतः 'जीवन्नरो भद्रशतानि पश्यत्' इत्याशङ्क्याह—

ज्वलितं न हिरण्यरेतसं
चयमास्कन्दति भस्मनां जनः ।

अभिभूतिभयादसूनतः
सुखमुज्झन्ति न धाम मानिनः ॥ २० ॥

ज्वलितमिति ॥ जनो भस्मनां चयं पुञ्जमास्कन्दति पादादिनाक्रमति । अदाहकत्वादिति भावः । ज्वलितं ज्वलन्तम् । कर्तरि क्तः । 'मतिबुद्धि—' इत्यादिसूत्रे चकारात्कर्तमानार्थत्वम् । हिरण्यं रेतो यस्य तं हिरण्यरेतसमग्निं नास्कन्दति । दाहकत्वादिति भावः । अतो हेतोर्मानिनोऽभिभूतिभयात्प्राणलाभेन तेजस्त्यागे पराभवो भविष्यतीति भयादसूनेव सुखमक्लिष्टमुज्झन्ति त्यजन्ति । धाम तेजस्तु नोज्झन्ति । मानहानिकराज्जीवनात्स्वतेजसा मरणमेव वरमित्यर्थः । पूर्वतरश्लोकवदर्थान्तरन्यासः ॥

अथवा किमत्र प्रयोजनचिन्तया । किंतु तेजस्विनामयं स्वभाव एव यज्जिगीषुत्वमित्याशयेनाह—

किमपेक्ष्य फलं पयोधरा-
न्ध्वनतः प्रार्थयते मृगाधिपः ।
प्रकृतिः खलु सा महीयसः
सहते नान्यसमुन्नतिं यया ॥ २१ ॥

किमिति ॥ मृगाधिपः सिंहः किं फलं प्रयोजनमपेक्ष्य ध्वनतो गर्जतः । धरन्तीति धराः । पचाद्यच् । पयसां धरास्तान्पयोधरान्मेघान्प्रार्थयतेऽभियाति । 'याच्ञायामभियाने च प्रार्थना कथ्यते बुधैः' इति केशवः । यद्वाविरुणद्धीत्यर्थः । प्रा अर्थयते । प्रा स्या-

ग्रहणावरोधयोः' इत्यभिधानात्प्रा अवरोधेन। प्रा इति तृतीयान्तम्। आकारान्तस्य प्राशब्दस्य योगविभागात् 'आतो धातोः' इत्यालोपः। तथाहि। महीयसो महत्तरस्य सा प्रकृतिः खलु यया प्रकृत्यान्यसमुन्नतिं परवृद्धिं न सहते। महतः परभञ्जनमेव पुरुषार्थ इत्यर्थः। पूर्ववदलंकारः॥

निगमयति—उक्तार्थोपसंहरणं निगम उच्यते।

कुरु तन्मतिमेव विक्रमे
नृप निर्धूय तमः प्रमादजम्।
ध्रुवमेतदवेहि विद्विषां
त्वदनुत्साहहता विपत्तयः॥ २२॥

कुरु तदिति॥ हे नृप, तत्तस्मादुक्तरीत्या पराक्रमोत्साहयोर्हेतुत्वाद्धेतोः। 'यत्तद्यतस्ततो हेतौ' इत्यमरः। प्रमादजं तमो मोहं निर्धूय निरस्य विक्रमे पौरुष एव मतिं कुरु। विक्रममेवाङ्गीकुरु, न तूपायान्तरमित्यर्थः। न च विक्रमवैफल्यशङ्का कार्येत्याह—ध्रुवमिति। विद्विषां विपत्तयस्त्वदनुत्साहहतास्तवानुत्साहेनाव्यवसायेन हताः प्रतिबद्धाः। अन्यथा प्रागेव विपद्येरन्निति भावः। इत्येतद् ध्रुवं निश्चितमवेहि विद्धि। 'ध्रुवं नित्ये निश्चिते च' इति शाश्वतः॥

न च नः पराजयशङ्का कार्येत्याह——

द्विरदानिव दिग्विभावितां-
श्चतुरस्तोयनिधीनिवायतः।

प्रसहेत रणे तवानुजा-
न्द्विषतां कः शतमन्युतेजसः ॥ २३ ॥

द्विरदानिति ॥ दिग्विभावितान्दिक्षु प्रसिद्धां-स्तानायत आगच्छतः। आङ्पूर्वादिणधातोः शतृ-प्रत्ययः। चतुरो द्विरदान्दिग्गजानिव, तथोक्तविशे-षणांश्चतुरस्तोयनिधीनिव, रण आयतो दिग्विभा-विताञ्छतमन्युतेजस इन्द्रविक्रमांश्चतुरस्तवानुजा-न्द्विषतां मध्ये कः प्रसहेत। सोढुं शक्नुयादित्यर्थः। 'शकि लिङ् च' इति शक्यार्थे लिङ्। अतो निःश-ङ्कं प्रवर्तस्वेति भावः ॥

आशीर्वादव्याजेन फलितमाह—

ज्वलतस्तव जातवेदसः
सततं वैरिकृतस्य चेतसि।
विदधातु शमं शिवेतरा
रिपुनारीनयनाम्बुसंततिः ॥ २४ ॥

ज्वलत इति ॥ तव चेतसि सततं ज्वलतो वै-रिकृतस्य जातवेदसः। क्रोधाग्नेरित्यर्थः। शिवेतराऽ-शिवामङ्गला। वैधव्यदुःखजनकत्वादिति भावः। रिपुनारीनयनाम्बुसंततिर्वैरिवनिताश्रुप्रवाहः शमं विदधातु। वैरिकृतस्य क्रोधस्य वैरिवधमन्तरेण शा-न्त्यसंभवादवश्यं तद्वधस्त्वया कर्तव्य इत्यर्थः। क्रो-धस्य विषयस्य निगरणेन विषयिणो जातवेदस ए-वोपनिबन्धादतिशयोक्तिरलंकारः। तदुक्तम्—'वि-

षयस्यानुपादानाद्विषयुपनिबध्यते। यत्र सातिशयोक्तिः स्यात्कवेः प्रौढोक्तिजीविता ॥' इति। तत्रापि क्रोधस्य जातवेदसो भेदेऽप्यभेदाध्यवसायाद्भेदेऽपि भेदरूपा। तत एवाम्बुनिर्वाप्यत्वोक्तिश्च घटते। तथा च यथाम्बुसेकेनाग्निः शाम्यति तथा शत्रुवधेन क्रोध इत्यौपम्यं गम्यते ॥

इति दर्शितविक्रियं सुतं
मरुतः कोपपरीतमानसम्।
उपसान्त्वयितुं महीपति-
र्द्विरदं दुष्टमिवोपचक्रमे ॥ २५ ॥

इतीति ॥ इत्युक्तरीत्या दर्शिता विक्रिया विकारो वागारम्भात्मको येन तं कोपपरीतमानसं कोपाक्रान्तचित्तम्। इदं विशेषणद्वयं द्विरदेऽपि योज्यम्। मरुतः सुतं भीमं महीपतिर्युधिष्ठिरो दुष्टं द्विरदमिव। एतेन भीमस्य शौर्यमेव, न बुद्धिरस्तीति गम्यते। उपसान्त्वयितुमनुनेतुमुपचक्रमे प्रवृत्तः। 'प्रोपाभ्यां समर्थाभ्याम्' इत्यात्मनेपदम्। राज्ञा तावदुपकारविशेषापेक्षया कथंचिदवशो जनः शनैः शनैर्द्विरदवद्वशीकरणीयः, न तु त्याज्य इति भावः ॥

प्रथमं तावत्स्तुत्यादिभिः प्रसादयति—

अपवर्जितविप्लवे शुचौ
हृदयग्राहिणि मङ्गलास्पदे।

विमला तव विस्तरे गिरां
मतिरादर्श इवाभिदृश्यते ॥ २६ ॥

अपवर्जितेति ॥ विप्लवः प्रमाणबाधः । अन्यत्र बाह्यमलसंक्रमः । सोऽपवर्जितो यस्य तस्मिन्नपवर्जितविप्लवे । शुचौ । सौशब्द्यं लोकशुद्धिश्च शुचित्वम् । तद्वतीत्यर्थः । अतएव हृदयग्राहिणि मनोरमे मङ्गलास्पदे । एकत्र हितार्थप्रतिपादकत्वादन्यत्र मङ्गलवस्तुत्वाच्च श्रेयस्करे । 'रोचनं चन्दनं हेम मृदङ्गं दर्पणं मणिम् । गुरूनग्निं तथा सूर्यं प्रातः पश्येत्सदा बुधः ॥' इति पुराणवचनात् । तव गिरां विस्तरे वाक्प्रपञ्चे । 'प्रथने वावशब्दे' इति घञ्प्रतिषेधात् 'ऋदोरप्' इत्यप् । अतएव 'विस्तारो विग्रहो व्यासः स तु शब्दस्य विस्तरः' इत्यमरः । मतिस्त्वद्बुद्धिरादर्शो दर्पण इव । 'दर्पणे मुकुरादर्शौ' इत्यमरः । विमला विशदाभिदृश्यते । वाग्वैशद्यादेव मतिवैशद्यमनुमीयते । तत्पूर्वकत्वात्तस्येत्यर्थः ॥

अथ युग्मेनाह—

स्फुटता न पदैरपाकृता
न च न स्वीकृतमर्थगौरवम् ।
रचिता पृथगर्थता गिरां
न च सामर्थ्यमपोहितं क्वचित् ॥ २७ ॥

स्फुटतेति । उपपत्तिरिति च ॥ पदैः सुप्तिङन्तशब्दैः स्फुटता विशदार्थता नापाकृता न त्यक्ता । अर्थगौर-

वमर्थभूयस्त्वं च न न स्वीकृतम् । स्वीकृतमेवेत्यर्थः । वैशद्यप्रसक्तार्थगौरवाभावनिवर्तनार्थं नञ्द्वयम् । 'संभाव्यनिषेधनिवर्तने द्वौ प्रतिषेधौ' इति वामनः । गिरां पदानामवान्तरवाक्यानां च पृथगर्थता भिन्नार्थता । अपुनरुक्तार्थतेति यावत् । रचिता कृता । तथा क्वचिदपि सामर्थ्यं गिरामन्योन्यसाकाङ्क्षत्वं नापोहितं न वा वर्जितम् । अन्यथा दशदाडिमादिशब्दवदेकवाक्यता न स्यात् । यथाहुः—'अर्थैकत्वादेकं वाक्यं सापेक्षा चेद्विभागे स्यात्' इति । नन्वर्थगौरवमित्यत्र कथं षष्ठीसमासः । 'पूरणगुण—' इत्यादिना प्रतिषेधात् । नैष दोषः । ये शुक्लादयः शब्दा गुणे गुणिनि च वर्तन्ते । यथा पटस्य शौक्ल्यं शुक्लः पट इति च तेषामेवात्र निषेधात् । ये पुनः स्वतो गुणमात्रवचना यथा गौरवं प्राधान्यं रसो गन्धः स्पर्श इत्येवमादयः तेषामनिषेधात् । तथा 'तत्स्थैश्च गुणैः षष्ठी समस्यते' इति वचनाद्बहुलमभियुक्तप्रयोगदर्शनाच्च । बलाकायाः शौक्ल्यमित्यादौ तु भाष्यकारवचनादसमासः । अत एवाह वामनः—'पत्रपीतिमादिषु गुणवचनसमासो बालिश्यात्' इति ॥

उपपत्तिरुदाहृता बला-
दनुमानेन न चागमः क्षतः ।
इदमीदृगनीदृगाशयः
प्रसभं वक्तुमुपक्रमेत कः ॥ २८ ॥

उपपत्तिरिति ॥ किंच बलाद्बलमाश्रित्य । कर्मणि ल्यब्लोपे पञ्चमी वक्तव्या । उपपत्तिर्युक्तिरुदाहृता । पराक्रमपक्ष एव श्रेयानिति युक्तिरुक्तेत्यर्थः । उचितं चैतन्महावीरस्येति भावः । तथानुमानेन युक्त्यागमः शास्त्रं च न क्षतो न हतः । किंत्वागमाविरुद्धमेवोक्तम् । अन्यथा तद्विरोधादनुमानस्यैव प्रामाण्यभङ्गप्रसङ्गादिति भावः । ईदृगित्थं क्षात्रयुक्तमिदं वचनमविद्यमान ईदृगाशय इत्थं क्षात्रयुक्ताभिप्रायो यस्य सोऽनीदृगाशयः । 'अभिप्रायश्छन्द आशयः' इत्यमरः । कः प्रसभं हठाद्वक्तुमुपक्रमेत । न कोऽपीत्यर्थः । इत्थं वक्तुमुपक्रमितैव नास्ति । वक्ता तु दूरापास्त एवेति भावः । केचिदेतच्छ्लोकत्रयं निन्दापरत्वेनापि योजयन्ति । तदसत् । हितोपदेशमात्रतत्परस्यातिवत्सलस्य राज्ञो मत्सरिण इव महावीरे भ्रातरि विधेये सर्वानर्थमूलभूतनिन्दातात्पर्यकल्पनानौचित्यादिति ॥

यदि साधूक्तं तर्हि तथैव क्रियतामित्याशङ्क्याह—

अवितृप्ततया तथापि मे
हृदयं निर्णयमेव धावति ।
अवसाययितुं क्षमाः सुखं
न विधेयेषु विशेषसंपदः ॥ २९ ॥

अवितृप्ततयेति ॥ तथापि त्वया सम्यङ्निर्णीतेऽपि मे हृदयमवितृप्ततयासंतुष्टतया अद्यापि संशय-

गतत्वेनेत्यर्थः । निर्णयमेव धावत्यनुसरति । अपेक्षत इति यावत् । अद्यापि निर्णयस्यानुदयादिति भावः। निर्णयानुदये हेतुमाह--अवेति । विधेयेषु संधिविग्रहादिकर्तव्यार्थेषु या विशेषसंपदोऽवान्तरभेदभूमानस्ताः सुखमक्लेशेनावसाययितुम् । पुरुषान्तरस्यानुकूल्येन स्वस्वरूपं स्वयमेव शीघ्रं प्रत्याययितुमित्यर्थः । स्यतेर्ण्यन्तादाप्ति कर्मकर्तृकात्तुमुन् । शेरणादिसूत्रस्यायं विषयः । क्षमन्त इति क्षमाः । पचाद्यच् । शक्ता न भवन्ति । 'क्षमं शक्ते हिते त्रिषु' इत्यमरः । विधेयमात्रस्य सुगमत्वेऽपि तद्विशेषाणां सौक्ष्म्याद्बाहुल्याच्च दुर्ज्ञेयत्वादद्यापि निर्णयाकाङ्क्षेति तात्पर्यार्थः । अत्र निर्णयधावनं प्रत्युत्तरवाक्यार्थस्य हेतुत्वाभिधानाद्वाक्यार्थहेतुकं काव्यलिङ्गमलंकारः । तदुक्तम्—'हेतोर्वाक्यपदार्थत्वे काव्यलिङ्गमुदाहृतम्' इति ॥

वस्तुविशेषावधारणमन्तरेणैव प्रवृत्तिरित्याशङ्क्याह—

सहसा विदधीत न क्रिया-
मविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव संपदः ॥ ३० ॥

सहसेति ॥ क्रियत इति क्रियां कार्यं सहसा । अविमृश्येत्यर्थः 'सहसेत्याकस्मिकाविमर्षयोः' इति गणव्याख्याने स्वरादिपाठादव्ययम् । न विदधीत न

कुर्वीत । कुतः । अविवेकोऽविमृष्यकारित्वं परमत्यन्तमापदां पदं स्थानम् । कारणमित्यर्थः । व्यतिरेकेणोक्तमर्थमन्वयेनाह—वृणत इति । गुणलुब्धा गुणगृध्नव इति स्वयंवरहेतूक्तिः । संपदः श्रियः । विमृष्य करोतीति विमृष्यकारी । 'उपपदमतिङ्' इति समासः । तं स्वयमेव वृणते भजन्ते हि । 'वृङ् संभक्तौ' इति धातुः । तस्माद्विमृष्यैव प्रवर्तितव्यमित्यर्थः । अत्र सहसा विधाननिषेधलब्धाविमृष्यकारित्वरूपकारणस्यापद्रूपव्यतिरेककार्येण समर्थनाद्वैधर्म्येणार्थान्तरन्यासः । द्वितीयार्धेन च स एव साधर्म्येणेति ज्ञेयम् ॥

ननु साहसिकस्यापि फलसिद्धिर्दृश्यत एव । तत्किं विवेकेनेत्यत्राह----

अभिवर्षति योऽनुपालयन्
विधिबीजानि विवेकवारिणा ।
स सदा फलशालिनीं क्रियां
शरदं लोक इवाधितिष्ठति ॥ ३१ ॥

अभीति ॥ यः पुमान् । विधीयन्त इति विधयः कृत्यवस्तूनि बीजानीवेत्युपमितसमासः । शरदं लोक इवेति वाक्यगतोपमानुसारात् । तानि विधिबीजानि । विवेको वारीव तेन विवेकवारिणा । पूर्ववत्समासः । अनुपालयन्प्रतीक्षमाणः संरक्षन्नभिवर्षति सिञ्चति । स पुमान् । फलं साधननिष्पाद्योऽर्थः, सस्यं

च । 'सस्ये हेतुकृते फलम्' इत्युभयत्राप्यमरः । तच्छा-लिनीं क्रियां कर्म लोको जनः । 'लोकस्तु भुवने जने' इत्यमरः । शरदमिव सदा नित्यमधितिष्ठति । सदा क्रियाफलं प्राप्नोत्येव । न कदाचिद्व्यभिचरतीत्यर्थः । साहसिकस्य काकतालीयन्यायेन फलसिद्धिर्विवेकिनस्तु नियतेति भावः । अत्र फलशब्देन सस्यहेतुकृतयोरर्थयोरभेदाध्यवसायाच्छ्लेषमूलातिशयोक्तिस्तदनुगृहीता चोपमेत्यनुसंधेयम् ॥

नियता विवेकिनः फलसिद्धिरित्युक्तम् । संप्रति तामेव रुच्यर्थं स्तौति—

शुचि भूषयति श्रुतं वपुः
प्रशमस्तस्य भवत्यलंक्रिया ।
प्रशमाभरणं पराक्रमः
स नयापादितसिद्धिभूषणः ॥ ३२ ॥

शुचीति ॥ शुचि संप्रदायशुद्धं श्रुतं शास्त्रश्रवणं कर्तृ वपुर्भूषयति । अन्यथाऽविद्वान्पुरुषः शोच्य इति भावः । तस्य श्रुतस्य प्रशमः क्रोधोपशान्तिरलंक्रिया भूषणं भवति । अन्यथा श्रुतवैफल्यादिति भावः । पराक्रमः सत्यवसरे शौर्यं प्रशमस्याभरणं भवति । अन्यथा सर्वैः परिभूयत इति भावः । स पराक्रमः । नयापादिता नीतिसंपादिता । विवेकपूर्विकेति यावत् । सा चासौ सिद्धिश्च सैव भूषणं यस्य स तथोक्तः । अन्यथा साहसिकस्य सिद्धेः काकतालीयत्वेन पक्षे पराक्रमवैयर्थ्यं स्यादिति भावः । 'वपुषो भूष्यतैवात्र

सिद्धेर्भूषणतैव तु। उभयं मध्यमानां तु तेषां पूर्वोक्तरेच्छया ॥' इति विवेकः। एवंविशिष्टसिद्धेरनन्यभूषितायाः एव भूषणत्वोक्त्या सर्वोत्तरतया स्तुतिर्गम्यते। अत्रोत्तरोत्तरस्य पूर्वपूर्वविशेषणत्वादेकावल्यलंकारः। तदुक्तम्—'यत्र विशेषणभावं पूर्वं पूर्वं प्रति क्रमेणैव। भजति परं परमेषालंकृतिरेकावली कथिता ॥' इति ॥

विमृश्य कुर्यादिति स्थितम्। तत्र विमर्शोपायः क इत्युक्ते शास्त्रमेवेत्याह—

मतिभेदतमस्तिरोहिते
गहने कृत्यविधौ विवेकिनाम्।
सुकृतः परिशुद्ध आगमः
कुरुते दीप इवार्थदर्शनम् ॥ ३३ ॥

मतीति ॥ मतिभेदः कार्यविप्रतिपत्तिः। मतिभेदस्तम इवेत्युपमितसमासः। दीप इवेत्युपमानुसारात्। तेन तिरोहित आच्छन्नेऽतएव गहने दुरवगाहे कृत्यविधौ कार्यानुष्ठाने विवेकिनां सुकृतः सदभ्यस्तोऽतएव परिशुद्धो निश्चितोऽन्यत्र सुविहितः प्रवातादिदोषरहितश्च आगमः शास्त्रम्। 'आगमः शास्त्र आयाते' इति विश्वः। दीप इवार्थदर्शनं कार्यज्ञानं वस्तुप्रतिभासनं च कुरुते ॥

एवं विमृश्य कुर्वतो दैवादनर्थागमोऽपि न कश्चिदपराध इत्याह—

स्पृहणीयगुणैर्महात्मभि-
श्चरिते वर्त्मनि यच्छतां मनः ।
विधिहेतुरहेतुरागसां
विनिपातोऽपि समः समुन्नतेः ॥३४॥

स्पृहणीयेति ॥ स्पृहणीयगुणैर्लोकश्लाघ्यगुणैर्महात्मभिः सज्जनैश्चरितेऽनुष्ठिते वर्त्मन्याचारे मनो यच्छतां निदधताम् । सन्मार्गेण व्यवहरतामित्यर्थः । विधिहेतुर्दैवनिमित्तकः । 'विधिर्विधाने दैवे च' इत्यमरः । अतएवागसामपराधानामहेतुर्विनिपातो दैविकानर्थोऽपि । 'विनिपातोऽवपातं स्याद्दैवादिव्यसनेऽपि च' इति विश्वः । समुन्नतेरातिवृद्धेः समस्तुल्यः । दैविकेषु पुरुषस्यानुपालभ्यत्वादिति भावः । यथाह कामन्दकः— 'यत्तु सम्यगुपक्रान्तं कार्यमेति विपर्ययम् । पुरुषस्त्वनुपालभ्यो दैवान्तरितपौरुषः ॥' इति ॥

संप्रति यद्विमृश्यं तदाह—

शिवमौपयिकं गरीयसीं
फलनिष्पत्तिमदूषितायतीम् ।
विगणय्य नयन्ति पौरुषं
विजितक्रोधरया जिगीषवः ॥ ३५ ॥

शिवमिति ॥ जिगीषवो विजयेच्छवो नृपा विजितक्रोधरया जितक्रोधवेगाः सन्तो गरीयसीं प्रभूतामदूषितायतीमक्षतोत्तरकालाम् । स्वन्तामित्यर्थः ।

फलनिष्पत्तिं फलसिद्धिं विगणय्य । फलवत्त्वं निश्चित्येत्यर्थः । पौरुषं पुरुषकारं शिवमनुकूलमौपायिकमुपायम् । विनयादित्वात्स्वार्थे ठक् । उपायाद्ध्रस्वत्वं च । नयन्ति प्रापयन्ति । पौरुषमुपायेन योजयन्तीत्यर्थः । नानिश्चितफलं कर्म कुर्वत इति भावः । यथाह कामन्दकः—'निष्फलं क्लेशबहुलं संदिग्धफलमेव च । न कर्म कुर्यान्मतिमान्सदा वैरानुबन्धि च ॥' इति । नयतिः प्रापणार्थे द्विकर्मकः । अत्र पौरुषस्य कर्तृस्थकर्मत्वेऽप्युपायस्यातथात्वात्क्रोधं विनयत इत्यादिवत् 'कर्तृस्थे चाशरीरे कर्मणि' इत्यात्मनेपदं न भवति ॥

यदुक्तं विजितक्रोधरया इति तदावश्यकमित्याह—

अपनेयमुदेतुमिच्छता
तिमिरं रोषमयं धिया पुरः ।
अविभिद्य निशाकृतं तमः
प्रभया नांशुमताप्युदीयते ॥ ३६ ॥

अपनेयमिति ॥ उदेतुमभ्युदेतुमिच्छता राज्ञा पुरः प्रथमं रोषमयं रोषादागतम् । 'मयट् च' । इति मयट् । तिमिरमज्ञानं धिया विवेकबुद्ध्या करणेनापनेयमपनोद्यम् । तथाहि । अंशुमतापि कर्त्रा प्रभया तेजसा करणेन निशाकृतं तमो ध्वान्तमविभिद्य नोदीयते । किंतु विभिद्यैवेत्यर्थः । सूर्यस्याप्येवं किमुतान्येषामित्यपिशब्दार्थः । इणो भावे लट् ॥

ननु दुर्बलस्यैवमस्तु । बलीयसस्तु क्रोधादेव कार्यसिद्धिरित्यत आह——

बलवानपि कोपजन्मन-
स्तमसो नाभिभवं रुणद्धि यः ।
क्षयपक्ष इवैन्दवीः कलाः
सकला हन्ति स शक्तिसंपदः ॥ ३७ ॥

बलवानिति ॥ बलवाञ्छूरोऽपि यः । कोपाज्जन्म यस्य तस्य कोपजन्मनः । 'अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः' इति वामनः । तमसो मोहस्य । कृद्योगात्कर्तरि षष्ठी । अभिभवमाक्रान्तिं न रुणद्धि न निवारयति । स नृपः । क्षयस्य पक्षः क्षयपक्षः कृष्णपक्ष ऐन्दवीरिन्दुसंबन्धिनीः कला इव । 'कला तु षोडशो भागः' इत्यमरः । सकलाः समग्राः शक्तिसंपदः प्रभुमन्त्रोत्साहशक्तीस्तिस्रोऽपि हन्ति नाशयति । अन्धस्य जंघाबलमिव क्रोधान्धस्य लोकोत्तरमपि सामर्थ्यं व्यर्थमेवेत्यर्थः । अत्र कालस्य सर्वकारणत्वात्क्षयपक्षस्य कलाक्षयकारित्वमस्त्येव । तमसस्तु तत्कालविजृम्भणात्तथा व्यपदेशः ॥

विमृष्य कुर्वतः क्रियाप्रकारमाह—

समवृत्तिरुपैति मार्दवं
समये यश्च तनोति तिग्मताम् ।
अधितिष्ठति लोकमोजसा
स विवस्वानिव मेदिनीपतिः ॥ ३८ ॥

समेति ॥ यः समा नातिमृदुर्नातितिग्मा वृत्तिर्यस्य स समवृत्तिः सन्समये सत्यवसरे मार्दवं मृदु-

वृत्तित्वमुपैति तिग्मतां तीक्ष्णवृत्तित्वं च तनोति। स मेदिनीपतिर्विवस्वानिव ओजसा तेजसा लोकमधितिष्ठत्याक्रामति। सूर्योऽपि ऋतुभेदेन समवृत्तिरित्यादि योज्यम् ॥

उक्तान्यथाकरणेऽनिष्टमाह—

क्व चिराय परिग्रहः श्रियां
क्व च दुष्टेन्द्रियवाजिवश्यता।
शरदभ्रचलाश्चलेन्द्रियै-
रसुरक्षा हि बहुच्छलाः श्रियः ॥ ३९ ॥

क्वेति ॥ श्रियां संपदां चिराय बहुकालं परिग्रहः स्वायत्तीकरणं क्व। इन्द्रियाणि वाजिन इवेति समासः। दुष्टानाममार्गधाविनामिन्द्रियवाजिनां वश्यो वशंगतस्तस्य भावस्तत्ता क्व। नोभयमेकत्र तिष्ठतीत्यर्थः। कुतः। हि यस्माच्छरदभ्रवच्चलाश्चञ्चलाः। किंच बहुच्छला बहुव्याजाः। बहुरन्ध्रा इति यावत्। 'छलं तु स्खलिते व्याजे' इति विश्वः। श्रियः संपदः चलेन्द्रियैरजितेन्द्रियैरसुरक्षा रक्षितुमशक्याः। कथंचित्प्राप्ता अपि श्रियो नाविनीतेषु तिष्ठन्तीत्यर्थः। वाक्यार्थहेतुकं काव्यलिङ्गमलंकारः ॥

क्रोधस्य दुष्टतामुक्त्वा तस्य त्यागमुपदिशति—

किमसामयिकं वितन्वता
मनसः क्षोभमुपात्तरंहसः।
क्रियते पतिरुच्चकैरपां
भवता धीरतयाधरीकृतः ॥ ४० ॥

किमिति ॥ उपात्तरंहसः प्राप्तत्वरस्य मनसः । समयोऽस्य प्राप्तः सामयिकः । 'समयस्तदस्य प्राप्तम्' इति ठञ् । स न भवतीत्यसामयिकस्तमप्राप्तकालं चोभं वितन्वता भवता धीरतया धैर्यगुणेन । 'मनसो निर्विकारत्वं धैर्यं सत्स्वपि हेतुषु' इति रसिकाः । अधरीकृतस्तिरस्कृतः प्रागिति शेषः । अपां पतिः समुद्रः किं किमर्थमुच्चकैरधिकः क्रियते । न पराजितं पुनरुच्चकैः कुर्यादिति भावः । अत्र वितन्वतेति भीमविशेषणत्वेन अपांपतिपदार्थस्योच्चैःकरणे हेतुत्वोक्त्या काव्यलिङ्गमलंकारः ॥

श्रुतमप्यधिगम्य ये रिपू-
न्विनयन्ते न शरीरजन्मनः ।
जनयन्त्यचिराय संपदा-
मयशस्ते खलु चापलाश्रयम् ॥ ४१ ॥

श्रुतमिति ॥ किंच । ये श्रुतं शास्त्रमधिगम्यापि शरीरजन्मनः शरीरप्रभवान्रिपून्कामक्रोधादीन्न विनयन्ते न नियच्छन्ति । 'कर्तृस्थे चाशरीरे कर्मणि' इत्यात्मनेपदम् । ते खल्वचिराय संपदां चापलाश्रयमस्थैर्यनिबन्धनमयशो दुष्कीर्तिं जनयन्ति । आश्रयदोषादस्थैर्यं संपदां न स्वदोषादित्यर्थः । अजितारिषड्वर्गस्य कुतः संपद इति भावः ॥

तथा क्रोधात्कार्यहानिरित्याशयेनाह—

अतिपातितकालसाधना
स्वशरीरेन्द्रियवर्गतापनी ।

जनवन्न भवन्तमक्षमा
नयसिद्धेरपनेतुमर्हति ॥ ४२ ॥

अतिपातितेति ॥ अतिपातितान्यतिक्रान्तानि कालः समयोऽनुरूपः साधनानि सहायादीनि यया सा तथोक्ता । तापयतीति तापनी । कर्तरि ल्युट् । टित्वान्ङीप् । स्वस्य यच्छरीरमिन्द्रियवर्गश्च तयोस्तापन्यक्षमा क्रोधो भवन्तं जनवत्पृथग्जनमिव । 'तेन तुल्यं—' इति वतिप्रत्ययः । तेनैवार्थो लक्ष्यते । 'तद्धितश्चासर्वविभक्तिः' इत्यव्ययम् । नयसिद्धेर्नयसाध्यफलादपनेतुं पृथक्कर्तुं नार्हति । असमयक्रोधस्यात्मसंतापातिरिक्तं फलं नास्तीत्यर्थः ॥

दुष्टः क्रोध इत्युक्तम् । अथ क्षमाया गुणानाह—

उपकारकमायतेर्भृशं
प्रसवः कर्मफलस्य भूरिणः ।
अनपायि निबर्हणं द्विषां
न तितिक्षासममस्ति साधनम् ॥ ४३ ॥

उपकारकमिति ॥ आयतेरुत्तरकालस्य भृशमत्यन्तमुपकारकम् । स्थिरफलहेतुरित्यर्थः । भूरिणः प्रभूतस्य कर्मफलस्य । प्रसूयतेऽनेनेति प्रसवः कारणम् । अपायि न भवतीत्यनपायि स्वयमविनश्वदेव द्विषां निबर्हणं विनाशकमेवंगुणकं साधनं तितिक्षासमं क्षमातुल्यं नास्ति । 'क्षान्तिः क्षमा तितिक्षा च' इत्यमरः । 'तिज निशाने' इति धातोः 'गुप्तिज्किद्भ्यः

सन्' इति क्षमार्थे सन्प्रत्ययः। तितिक्षासममित्यनुक्तोपमेया समास आर्थी लुप्तोपमा, भृशायत्यनपायिशब्दैः साधनान्तरवैलक्षण्याद्व्यतिरेकश्च व्यज्यते। भेदप्राधान्य उपमानादुपमेयस्याधिक्ये विपर्यये च व्यतिरेकः॥

ननु तितिक्षया कालक्षेपे दुर्योधनः सर्वान्राज्ञो वशीकुर्यादित्यत्राह—

प्रणतिप्रवणान्विहाय नः
सहजस्नेहनिबद्धचेतसः।
प्रणमन्ति सदा सुयोधनं
प्रथमे मानभृतां न वृष्णयः॥ ४४॥

प्रणतीति॥ सहजस्नेहेनाकृत्रिमप्रेम्णा निबद्धचेतसोऽस्मासु गाढं लग्नचित्ताः। सुयोधने तु न तथेति भावः। किं च मानभृतामहंकारिणां प्रथमेऽग्रेसराः। सुयोधनस्तु ततोऽपीति भावः। वृष्णयो यादवाः प्रणतिप्रवणान्प्रणामपरान्। सुयोधनस्तु न तथेति भावः। नोऽस्मान्विहाय सुयोधनं सदा न प्रणमन्ति न नमन्ति नानुसरन्ति। किंतु कार्यकाले त्यक्ष्यन्त्येवेत्यर्थः। सति यादवविग्रहे न किंचिदस्माकमसाध्यं भवेदिति भावः। अनेकपदार्थहेतुकं काव्यलिङ्गमलंकारः॥

सुहृदः सहजास्तथेतरे
मतमेषां न विलङ्घयन्ति ये।

विनयादिव यापयन्ति ते
धृतराष्ट्रात्मजमात्मसिद्धये ॥ ४५ ॥

सुहृद इति ॥ किं चैषां वृष्णीनां ये सहजाः सहजाताः । मातृपितृपक्ष्या इत्यर्थः । 'अन्येष्वपि दृश्यते' इति डप्रत्ययः । सुहृदो मित्राणि तथेतरे कृत्रिमसुहृदश्च मतं वृष्णिपक्षं न विलङ्घयन्ति नातिक्रामन्ति । ते द्वयेऽपि नृपाः । दुर्योधनोपजीविनोऽपीति भावः । आत्मसिद्धय आत्मजीवनार्थं धृतराष्ट्रात्मजं दुर्योधनं विनयादानुकूल्यादिव यापयन्ति कालं गमयन्ति । कार्यकाले तु वृष्णिपक्षप्रवेशिन एवेत्यर्थः । यातेर्ण्यन्ताल्लट् । 'अर्तिह्री—' इत्यादिना पुगागमः ॥

किंच नायमभियोगकाल इत्याशयेनाह—

अभियोग इमान्महीभुजो
भवता तस्य कृतः कृतावधेः ।
प्रविघाटयिता समुत्पतन्
हरिदश्वः कमलाकरानिव ॥ ४६ ॥

अभियोग इति ॥ कृतावधेः परिभाषितकालस्य । 'अवधिस्त्ववधाने स्यात्सीम्नि काले बिलेऽपि च' इति विश्वः । तस्य सुयोधनस्य । कर्मणि षष्ठी । भवता कृतः । अवधित इति शेषः । अभियोगः । आर्द्राभिभव इति यावत् । 'अभियोगस्तु शपथे स्यादार्द्रे च पराभवे' इति विश्वः । इमान्पूर्वोक्तान्महीभुजो राज्ञो हरिदश्व उष्णरश्मिः कमलाकरानिव समुत्पतन्नुद-

न्नेव प्रविघाटयिता भेत्स्यति । घाटयतेर्भौवादिका-ल्लृट् । चौरादिकस्य तु 'मितां ह्रस्वः' इति ह्रस्वत्वं स्यात् ॥

अथ न ये वृष्णिपक्षास्तान्प्रत्याह—

उपजापसहान्विलङ्घयन्
स विधाता नृपतीन्मदोद्धतः ।
सहते न जनोऽप्यधःक्रियां
किमु लोकाधिकधाम राजकम् ॥ ४७ ॥

उपजापेति ॥ मदोद्धतः स दुर्योधनो नृपतीन-न्यान्नृपान्विलङ्घयन्मदादवमानयन् । सहन्त इति सहाः । पचाद्यच् । उपजापस्य सहान्भेदयोग्यान् 'समौ भेदोपजापौ' इत्यमरः । विधाता विधास्यति दधातेर्लुट् । अवमानितो जनः सुभेद्य इति भावः । न च ते सहिष्णव इत्याह—जनः प्राकृतोऽप्यधःक्रियामपमानं न सहते । लोकाधिकधाम लोकोत्तरप्रतापं राजकं राजसमूहः । 'गोत्रोक्षोष्ट्र–' इत्यादिना वुञ्प्रत्ययः । किमु । न सहत इति किं वक्तव्यमित्यर्थः । तथा सति कृत्स्नमेव राजमण्डलमस्मानेवावलम्बिष्यत इति भावः ॥

ननु सर्वीनिवेत्यादियनेचरोक्त्या तस्य मदसंभावनापि कथमित्यत्राह—

असमापितकृत्यसंपदां
हतवेगं विनयेन तावता ।

प्रभवन्त्यभिमानशालिनां
मदमुत्तम्भयितुं विभूतयः ॥ ४८ ॥

असमापितेति ॥ असमापितकृत्यसंपदामकृतकृत्यानामतोऽभिमानशालिनामहंकारिणां विभूतयः संपद एव तावता स्वल्पेन विनयेन । कार्यवशादारोपितेनेति शेषः । हतवेगं प्रतिबद्धवेगं नतु स्वरूपतो हतं मदमुत्तम्भयितुं वर्धयितुं प्रभवन्ति । सर्वथा दुर्जनसंपदो विकारयन्तीति भावः ॥

अथ मदस्यानर्थहेतुतां युग्मेनाह—
मदमानसमुद्धतं नृपं
न वियुङ्क्ते नियमेन मूढता ।
अतिमूढ उदस्यते नया-
न्नयहीनादपरज्यते जनः ॥ ४९ ॥

मदेति । अपरागेति च ॥ मदमानाभ्यां दर्पाहंकाराभ्यां समुद्धतं नृपं मूढता कार्यापरिज्ञानं नियमेनावश्यं न वियुङ्क्ते न विमुञ्चति । अतिमूढो नयान्नीतिमार्गादुदस्यत उत्क्षिप्यते । कर्मकर्तरि लट् । नयहीनाज्जनोऽपरज्यतेऽपरक्तो भवति । 'स्वरितञितः—' इत्यादिनात्मनेपदम् ॥

अपरागसमीरणेरितः
क्रमशीर्णाकुलमूलसंततिः ।
सुकरस्तरुवत्सहिष्णुना
रिपुरुन्मूलयितुं महानपि ॥ ५० ॥

अपरागेति। अपरागोऽप्रीतिः। द्वेष इति यावत्। समीरण इव। तेनेरितश्चोदितः। अतएव क्रमेण शीर्णा शीर्णीभूताकुला चला च मूलसंततिः प्रकृत्यादिस्वजनवर्गः शिफासंघातश्च यस्य स तथोक्तः। 'मूलं वशीकृते स्वीये शिफातारान्तिकादिषु' इति वैजयन्ती। रिपुर्महानपि तरुवद् वृक्ष इव सहिष्णुना क्षमावतोन्मूलयितुमुद्धर्तुं सुकरः सुसाध्यः। सुकरोन्मूलन इत्यर्थः। अत्र मदादेः पूर्वपूर्वस्योत्तरोत्तरं प्रति कारणत्वात्कारणमाला, तरुवदित्युपमा चेति द्वयोः संसृष्टिः॥

नन्वन्तर्भेदमात्रेण कथं सुसाध्यत्वमत आह—

अणुरप्युपहन्ति विग्रहः
प्रभुमन्तःप्रकृतिप्रकोपजः।
अखिलं हि हिनस्ति भूधरं
तरुशाखान्तनिघर्षजोऽनलः॥ ५१॥

अणुरिति॥ अणुरल्पोऽप्यन्तःप्रकृतिप्रकोपजोऽन्तरङ्गामात्याद्यपरागसमुत्थः। 'प्रकृतिः पञ्चभूतेषु स्वभावे मूलकारणे। छन्दःकारणभेदेषु जन्त्वमात्यादिकेष्वपि॥' इति वैजयन्ती। विग्रहो वैरं प्रभुमुपहन्ति नाशयति। अत्र दृष्टान्तमाह—तरुशाखान्तानां निघर्षो घर्षणं तज्जोऽनलोऽग्निः। भूधरं गिरिमखिलं साकल्येन हिनस्ति हि। दहतीत्यर्थः। अत्रोपमानोपमेयसमानधर्माणां प्रतिबिम्बतया निर्देशेन दृष्टान्तालंकारः॥

तथापि कथं वर्धमानं शत्रुमुपेक्षेतेत्याशङ्क्य दुर्विनीतत्वादित्याह—

मतिमान्विनयप्रमाथिनः
समुपेक्षेत समुन्नतिं द्विषः ।
सुजयः खलु तादृगन्तरे
विपदन्ता ह्यविनीतसंपदः ॥ ५२ ॥

मतिमानिति ॥ मतिमान्प्राज्ञः । विनयं प्रमथ्नातीति विनयप्रमाथिनो दुर्विनीतस्य द्विषः समुन्नतिं वृद्धिं समुपेक्षेत । उपेक्षायाः फलमाह—तादृगविनीतोऽन्तरे क्वचिद्रन्ध्रे सुजयः सुखेन जेतुं शक्यः खलु । हि यस्मादविनीतसंपदो विपदन्ता विपन्मर्यादकाः । अनर्थोदर्का इत्यर्थः ॥

कथं दुर्विनीतस्य शत्रोः सुजयत्वमित्याशङ्क्य भेदजर्जरितत्वादित्याह—

लघुवृत्तितया भिदां गतं
बहिरन्तश्च नृपस्य मण्डलम् ।
अभिभूय हरत्यनन्तरः
शिथिलं कूलमिवापगारयः ॥ ५३ ॥

लघ्विति ॥ लघुवृत्तितया स्वस्य दुर्वृत्तरूपतया बहिर्मित्रादिजनपदेष्वन्तरमात्यादिषु च भिदां भेदं गतम् । 'षिद्भिदादिभ्योऽङ्' इत्यङ्प्रत्ययः । नृपस्य मण्डलं राष्ट्रमनन्तरः संनिहितो जिगीषुरापगारयो

नदीवेगः शिथिलमन्तर्भेदजर्जरं कूलमिवाभिभूया-भ्यहरति ॥

अनुशासतमित्यनाकुलं
नयवर्त्माकुलमर्जुनाग्रजम् ।
स्वयमर्थ इवाभिवाञ्छित-
स्तमभीयाय पराशरात्मजः ॥ ५४ ॥

अन्विति ॥ इतीत्थमाकुलमरिनिकारस्मरणात्क्षुभितमर्जुनाग्रजं भीमसेनं नयवर्त्म नीतिमार्गमनाकुलमसंकीर्णं यथा तथानुशासतमुपदिशन्तम् । 'जक्षित्यादयः षट्' इत्यभ्यस्तात्च्छतुर्नुमभावः । तं युधिष्ठिरं पराशरात्मजो वेदव्यासः । स्वयमभिवाञ्छितोऽर्थ इव । साक्षान्मनोरथ इवेत्युत्प्रेक्षा । अभीयाय प्राप्तः ॥

अथ युग्मेनाह—

मधुरैरवशानि लम्भय-
न्नपि तिर्यञ्चि शमं निरीक्षितैः ।
परितः पटु बिभ्रदेनसां
दहनं धाम विलोकनक्षमम् ॥ ५५ ॥

मधुरैरिति ॥ मधुरैः शान्तैर्निरीक्षितैरवलोकनैः । नपुंसके भावे क्तः । न विद्यते वशमायत्तत्वं येषां तान्यवशानि प्रतिकूलानि । 'वशमायत्ततायां च' इति विश्वः । तिर्यञ्चि मृगपक्ष्यादीनि शमं शान्तिं

लम्भयन्प्रापयन् । 'लभेश्च' इति नुमागमः । 'गत्यर्थ-' इत्यादिना द्विकर्मकत्वम् । परितः पटूज्वलमेनसाम् । दह्यतेऽनेनेति दहनं निवर्तकं तथापि विलोकनक्षमं दर्शनीयम् । वह्न्यादिविलक्षणमिति भावः । धाम तेजो बिभ्रत् ॥

सहसोपगतः सविस्मयं
तपसां सूतिरसूतिरापदाम् ।
ददृशे जगतीभुजा मुनिः
स वपुष्मानिव पुण्यसंचयः ॥ ५६ ॥

सहसेति ॥ पुनः सहसोपगतोऽकस्मादागतस्तपसां सूतिः प्रभव आपदामसूतिरप्रभवः । निवर्तक इति यावत् । स मुनिर्व्यासो वपुष्मान्देहधारी पुण्यसंचयः पुण्यराशिरिवेत्युत्प्रेक्षा । जगतीभुजा राज्ञा सविस्मयं ददृशे दृष्टः ॥

अथोच्चकैरासनतः परार्ध्या-
दुद्यन्स धूतारुणवल्कलाग्रः ।
रराज कीर्णाकपिशांशुजालः
शृङ्गात्सुमेरोरिव तिग्मरश्मिः ॥ ५७ ॥

अथेति ॥ अथ दर्शनानन्तरम् । उच्चैरुन्नतात्परार्ध्याच्छ्रेष्ठात् । 'अर्धाद्यत्' । 'परावराधमोत्तमपूर्वाच्च' इति यत्प्रत्ययः । आसनत सिंहासनादुद्यन्नुत्तिष्ठन्नत एव धूतानि कम्पितान्यरुणानि वल्कलाग्राणि यस्य स तथोक्तः । स नृपः कीर्णं विस्तृतमाकपिश-

मंशुजालं यस्य स तथोक्तः । सुमेरोः शृङ्गादुर्यस्ति-
रमरश्मिरिव । रराज ॥

अवहितहृदयो विधाय सोऽर्हा-
मृषिवदृषिप्रवरे गुरूपदिष्टाम् ।
तदनुमतमलंकार पश्चात्
प्रशम इव श्रुतमासनं नरेन्द्रः ॥ ५८ ॥

अवहितेति ॥ स नरेन्द्रोऽवहितहृदयोऽप्रमत्तचि-
त्तः सन् । ऋषिप्रवरे मुनिश्रेष्ठे । ऋषिवदृष्यर्हाम् ।
अर्हार्थे वतिप्रत्ययः । गुरूपदिष्टाम् । शास्त्रीयामित्य-
र्थः । अर्हां पूजाम् । 'गुरोश्च हलः' इत्यकारप्रत्ययः ।
विधाय, पश्चादनन्तरं तदनुमतं तेनानुज्ञातमासनम् ।
प्रशमः शान्तिः श्रुतं शास्त्रश्रवणमिव । अलंचकार ।
उक्तं च–'प्रशमस्तस्य भवत्यलंक्रिया' इति । मुन्या-
ज्ञयोपविष्टवानित्यर्थः ॥

व्यक्तोदितस्मितमयूखविभासितोष्ठ-
स्तिष्ठन्मुनेरभिमुखं स विकीर्णधाम्नः ।
तन्वन्तमिद्धमभितो गुरुमंशुजालं
लक्ष्मीमुवाह सकलस्य शशाङ्कमूर्तेः ॥५९॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये
द्वितीयः सर्गः ।

व्यक्तेति ॥ व्यक्तोदितैः स्फुटोद्गतैः स्मितमयूखै-
र्विभासितावोष्ठौ यस्य स तथोक्तः । विकीर्णधाम्नो-

विस्तीर्णतेजसो मुनेरभिमुखं तिष्ठन्स नृपः । इद्धं दीप्तमंशुजालं लम्बन्तं गुरुं गीष्पतिं । 'गुरुर्गीष्पतिपित्रादी' इत्यमरः । 'अभितःपरितः-' इत्यादिना द्वितीया । अभितोऽभिमुखम् । तिष्ठत इति शेषः । सकलस्य संपूर्णस्य शशाङ्का मूर्तिर्यस्य तस्येन्दोर्लक्ष्मीमुवाह वहति स्म । अत्रोपमेयस्य राज्ञ उपमानेन्दुधर्मेण लक्ष्म्याः साक्षात्संबन्धासंभवात्तत्सदृशीं लक्ष्मीमिवेतिप्रतिबिम्बकरणाक्षेपादसंभवद्वस्तुसंबन्धात्पदार्थवृत्तिर्निदर्शनालंकारः । तदुक्तम्—'प्रतिबिम्बस्याकरणं संभवता यत्र वस्तुयोगेन । तत्साम्यमसंभवता निदर्शना सा द्विधाभिमता ॥' इति ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायां द्वितीयः सर्गः समाप्तः ॥

Teacher book

तृतीयः सर्गः ।

अथ त्रिभिर्मुनिं विशिंषंश्चतुर्भिः कलापकमाह । तदुक्तम्—'द्वाभ्यां-युग्ममिति प्रोक्तं त्रिभिः श्लोकैर्विशेषकम् । कलापकं चतुर्भिः स्यात्तदूर्ध्वं कुलकं स्मृतम् ॥' इति—

ततः शरच्चन्द्रकराभिरामै-
रुत्सर्पिभिः प्रांशुमिवांशुजालैः ।
बिभ्राणमानीलरुचं पिशङ्गी-
र्जटास्तडित्वन्तमिवाम्बुवाहम् ॥ १ ॥

तत इति ॥ तत उपवेशानन्तरं धर्मात्मजो युधिष्ठिरः शरच्चन्द्रकराभिरामैः । आह्लादकैरित्यर्थः । उत्सर्पिभिरूर्ध्वं प्रसारिभिरंशुजालैः प्रांशुमुन्नतमिव स्थितमित्युत्प्रेक्षा । पुनरानीलरुचं कृष्णवर्णं पिशङ्गीः पिङ्गलवर्णाः । गौरादित्वान्ङीष् । जटा बिभ्राणं धारयन्तमतएव तडित्वन्तं विद्युद्युक्तमम्बुवाहमिव स्थितमित्युत्प्रेक्षा ॥

प्रसादलक्ष्मीं दधतं समग्रां
वपुःप्रकर्षेण जनातिगेन ।
प्रसह्य चेतःसु समासजन्त-
मसंस्तुतानामपि भावमार्द्रम् ॥ २ ॥

प्रसादेति ॥ पुनः समग्रां संपूर्णां प्रसादः सौम्यता तस्य लक्ष्मीं संपदं दधतम् । अतएव जनमतिगच्छतीति जनातिगेन लोकातिशायिना । 'अन्येष्वपि दृश्यते' इति डप्रत्ययः । वपुःप्रकर्षेणाकारसंपदासंस्तुतानामपरिचितानामपि । व्यासोऽयमित्यजानतामपीत्यर्थः 'संस्तवः स्यात्परिचयः' इत्यमरः । चेतःसु चित्तेष्वार्द्रं स्नेहार्द्रं भावमभिप्रायं प्रसह्य बलात्समासजन्तम् । लगयन्तामिति यावत् । 'दंश-

सञ्जस्वञ्जां शपि' इत्युपधाया लोपः । प्रसन्नाकारेषु सर्वोऽपि स्निह्यतीति भावः ॥

अनुद्धताकारतया विविक्तां
तन्वन्तमन्तःकरणस्य वृत्तिम् ।
माधुर्यविस्रम्भविशेषभाजा
कृतोपसंभाषमिवेक्षितेन ॥ ३ ॥

अनुद्धतेति ॥ पुनरनुद्धताकारतया शान्ताकारत्वेन लिङ्गेनान्तःकरणस्य वृत्तिं विविक्तां पूताम् । शान्तामिति यावत् । 'विविक्तौ पूतविजनौ' इत्यमरः । तन्वन्तं प्रकटयन्तम् । आकृतिरेवास्य चित्तशुद्धिं कथयतीत्यर्थः । पुनर्माधुर्यं निसर्गसौम्यता विस्रम्भो विश्वासः । 'समौ विस्रम्भविश्वासौ' इत्यमरः । तयोर्विशेषमतिशयं भजतीति तथोक्तेनेक्षितेन दर्शनेनैव कृतोपसंभाषा संभाषणं येन तमिवेत्युत्प्रेक्षा । दृष्टिविशेषेणैवोपसंभाषमाणमिव स्थितमित्यर्थः । काशिकायां तु 'उपसंभाषणमुपसान्त्वनम्' इति भासनादिसूत्रेण ॥

धर्मात्मजो धर्मनिबन्धिनीनां
प्रसूतिमेनःप्रणुदां श्रुतीनाम् ।
हेतुं तदभ्यागमने परीप्सुः
सुखोपविष्टं मुनिमाबभाषे ॥ ४ ॥

धर्मेति ॥ पुनर्धर्मं निबध्नन्तीति धर्मनिबन्धिनीनामग्निहोत्रादिधर्मप्रतिपादिकानाम् । एनःप्रणुदा-

मघच्छिदाम् । क्विप् । श्रुतीनां वेदानाम् । 'श्रुतिः स्त्री वेद आम्नायः' इत्यमरः । प्रसूतिं प्रभवं सुखेनोपविष्टं मुनिं तदभ्यागमने तस्य मुनेरागमने हेतुं परीप्सुर्जिज्ञासुः । 'आप्नोतेः सन्नन्तादुप्रत्ययः । 'आप्ज्ञप्यृधामीत्' इतीकारः । 'अत्र लोपोऽभ्यासस्य' इत्यभ्यासलोपः । आबभाष उवाच ॥

अनाप्तपुण्योपचयैर्दुरापा
फलस्य निर्धूतरजाः सवित्री ।
तुल्या भवद्दर्शनसंपदेषा
वृष्टेर्दिवो वीतबलाहकायाः ॥ ५ ॥

अनाप्तेति ॥ अनाप्तपुण्योपचयैरकृतपुण्यसंग्रहैर्दुरापा दुर्लभा । फलस्य सवित्री श्रेयस्करी निर्धूतरजा हतरजोगुणा । अन्यत्र निरस्तधूलिः । 'रजो रजोगुणे धूलौ परागार्त्तवयोरपि' इति शाश्वतः । एषा भवद्दर्शनसंपत्संपत्तिः । लाभ इति यावत् । संपदादिभ्यः क्विपो भावार्थत्वात् । वीतबलाहकाया गतमेघाया दिव आकाशस्य संबन्धिन्या वृष्टेस्तुल्येत्युपमालंकारः । अनभ्रवृष्टिवदतर्कितोपपन्नं भवद्दर्शनं सर्वथा कस्यचिच्छ्रेयसो निदानमित्यर्थः । वारि वहतीति बलाहकः । पृषोदरादित्वात्साधुः ॥

अस्य क्रियाः कामदुघाः क्रतूनां
सत्याशिषः संप्रति भूमिदेवाः ।
आसंसृतेरस्मि जगत्सु जात-
स्त्वय्यागते यद्बहुमानपात्रम् ॥ ६ ॥

अथेति ॥ अद्य क्रतूनां क्रिया अनुष्ठानानि । कामान्दुहन्तीति कामदुघाः । फलदा इत्यर्थः । 'दुहः कब्घश्च' इति कप्प्रत्ययो घादेशश्च । संप्रत्यद्य भूमिदेवा ब्राह्मणाः । 'द्विजात्यग्रजन्मभूदेववाडवाः । विप्रश्च ब्राह्मणः' इत्यमरः । सत्याशिषो जाताः । ब्राह्मणाशिषोऽद्य फलिता इत्यर्थः । यद्यतः कारणात्त्वय्यागते सति । त्वदागमनेन निमित्तेनेत्यर्थः । अस्मीत्यहमर्थेऽव्ययम् । 'अस्मीत्यस्मदर्थानुवादेऽहमर्थेऽपि' इति गणव्याख्याने । 'दासे कृतागसि भवत्युचितः प्रभूणां पादप्रहार इति सुन्दरि नास्मि दूये' इति प्रयोगाच्च । आसंसृतेरा संसारात् । यावत्संसारमित्यर्थः । अभिविधावाङ् विकल्पादसमासः । जगत्सु बहुमानपात्रं बहुयोग्यताभाजनं जातः । सकलसत्कर्मफलभूतं त्वदागमनं येन मे जगन्मान्यतेति भावः ॥

श्रियं विकर्षत्यपहन्त्यघानि
श्रेयः परिस्नौति तनोति कीर्तिम् ।
संदर्शनं लोकगुरोरमोघं
तवात्मयोनेरिव किं न धत्ते ॥ ७ ॥

श्रियमिति ॥ आत्मयोनेर्ब्रह्मण इव लोकगुरोस्तवामोघमविफलं संदर्शनं श्रियं विकर्षत्याकर्षति । अघानि दुःखान्यपहन्ति । 'अंहोदुःखव्यसनेष्वघम्' इत्यमरः । श्रेयः पुरुषार्थं परिस्नौति स्रवति । कीर्तिं च तनोति । किं बहुना किं न धत्ते किं न करोति । सर्वं करोतीत्यर्थः ॥

श्च्योतन्मयूखेऽपि हिमद्युतौ मे
ननिर्वृतं निर्वृतिमेति चक्षुः ।
समुज्झितज्ञातिवियोगखेदं
त्वत्सन्निधावुच्छ्वसितीव चेतः ॥ ८ ॥

श्च्योतदिति ॥ हे भगवन्, श्च्योतन्मयूखे सुधास्राविकरे हिमद्युताविन्दावपि विषये ननिर्वृतम् । नञर्थस्य नशब्दस्य सुप्सुपेति समासः । मे चक्षुस्त्वत्सान्निधौ निर्वृतिं सुखमेति । तथा चेतश्च समुज्झितज्ञातिवियोगखेदं त्यक्तबन्धुविरहदुःखं समुच्छ्वसितीवानुपरोधेन प्राणितीवेत्युत्प्रेक्षा । पूर्वार्धे तु निर्वृतिकारणे सत्यपीन्दावनिर्वृतिकथनाद्विशेषोक्तिः । तदुक्तम् —'तत्सामग्र्यामनिर्वृत्तिर्विशेषोक्तिर्निगद्यते' इति ॥

निरास्पदं प्रश्नकुतूहलित्व-
मस्मास्वधीनं किमु निःस्पृहाणाम् ।
तथापि कल्याणकरीं गिरं ते
मां श्रोतुमिच्छा मुखरीकरोति ॥ ९ ॥

निरास्पदमिति ॥ प्रश्नकुतूहलित्वं निरास्पदम् । त्वदागमनप्रयोजनप्रश्नो निरास्पद इत्यर्थः । 'आस्पदं प्रतिष्ठायाम्' इति निपातः । प्रश्नानवकाशे हेतुमाह-निःस्पृहाणाम् । युष्मादृशामित्यर्थः । अस्मास्वधीनमायत्तं किमु । न किंचिदस्मत्तो लभ्यमित्यर्थः । आधारत्वविवक्षायां सप्तमी । तथापि कल्याणकरीम् ।

अस्मद्धितैकहेतुभित्यर्थः । निःस्पृहवृत्तेः पारार्थ्या-दिति भावः । 'कृञो हेतु—' इति टप्रत्यये ङीप् । अतस्ते गिरं श्रोतुमिच्छा माम् । मुखं वागस्यास्तीति मुखरो निरन्तरभाषी । 'रप्रकरणे खमुखकुञ्जेभ्य उ-पसंख्यानम्' इति रः । 'दुर्मुखे मुखराबद्धमुखौ' इत्य-मरः । ततश्च्विप्रत्ययः । मुखरीकरोति । व्याहारय-तीत्यर्थः । निःस्पृहस्यापि ते वाक्यमस्मद्धितकरत्वा-च्छ्रोतव्यमिति भावः ॥

इत्युक्तवानुक्तिविशेषरम्यं
मनः समाधाय जयोपपत्तौ ।
उदारचेता गिरमित्युदारां
द्वैपायनेनाभिदधे नरेन्द्रः ॥ १० ॥

इतीति ॥ इतीत्थमुक्तिविशेषरम्यमुक्तिवैचित्र्य-चारु यथा तथोक्तवान् । उदारचेता महामना नरेन्द्रो द्वैपायनेन व्यासेन । द्वीपमयनं स्थानं जन्मभूमिर्यस्य स द्वीपायनः । स एव द्वैपायनस्तेन । 'प्रज्ञादिभ्यश्च' इति स्वार्थेऽण्प्रत्ययः । नापत्यार्थे । 'नडादिभ्यः फक्' । तेष्वेव पाठाद्बाधितार्थत्वाच्च । जयोपपत्तौ म-नः समाधाय । जयसिद्धिमपेक्ष्येत्यर्थः । इति वक्ष्य-माणप्रकारामुदारामर्थवतीं गिरमभिदध उक्तः । दु-हादित्वादप्रधाने कर्मणि लिट् । 'प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् । अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः ॥' इति वचनात् ॥

आदौ तावत्तस्य माध्यस्थ्यभङ्गदोषं युग्मेन परिहरति—

चिचीषतां जन्मवतामलघ्वीं
यशोवतंसामुभयत्र भूतिम् ।
अभ्यर्हिता बन्धुषु तुल्यरूपा
वृत्तिर्विशेषेण तपोधनानाम् ॥ ११ ॥

चिचीषतामिति ॥ अलघ्वीं गुर्वीम् । 'वोतो गुणवचनात्' इति ङीष् । यशोवतंसां कीर्तिभूषणाम् । उभयत्रेह चामुत्र च भूतिं श्रेयश्चिचीषतां चेतुं संग्रहीतुमिच्छताम् । चिनोतेः सन्नन्ताच्छतृप्रत्ययः । जन्मवतां शरीरिणां बन्धुषु विषये तुल्यरूपैकविधा वृत्तिर्व्यवहारोऽभ्यर्हितोचिता, तपोधनानां त्वस्मत्सदृशां विशेषेण नियमेनाभ्यर्हिता ॥

तथापि निघ्नं नृप तावकीनैः
प्रह्वीकृतं मे हृदयं गुणौघैः ।
वीतस्पृहाणामपि मुक्तिभाजां
भवन्ति भव्येषु हि पक्षपाताः ॥ १२ ॥

तथापीति ॥ तथापि तुल्यवृत्तौ चित्तेऽपि । हे नृप, तावकीनैस्त्वदीयैः । 'युष्मदस्मदोरन्यतरस्यां खञ्च' इति खञ्प्रत्ययः । 'तवकममकावेकवचने' इति तवकादेशः । गुणौघैः प्रह्वीकृतमावर्जितं मे हृदयं निघ्नं त्वदायत्तम् । 'अधीनो निघ्न आयत्तः' इत्यमरः ।

ननु निःस्पृहस्य कोऽयं पक्षपात इत्यत्राह—वीतेति। वीतस्पृहाणां विरक्तानां मुक्तिभाजाम्। मुमुक्षूणामपीत्यर्थः। भवन्तीति भव्याः साधवः। 'भव्यगेय-' इत्यादिना कर्तरि निपातः। तेषु पक्षपाताः स्नेहा भवन्ति। न तु साध्वनुग्रहो महतां माध्यस्थ्यभञ्जक इति भावः॥

अथ नृपस्य गुणवत्तां प्रकटयितुं धृतराष्ट्रस्य दुश्चेष्टामुद्घाटयति--

सुता न यूयं किमु तस्य राज्ञः
सुयोधनं वा न गुणैरतीताः।
यस्त्यक्तवान्वः स वृथा बलाद्वा
मोहं विधत्ते विषयाभिलाषः॥ १३॥

सुता इति॥ यूयं तस्य राज्ञो धृतराष्ट्रस्य सुताः पुत्रा न किमु। अपि तु सुता एवेत्यर्थः। गुणैः शान्तिदानदाक्षिण्यादिभिः सुयोधनं नातीता नातिक्रान्ता वा। अतीता एवेत्यर्थः। कर्तरि क्तः। असुतत्वमगुणत्वं च त्यागे हेतुः। युष्मासु तन्नास्तीत्यर्थः। उपालम्भे कारणमाह— य इति। यो धृतराष्ट्रो वो युष्मान्वृथा निष्कारणमेव त्यक्तवान्। यदि वयं सुता गुणाधिकाश्च तर्हि कथमत्याक्षीत्तत्राह—बलादिति। स विषयाभिलाषो भोगतृष्णा बलाद्वा बलादिव। 'वा स्याद्विकल्पोपमयोरेवार्थेऽपि समुच्चये' इति विश्वः। मोहमविवेकं विधत्ते। विषयाभिला-

षातिरिक्तो न कश्चिद्युष्मत्त्यागहेतुरस्तीत्यर्थः । अत्र कार्यकारणसमर्थनरूपोऽर्थान्तरन्यासः ॥

अथ राज्ञ उत्साहवर्धनाय शत्रोर्हानिं सूचयति—

जहातु नैनं कथमर्थसिद्धिः
संशय्य कर्णादिषु तिष्ठते यः ।
असाधुयोगा हि जयान्तरायाः
प्रमाथिनीनां विपदां पदानि ॥ १४ ॥

जहात्विति ॥ एनं धृतराष्ट्रमर्थसिद्धिः कथं न जहातु । जहात्वेवेत्यर्थः । 'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च' इति प्राप्तकाले लोट् । तस्य हानिकालः प्राप्त इत्यर्थः । कुतः । यो धृतराष्ट्रः संशय्य संदिह्य 'कर्णादिषु तिष्ठते कर्णादीन्दुर्मन्त्रिणः संदिग्धार्थे निर्णेतृत्वेनावलम्बत इत्यर्थः । 'प्रकाशनस्थेयाख्ययोश्च' इति स्थेयाख्यायामात्मनेपदम् । तिष्ठतेऽस्मिन्निति स्थेयो विवादपदनिर्णेता । तथाहि । असाधुयोगा दुर्जनसंसर्गा जयान्तराया जयविघातकाः । किं च प्रमाथिनीनामुन्मूलनशीलानां विपदां पदानि स्थानानि । 'पदं व्यवसितत्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । न केवलं जयघातिनः किंत्वनर्थकारिणश्चेत्यर्थः । धृतराष्ट्रोऽपि दुर्जनविधेयत्वाद्विनङ्क्ष्यतीतिभावः ॥

एवं शत्रोरनर्थं सूचयित्वा राज्ञोऽर्थसिद्धिं सूचयति—

पथश्च्युतायां समितौ रिपूणां
धर्म्यां दधानेन धुरं चिराय ।
त्वया विपत्स्वप्यविपत्ति रम्य-
माविष्कृतं प्रेम परं गुणेषु ॥ १५ ॥

पथ इति ॥ रिपूणां समितौ सभायाम् । 'सभा-समितिसंसदः' इत्यमरः । पथश्च्युतायां मार्गाद्भ्रष्टायाम् । दुरात्मनो दुःशासनस्य स्त्रीग्रहणसाहसमङ्गीकृतवत्यामित्यर्थः । चिराय धर्म्यां धर्मादनपेताम् । 'धर्मपथ्यर्थन्यायादनपेते' इति यत्प्रत्ययः । धुरं भारं दधानेन । कृच्छ्रेष्वपि धर्मादचलतेत्यर्थः । त्वया विपत्स्वपि । अविपत्त्यविनाशयत एव रम्यं गुणेषु शान्त्यादिषु विषये परमुत्कृष्टं प्रेमाविष्कृतं प्रकटीकृतम् । दुःसहमपि सोढवता त्वया साधु कृतमिति भावः ॥

विधाय विध्वंसमनात्मनीनं
शमैकवृत्तेर्भवतश्छलेन ।
प्रकाशितत्वन्मतिशीलसाराः
कृतोपकारा इव विद्विषस्ते ॥ १६ ॥

विधायेति ॥ किं च शम एवैका मुख्या वृत्तिर्यस्य तस्यापरोपतापिनो भवतश्छलेन कपटेन । आत्मने हितआत्मनीनः । स न भवतीत्यनात्मनीनः । स्वस्यैवानर्थहेतुरित्यर्थः । तम् । 'आत्मन्विश्वजनभोगोत्तरपदात्खः' इति खप्रत्ययः । विध्वंसमपकारं विधाय कृत्वा । प्रकाशितः प्रख्यापितस्त्वन्मतिशीलयोस्तव

प्रज्ञासद्वृत्तयोः सारः प्रकर्षो यैस्ते तथोक्ताः। ते तव विद्विषः कृतोपकारा इवोपकृतवन्त इव। अपकारोऽप्युपकारायैव संवृत्तः। यदेषां दौर्जन्यं युष्मत्सौजन्यं च जगति सुव्यक्तमासीदित्यर्थः। विद्यमानस्यापि सुजनस्य चन्दनदारुण इव गुणाः परिभव एव प्रचुरीभवन्तीति भावः॥

अथ प्रयोजनान्तरमाह–

लभ्या धरित्री तव विक्रमेण
ज्यायांश्च वीर्यास्त्रबलैर्विपक्षः।
अतः प्रकर्षाय विधिर्विधेयः
प्रकर्षतन्त्रा हि रणे जयश्रीः॥ १७॥

लभ्येति॥ तव। त्वयेत्यर्थः। 'कृत्यानां कर्तरि वा' इति षष्ठी। धरित्री विक्रमेण लभ्या प्राप्तव्या। न च सुलभ्या तं विनेत्याह–विपक्षश्च शत्रुरपि। वीर्यं शौर्यमस्त्राण्याग्नेयादीनि बलानि सैन्यानि तैर्ज्यायान्प्रशस्यतरः। अधिकतर इति यावत्। ज्येष्ठस्य। 'ज्यादादीयसः' इति ज्यादेशः। अतः प्रकर्षायाधिक्याय विधिरुपायो विधेयः कर्तव्यः। कुतः। हि यस्माद्रणे जयश्रीः प्रकर्षतन्त्रा प्रकर्षप्रधाना। प्रकर्षायत्तेत्यर्थः। 'तन्त्रं प्रधाने सिद्धान्ते' इत्यमरः। बलिन एव जयः, न तु दुर्बलस्येति भावः॥

अथ 'त्रि–' इत्यादिना श्लोकचतुष्टयेन विपक्षज्यायस्त्वं वर्णयति–

त्रिःसप्तकृत्वो जगतीपतीनां
हन्ता गुरुर्यस्य स जामदग्न्यः ।
वीर्यावधूतः स्म तदा विवेद
प्रकर्षमाधारवशं गुणानाम् ॥ १८ ॥

त्रिःसप्तेति ॥ त्रिरावृत्तान्सप्तवारांस्त्रिःसप्तकृत्वः । एकविंशतिकृत्व इत्यर्थः । त्रिःसप्तशब्दयोः सुप्सुपेति-समासः । 'संख्यायाः क्रियाभ्यावृत्तिगणने कृत्वसुच्' इति कृत्वसुच्प्रत्ययः । जगतीपतीनां महीपतीनां हन्ता नाशको गुरुरस्त्रवेदोपदेष्टा सः । प्रसिद्ध इत्यर्थः । अत एव यच्छब्दानपेक्षत्वम् । तदुक्तं काव्यप्रकाशे— 'प्रक्रान्तप्रसिद्धानुभूतार्थविषयस्तच्छब्दो यच्छब्दो-पादानं नापेक्षते' इति । जमदग्नेरपत्यं पुमाञ्जामद-ग्न्यः । 'गर्गादिभ्यो यञ्' इति यञ्प्रत्ययः । यस्य भी-ष्मस्य वीर्यावधूतो विक्रमाभिभूतः । अम्बिकास्वयं-वर इत्यर्थः । तदा भङ्गप्राप्तिसमये गुणानां शौर्यादी-नां प्रकर्षमतिशयमाधारवशमाश्रयाधीनं विवेद जज्ञे स्म । स्वविद्यायाः स्वशिष्ये भीष्मे स्वस्मादपि प्रक-र्षाधानदर्शनादिति भावः । 'स्म पादपूरणे भूतेऽर्थे च' इति विश्वः ॥

यस्मिन्ननैश्वर्यकृतव्यलीकः
पराभवं प्राप्त इवान्तकोऽपि ।
धुन्वन्धनुः कस्य रणे न कुर्यात्
मनो भयैकप्रवणं स भीष्मः ॥ १९ ॥

यस्मिन्निति ॥ यस्मिन्भीष्मे विषये । अनीश्वरस्य भावोऽनैश्वर्यमसामर्थ्यम् । 'नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम्' इति विकल्पान्नञः पूर्वपदवृद्ध्यभावः । तेन कृतव्यलीको जनितवैलक्ष्यः । 'दुःखे वैलक्ष्ये व्यलीकम्' इति यादवः । अन्तकोऽपि यमोऽपि पराभवं प्राप्त इव । भीष्मस्येच्छामरणत्वादन्तकोऽपि पराजित इवास्ते, किमुतान्य इति भावः । स भीष्मो रणे धनुर्धुन्वन्करुपयन्कस्य मनो भयैकप्रवणं भय एकप्रवणमेकोन्मुखम् । शिवभागवतवत्समासः । न कुर्यात् । सर्वस्यापि मनसि भयं कुर्यादेवेत्यर्थः ॥

> सृजन्तमाजाविषुसंहतीर्वः
> सहेत कोपज्वलितं गुरुं कः ।
> परिस्फुरल्लोलशिखाग्रजिह्वं
> जगज्जिघत्सन्तमिवान्तवह्निम् ॥ २० ॥

सृजन्तमिति ॥ आजौ रणे इषुसंहतीर्बाणसङ्घान्सृजन्तं वर्षन्तं कोपज्वलितमत एव परिस्फुरन्त्यो लोलाश्च शिखाग्राण्येव जिह्वा यस्य तं तथोक्तं जगल्लोकं जिघत्सन्तमत्तुमिच्छन्तम् । अदेः सन्नन्ताच्छतृप्रत्ययः । 'लुङ्सनोर्घस्लृ' इति घस्लादेशः । अन्तवह्निं कालाग्निमिव स्थितं गुरुं द्रोणं वो युष्माकं मध्ये कः सहेत सोढुं शक्नुयात् । न कोऽपीत्यर्थः । 'शकि लिङ् च' इति शक्यार्थे लिङ् ॥

निरीक्ष्य संरम्भनिरस्तधैर्यं
राधेयमाराधितजामदग्न्यम् ।
असंस्तुतेषु प्रसभं भयेषु
जायेत मृत्योरपि पक्षपातः ॥ २१ ॥

निरीक्ष्येति ॥ संरम्भेण कोपेन निरस्तं त्याजितं धैर्यं निर्विकारचित्तत्वं येन तं तथोक्तम् । आटोपेनैव परधैर्यापहारिणमित्यर्थः । आराधितजामदग्न्यं शुश्रूषितभार्गवम् । जामदग्न्यादधिगतास्त्ररहस्यमित्यर्थः । राधेयं राधासुतं कर्णम् । 'स्त्रीभ्यो ढक्' । निरीक्ष्य मृत्योरप्यसंस्तुतेष्वपरिचितेषु । 'संस्तवः स्यात्परिचयः' इत्यमरः । भयेषु प्रसभं पक्षपातः परिचयो जायेत । मृत्युरप्यस्माद्बिभीयात्किमुतान्य इति भावः । संभावनायां लिङ् । अत्र जनिक्रियापेक्षया समानकर्तृकत्वाभावेऽपि पक्षपातक्रियापेक्षया तत्संभवान्निरीक्ष्येति ल्यब्निर्देशः । 'समर्थनीयः प्रधानोपसर्जनभावस्तत्प्रयोजकः' इति व्यक्तिविवेककारः । अत्र भयसंबन्धरहितस्य मृत्योर्भयसंबन्धाभिधानादसंबन्धे संबन्धरूपातिशयोक्तिरलंकारः ॥

अथानन्तरं कर्णागमनप्रयोजनं च युग्मेनाह—

यया समासादितसाधनेन
सुदुश्चरामाचरता तपस्याम् ।
एते दुरापं समवाप्य वीर्य-
मुन्मूलितारः कपिकेतनेन ॥ २२ ॥

ययेति ॥ यया विद्यया करणेन सुदुश्चरामतिदु-ष्करां तपस्यां तपश्चर्याम् । 'कर्मणो रोमन्थतपोभ्यां वर्तिचरोः' इति क्यङ् । 'अ प्रत्ययात्' इति स्त्रियामप्रत्ययः । आचरता । पशुपतिं प्रति तपः कुर्वतेत्यर्थः । अतएव समासादितं प्राप्तं साधनं पाशुपतास्त्ररूपं ये-न तेन । कपिर्हनुमान्केतनं चिह्नं यस्य तेन । अर्जुनेने-त्यर्थः । दुरापमन्यस्य दुर्लभं वीर्यं तेजः समवाप्य । एते पूर्वोक्ता भीष्मादय उन्मूलितार उन्मूलयिष्य-न्ते । उन्मूलयतेर्ण्यन्तात्कर्मणि लुट् । अत्र चिण्वदि-डागमेऽपि तस्य 'असिद्धवदत्राभात्' इत्यसिद्धत्वात् 'णेरनिटि' इति णिलोपः । तन्निमित्तस्यैव 'अनिटि' इति निषेधात् । उक्तं च—'चिण्वद्वृद्धिर्युक्च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति । इट् चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं वल्निमित्तो विघाती ॥' इति ॥

महत्त्वयोगाय महामहिम्ना-
मारधनीं तां नृप देवतानाम् ।
दातुं प्रदानोचित भूरिधाम्नी-
मुपागतः सिद्धिमिवास्मि विद्याम् ॥ २३ ॥

महत्त्वेति ॥ हे नृप, महत्त्वयोगाय प्रकर्षलाभाय महामहिम्नां महानुभावानां देवतानामिन्द्रादीनाम् । आराध्यतेऽनयेत्याराधनी ताम् । प्रसादयित्रीमित्यर्थः । करणे ल्युट् । ङीप् । भूरिधाम्नीं महाप्रभावाम् ।

'धाम देशे गृहे रश्मौ स्थाने जन्मप्रभावयोः' इति विश्वः । 'अन उपधालोपिनोऽन्यतरस्याम्' इति वा ङीप् । विद्यामिन्द्रमन्त्ररूपां सिद्धिं साक्षात्कार्यसिद्धिमिवेति विद्याया अमोघत्वोक्तिः । हे प्रदानोचित दानपात्रभूत । फलभोक्तृत्वादस्य पात्रत्वोक्तिः । दातुमुपागतोऽस्मि ॥

इत्युक्तवन्तं व्रज साधयेति
प्रमाणयन्वाक्यमजातशत्रोः ।
प्रसेदिवांसं तमुपाससाद
वसन्निवान्ते विनयेन जिष्णुः ॥ २४ ॥

इतीति ॥ इत्युक्तवन्तं प्रसेदिवांसं प्रसन्नम् । 'भाषायां सदवसश्रुवः' इति क्वसुः । तं मुनिं जिष्णुर्जयनशीलोऽर्जुनः । 'ग्लाजिस्थश्च—' इति ग्स्नुप्रत्ययः । व्रज साधयानुतिष्ठेत्येवंरूपम् । अजातशत्रोर्धर्मराजस्य । स्वयमविद्वेषणशीलत्वादियं संज्ञा । वाक्यं प्रमाणयन् । तदादिष्टः सन्नित्यर्थः । अन्ते वसंश्छात्र इव । 'छात्रान्तेवासिनौ शिष्ये' इत्यमरः । विनयेनानौद्धत्येनोपाससाद समीपं प्राप ॥

निर्याय विद्याथ दिनादिरम्या-
द्बिम्बादिवार्कस्य मुखान्महर्षेः ।
पार्थाननं वह्निकणावदाता
दीप्तिः स्फुरत्पद्ममिवाभिपेदे ॥ २५ ॥

निर्यायेति ॥ अथ वह्निकणावदाता स्फुलिङ्ग-

दुज्ज्वला । देवतासान्निध्यादिति भावः । विद्येन्द्रमन्त्ररूपा । दिनादिरम्यादर्कस्य प्रभातभास्करस्य बिम्बादिव महर्षेर्व्यासस्य मुखान्निर्याय निर्गत्य । 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' । दीप्तिरर्कदीधितिः । स्फुरद्विकसत्पद्ममिव । पार्थाननमर्जुनस्य मुखमभिपेदे प्रविष्टा ॥

योगं च तं योग्यतमाय तस्मै
तपःप्रभावाद्वितार सद्यः ।
येनास्य तत्त्वेषु कृतेऽवभासे
समुन्मिमीलेव चिराय चक्षुः ॥ २६ ॥

योगं चेति ॥ योग्यतमायार्हतमाय तस्मै पार्थाय तं वक्ष्यमाणमहिमानं योगं ध्यानविधिं च । 'योगः संनहनोपायध्यानसंगतियुक्तिषु' इत्यमरः । तपःप्रभावात्सद्यो वितातार ददौ । चिरकालग्राह्यमपीति भावः । येन योगेन तत्त्वेषु प्रकृतिमहदादिषु । तथा च । मूलप्रकृतिर्महानहंकारो मनश्च पञ्च तन्मात्राणि पञ्च बुद्धीन्द्रियाणि पञ्च कर्मेन्द्रियाणि पञ्च महाभूतानीति चतुर्विंशति तत्त्वानि । तत्रावभासे साक्षात्कारे कृते सत्यस्यार्जुनस्य चक्षुरक्षि चिराय समुन्मिमीलेवोन्मिषितमिवेत्युत्प्रेक्षा । तदा तस्य कोऽपि महानखिलाज्ञानभञ्जनस्तत्त्वावभासश्चिरादन्धस्य दृष्टिलाभ इवाभवदिति भावः ॥

आकारमाशंसितभूरिलाभं
दधानमन्तःकरणानुरूपम् ।

नियोजयिष्यन्विजयोदये तं
तपःसमाधौ मुनिरित्युवाच ॥ २७ ॥

आकारमिति ॥ आशंसित आख्यातो भूरिलाभोऽनेकश्रेयःप्राप्तिर्येन तं तथोक्तम् । महाभाग्यसूचकमित्यर्थः । अन्तःकरणशब्देन तद्वृत्तिरुत्साहो लक्ष्यते । तदनुरूपं तदनुकूलम् । उत्साहानुगुणव्यापारवन्तमित्यर्थः । आकारं मूर्तिं दधानं तमर्जुनं मुनिर्विजयोदये विजयफलके तपःसमाधौ तपोनियमे । 'समाधिर्नियमे ध्याने नीवाके च समर्थने' इति विश्वः । नियोजयिष्यन् । नियोजयितुमिच्छन्नित्यर्थः । 'लृट् शेषे च' इति लृट् । 'लृटः सद्वा' इति सत्प्रत्ययः । इति वक्ष्यमाणमुवाच ॥

अनेन योगेन विवृद्धतेजा
निजां परस्मै पदवीमयच्छन् ।
समाचराचारमुपात्तशस्त्रो
जपोपवासाभिषवैर्मुनीनाम् ॥ २८ ॥

अनेनेति ॥ अनेन स्वोपदिष्टेन योगेन विवृद्धतेजा निजां पदवीं परस्मा अयच्छन् परस्य प्रवेशमयच्छन्नित्यर्थः । उपात्तशस्त्रो निगृहीतायुधः सन् । जपोपवासाभिषवैः स्वाध्यायानशनस्नानैर्मुनीनामाचारं समाचरानुतिष्ठ ॥

क्षेत्रविशेषे तपःसिद्धिरित्याशयेन तं निदर्शयन्नाह—

करिष्यसे यत्र सुदुश्चराणि
प्रसत्तये गोत्रभिदस्तपांसि ।
शिलोच्चयं चारुशिलोच्चयं त-
मेष क्षणान्नेष्यति गुह्यकस्त्वाम् ॥ २९ ॥

करिष्यस इति ॥ यत्र शिलोच्चये गोत्रभिद इन्द्रस्य प्रसत्तये प्रसादाय सुदुश्चराणि तपांसि करिष्यसे । चारुशिलोच्चयं रम्यशिखरं तं शिलोच्चयं गिरिमिन्द्रकीलरूपम् । 'अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः' इत्यमरः । त्वामेष गुह्यको यक्षः । अनन्तरमेवास्य पुरःप्रादुर्भावादेष इति निर्देशः । क्षणान्नेष्यति प्रापयिष्यति ॥

इति ब्रुवाणेन महेन्द्रसूनुं
महर्षिणा तेन तिरोबभूवे ।
तं राजराजानुचरोऽस्य साक्षा-
त्प्रदेशमादेशमिवाधितष्ठौ ॥ ३० ॥

इतीति ॥ इतीत्थं महेन्द्रसूनुमर्जुनं ब्रुवाणेनोक्तवता । 'वर्तमानसामीप्ये' इति भूते वर्तमानवत्प्रत्ययस्तिरोधानस्याविलम्बसूचनार्थः । तेन महर्षिणा व्यासेन तिरोबभूवेऽन्तर्दधे । भावे लिट् । राजराजो यक्षराजः । 'राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रियशक्रयोः' इति विश्वः । तस्यानुचरः पूर्वोक्तयक्षोऽस्य मुनेरादेशं साक्षादिव प्रदेशमर्जुनाधिष्ठितस्थानमाधितष्ठौ । प्राप्त इत्यर्थः । 'स्थादिष्वभ्यासेन चाभ्यासस्य' इति षत्वम् ॥

कृतानतिर्व्याहृतसान्त्ववादे
जातस्पृहः पुण्यजनः स जिष्णौ ।
इयाय सख्याविव संप्रसादं
विश्वासयत्याशु सतां हि योगः ॥३१॥

कृतेति ॥ स पुण्यजनो यक्षः कृतानतिः कृतप्रणामः सन्व्याहृतसान्त्ववादे उक्तप्रियवचने । 'व्याहार उक्तिर्लपितम्' इत्यमरः । जिष्णावर्जुने जातस्पृहो जातानुरागः सन् । सख्यौ सुहृदीव । 'अथ मित्रं सखा सुहृत्' इत्यमरः । संप्रसादं विश्रम्भमियाय प्राप । तथाहि । सतां साधूनां योगः संगतिराशु विश्वासयति विश्वासं जनयति हि । सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥

अथोष्णभासेव सुमेरुकुञ्जा-
न्विहीयमानानुदयाय तेन ।
बृहद्द्युतीन्दुःखकृतात्मलाभं
तमः शनैः पाण्डुसुतान्प्रपेदे ॥ ३२ ॥

अथेति ॥ अथोष्णभासा सूर्येणोदयाय पुनरुद्गमाय विहीयमानांस्त्यज्यमानानिति तमःप्राप्तिकारणोक्तिः । बृहद्द्युतीन् । सौवर्णत्वाद्दीप्यमानानित्यर्थः । इति तमसः संकोचकारणोक्तिः । सुमेरुकुञ्जानिव । अत्र सुमेरुग्रहणं कुञ्जानां सौवर्णत्वद्योतनार्थम् । तेनार्जुनेनोदयाय श्रेयसे विहीयमानान्बृहद्द्युतीननेकबुद्धिप्रकाशान् । पूर्ववद्विशेषणद्वयस्य प्र-

योजनमनुसंधेयम् । पाण्डुसुतान् । चतुर इति शेषः । दुःखेन कृच्छ्रेण कृत उपपादित आत्मलाभ उत्पत्ति-र्यस्य तत्तथोक्तम् । तेषां विवेकित्वात्कथंचिल्लब्धोद-यमित्यर्थः । तमः शोकोऽन्धकारश्च । 'तमोऽन्धकारे स्वर्भानौ तमः शोके गुणान्तरे' इत्युभयत्रापि वि-श्वः । शनैर्मन्दं प्रपेदे । तेषां विवेकित्वाद्भीतभीत-मिवेति भावः । अत्र तमःशब्दस्य श्लिष्टत्वाच्छ्लेषा-नुप्राणितेयमुपमा ॥

असंशयालोचितकार्यनुन्नः
प्रेम्णा समानीय विभज्यमानः ।
तुल्याद्विभागादिव तन्मनोभि-
र्दुःखातिभारोऽपि लघुः स मेने ॥ ३३ ॥

असंशयेति ॥ असंशयमसंदिग्धं यथा तथालो-चितं विवेचितं यत्कार्यं तेन नुन्नो निरस्त इति लघु-त्वहेतूक्तिः । 'नुदविदोन्दत्राघाह्रीभ्योऽन्यतरस्याम्' इति निष्ठानत्वम् । कार्यगौरवमालोच्य निरस्त इ-त्यर्थः । तथापि प्रेम्णा भ्रातृवात्सल्येन कर्त्रा समा-नीय पुनराकृष्य विभज्यमानः समशोभागी क्रिय-माणः । तुल्येन प्रेम्णा तुल्यःदुःखत्वं भवतीति भा-वः । स पूर्वोक्तो दुःखमेवातिभारोऽपि । अतिभार-भूतमपि दुःखमित्यर्थः । तन्मनोभिस्तेषां चतुर्णां पा-र्थानां मनोभिस्तुल्याद्विभागादिव । पूर्वोक्तात्प्रेमकृ-तात्समविभागादिवेत्यर्थः । वस्तुतस्तु विवेकादेवेति

भायः । पुनर्विभागग्रहणं तस्य हेतुत्वोत्प्रेक्षार्थमनुवादाददोषः । लघुर्मेने मतः । यथैकोऽनेकधा विभज्य बहुभिरुह्यमानो महानपि भारो लघुर्मन्यते तद्वदित्यर्थः ॥

अथैवं प्रेम्णाकृष्यमाणमपि शोकं विवेको निर्जिगायेत्याह—

धैर्येण विश्वास्यतया महर्षे-
स्तीव्रादरातिप्रभवाच्च मन्योः ।
वीर्यं च विद्वत्सु सुते मघोनः
स तेषु न स्थानमवाप शोकः ॥ ३४ ॥

धैर्येणेति ॥ धैर्येण तेषां निसर्गतो निर्विकारचित्तत्वेन तथा महर्षेर्व्यासस्य । प्रवर्तकस्येति शेषः । विश्वास्यतया । श्रद्धेयवचनत्वेनेत्यर्थः । अरातिप्रभवादरातिहेतुकात्तीव्राद्दुःसहान्मन्योः क्रोधाद्धेतोस्तथार्जुनप्रभावपरिज्ञानाच्चेति । हेत्वन्तरं विशेषणमुखेनाह—मघोनः सुतेऽर्जुने वीर्यं च । 'न लोक-' इत्यादिना षष्ठीप्रतिषेधः । विद्वत्सु । ज्ञातवत्स्विति यावत् । 'विदेः शतुर्वसुः' इति वैकल्पिको वस्वादेशः । तेषु पार्थेषु स शोकः स्थानं स्थितिं नावाप न प्राप ॥

तान्भूरिधाम्नश्चतुरोऽपि दूरं
विहाय यामानिव वासरस्य ।
एकौघभूतं तदशर्म कृष्णां
विभावरीं ध्वान्तमिव प्रपेदे ॥ ३५ ॥

तानिति ॥ तत्पार्थास्त्यक्तवच्छर्म सुखम् । 'शर्मशातसुखानि च' इत्यमरः । तद्विरुद्धमशर्म दुःखम् । 'नञ्' इति नञ्समासः । भूरिधाम्नोऽतितेजस्विन इति हानिहेतुत्वोक्तिः । चतुरस्तान्पार्थानपि वासरस्य भूरिधाम्नश्चतुरो यामान्प्रहरानिव । दूरं विहाय त्यक्त्वैकौघभूतमेकराशिभूतं सत् । 'श्रेण्यादयः कृतादिभिः' इत्यर्थे कर्मधारयः । 'श्रेण्यादिराकृतिगणः' इति शाकटायनः । कृष्णां विभावरीं कृष्णपक्षरात्रिं ध्वान्तमिव । कृष्णां द्रौपदीं प्रपेदे प्राप ॥

तुषारलेखाकुलितोत्पलाभे
पर्यश्रुणी मङ्गलभङ्गभीरुः ।
अगूढभावापि विलोकने सा
न लोचने मीलयितुं विषेहे ॥ ३६ ॥

तुषारेति ॥ सा द्रौपदी विलोकनेऽर्जुनावलोकनेऽगूढभावागूढाभिप्रायापि । स्फुटाभिलाषिणीतियावत् । 'भावो लीलाक्रियाचेष्टाभूत्यभिप्रायजन्तुषु' इति वैजयन्ती । मङ्गलभङ्गभीरुर्मङ्गलहानेर्भीता सती । पर्यश्रुणी परिगताश्रुके । बाष्पावृते इत्यर्थः । अतएव तुषारलेखाकुलितोत्पलाभे हिमबिन्दुसहितेन्दीवरसंनिभे इत्युपमालंकारः । लोचने मीलयितुं न विषेहे न शशाक । अश्रुणोर्दृष्ट्यावरकत्वेऽपि तन्निपातस्यामङ्गलत्वात्तन्निवर्तकं निमीलनं सा न चकारेत्यर्थः ॥

अकृत्रिमप्रेमरसाभिरामं
रामार्पितं दृष्टिविलोभि दृष्टम्
मनःप्रसादाञ्जलिना निकामं
जग्राह पाथेयमिवेन्द्रसूनुः ॥ ३७ ॥

अकृत्रिमेति ॥ इन्द्रसूनुरर्जुनः । क्रियया निर्वृत्तः कृत्रिमः । 'ड्वितः क्त्रिः' इति क्त्रिः । 'क्त्रेर्मम्नित्यम्' इति मप्प्रत्ययः । तद्विरुद्धम् । प्रेमैव रसः । अकृत्रिमेण प्रेमरसेनाभिरामम् । अन्यत्र प्रेमरसेन मधुरादिना चाभिरामम् । रामया रमण्यार्पितम् । दृष्टिं विलोभयतीति दृष्टिविलोभि दृष्टिप्रियमित्यर्थः । दृष्टं दर्शनम् । 'नपुंसके भावे क्तः' मनःप्रसादः । प्रसन्नं मन इत्यर्थः । सोऽञ्जलिरिवेत्युपमितसमासः । तेन मनःप्रसादाञ्जलिना । पथि साधु पाथेयं शम्बलमिव । 'पथ्यतिथिवसतिस्वपतेर्ढञ्' । निकाममतिशयेन जग्राह। रामार्पितं पाथेयं पथि क्षेमाय भवतीत्यागमः॥

धैर्यावसादेन हृतप्रसादा
वन्यद्विपेनेव निदाघसिन्धुः ।
निरुद्धबाष्पोदयसन्नकण्ठ-
मुवाच कृच्छ्रादिति राजपुत्री ॥ ३८॥

धैर्येति ॥ वन्यद्विपेन । वन्यग्रहणमुच्छृङ्खलत्वद्योतनार्थम् । निदाघसिन्धुर्ग्रीष्मनदीव । निदाघग्रहणं दौर्बल्यद्योतनार्थम् । धैर्यावसादेन धैर्यभ्रंशेन कर्त्रा हृतप्रसादा हृतनैर्मल्या । क्षोभं गमितेत्यर्थः । राज-

पुत्री क्षत्रियसुता द्रौपदी। अतः क्षात्रयुक्तमेव वक्ष्यतीति भावः। निरुद्धबाष्पोदयं संरुद्धरोदनं सन्नकण्ठं हीनस्वरम्। अथ तयोरुभयोः कृतबहुव्रीह्योः क्रियाविशेषणयोर्विशेषणसमासः। कृच्छ्रात्कथंचिदिति वक्ष्यमाणमुवाच॥

मग्नां द्विषच्छद्मनि पङ्कभूते
संभावनां भूतिमिवोद्धरिष्यन्।
आधिद्विषामा तपसां प्रसिद्धे-
रस्मद्विना मा भृशमुन्मनीभूः॥ ३९॥

मग्नामिति॥ पङ्कभूते पङ्कोपमिते। 'भूतं क्ष्मादौ पिशाचादौ न्याय्ये सत्योपमानयोः' इति विश्वः। द्विषच्छद्मनि शत्रुकपटे मग्नाम्। दुरुद्धरामित्यर्थः। संभावनां योग्यताम्। गौरवमिति यावत्। भूतिं संपदमिव। 'भूतिर्भस्मनि संपदि' इत्यमरः। उद्धरिष्यन्। उद्धारकस्त्वमिति शेषः। आधिद्विषां दुःखच्छिदां तपसामा प्रसिद्धेः सम्यक्सिद्धिपर्यन्तमस्मद्विना। अस्माभिर्विनेत्यर्थः। 'पृथग्विना–' इत्यादिना विकल्पात्पञ्चमी। भृशं मोन्मनीभूः। अस्मद्विरहाद्दुर्मना मा भूरित्यर्थः। दौर्मनस्यस्य तपःपरिपन्थित्वादिति भावः। 'माङि–' इत्याशीरर्थे लुङ्। 'न माङ्योगे' इत्यडागमप्रतिषेधः। अनुन्मना उन्मनाः संपद्यमान उन्मनी। अभूततद्भावे च्विः। 'अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च' इति सकारलोपः। 'अस्य च्वौ' इतीकारः॥

अथानौत्सुक्यदार्ढ्यार्थं तस्य सर्वार्थसिद्धिनिदानत्वमाह—

यशोऽधिगन्तुं सुखलिप्सया वा
मनुष्यसंख्यामतिवर्तितुं वा ।
निरुत्सुकानामभियोगभाजां
समुत्सुकेवाङ्कमुपैति सिद्धिः ॥ ४० ॥

यश इति ॥ यशोधिगन्तुम् । कीर्तिं लब्धुमित्यर्थः । सुखस्य लिप्सया लब्धुमिच्छया वा । मनुष्यसंख्यां मनुष्यगणनामतिवर्तितुमतिक्रमितुं वा । अमानुषं कर्म कर्तुं वेत्यर्थः । अभियोगभाजामभिनिवेशवतां निरुत्सुकानामनुत्सुकानाम् । अदुर्मनायमानानामित्यर्थः । सिद्धिः पूर्वोक्तं यशः सुखाद्यर्थसिद्धिश्च । समुत्सुकेवानुरक्तकान्तेवाङ्कमुत्सङ्गमन्तिकं चोपैति । तस्मादस्माद्विरहदुःखमातपःसिद्धेः सोढव्यमिति भावः ॥

अथास्य मन्यूद्दीपनद्वारा तपःप्रवृत्तिं प्रथयितुमरिनिकारं तावच्चतुर्भिरुद्घाटयति—

लोकं विधात्रा विहितस्य गोप्तुं
क्षत्रस्य मुष्णन्वसु जैत्रमोजः ।
तेजस्विताया विजयैकवृत्ते-
र्निघ्नन्प्रियं प्राणमिवाभिमानम् ॥ ४१ ॥

लोकमिति ॥ विधात्रा ब्रह्मणा लोकं गोप्तुं वि-

हितस्य सृष्टस्य क्षत्रस्य क्षत्रियजातेः संबन्धि । जय-नशीलं जेतृ तदेव जैत्रम् । जेतृशब्दात्तृन्नन्तात् 'प्र-ज्ञादिभ्यश्च' इति स्वार्थेऽणप्रत्ययः । ओजोबलं दीप्तिर्वा 'ओजो बले च दीप्तौ च' इति विश्वः । तदेव वसु धन-मिति रूपकालंकारः । मुष्णन्नपहरन् । अरिनिकृतस्य कुतः क्षात्रं तेज इति भावः । किंच विजयैकवृत्तेर्वि-जयैकजीवितायाः । 'क्षत्रियस्य विजितव्यम्' इति स्मरणादिति भावः । 'वृत्तिर्वर्तनजीवने' इत्यमरः । तेजस्वितायाः तेजस्विनामित्यर्थः । तेजःप्राधान्यद्यो-तनार्थं भावप्रधानो निर्देशः । प्रियं प्राणमिव । प्राण-सममित्यर्थः । अभिमानमहंकारं निघ्नन्खण्डयन् । तेजस्विनां प्राणहानिप्राया मानहानिरिति भावः ॥

'अधिक्षेपाद्यसहनं तेजः प्राणात्ययेष्वपि' न त्या-ज्यमित्याह—

व्रीडानतैराप्तजनोपनीतः
संशय्य कृच्छ्रेण नृपैः प्रपन्नः ।
वितानभूतं विततं पृथिव्यां
यशः समूहन्निव दिग्विकीर्णम् ॥ ४२ ॥

व्रीडेति । पुनश्च । आप्तजनेनोपनीतः साधितः । प्रापित इत्यर्थः । तथापि संशय्य संदिह्य । असंभावि-तबुद्धयेति भावः । व्रीडानतैः । जुगुप्सितवृत्तान्तश्र-वणादिति भावः । नृपैर्देशान्तरस्थैः कृच्छ्रेण प्रपन्नः । आप्तोक्तत्वात्कथंचिद्विश्वस्त इत्यर्थः । यः शृण्वताम-

पि दुःसहः किमुतानुभवतामिति भावः। इत्येषा पूर्वेषां व्याख्या। अन्यथा च व्याख्यायते—आप्तजनोपनीतो ज्ञातिकुलः संशय्य कथमिदमन्यायय्यमुपेक्ष्यमिति विचार्य व्रीडाननैः। जुगुप्सितकर्मदर्शनादिति भावः। नृपैस्तत्रत्यैः कृच्छ्रेण प्रपन्नोऽङ्गीकृतः। गोत्रकलहेषु मध्यस्थैरुदासितव्यमिति बुद्ध्योपेक्षित इत्यर्थः। पक्षद्वयेऽपि प्रपन्न इत्यत्राप्तजनोपनीतत्वस्य पदार्थभूतस्य विशेषणगत्या हेतुत्वोक्त्या काव्यलिङ्गमलंकारः। पृथिव्यां वितानभूतमुल्लोचोपमितम्। यद्वा वितानभूतं वितानसमम्। उल्लोचतुल्यमिति यावत्। 'युक्ते क्ष्मादावृते भूते प्राण्यतीते समे त्रिषु' इत्यमरः। 'अस्त्री वितानमुल्लोचः' इत्यमरः। दिग्विकीर्णं दिगन्तलग्नम्। वितानमपि दिगन्तलग्नमिति भावः। विततं प्रथितं यशः समूहन्निव संकोचयन्निवेत्युत्प्रेक्षा। अरातिपरिभूतस्य कुतः कीर्तिरिति भावः॥

वीर्यावदानेषु कृतावमर्ष-
स्तन्वन्नभूतामिव संप्रतीतिम्।
कुर्वन्प्रयामक्षयमायतीना-
मर्कत्विषामह्न इवावशेषः॥ ४२॥

वीर्येति॥ पुनश्च। वीर्याख्येष्ववदानानि तेषु कृतावमर्षः कृतास्कन्दनः। पुराकृतपराक्रमजातान्यपि प्रमृजन्नित्यर्थः। 'अवदानं कर्म वृत्तम्' इत्यमरः। अतएव संप्रतीतिं ख्यातिम्। 'प्रतीते प्रथितख्यातवित्त-

विज्ञातविश्रुताः' इत्यमरः । अभूतामविद्यमानामिवे-त्युत्प्रेक्षा । सतोऽप्यसत्त्वमुत्प्रेक्ष्यते । तन्वन्कुर्वन् । पुनश्चाह्नोऽवशेषो दिनान्तोऽर्कत्विषामिवायतीनामुत्तरकालानां प्रथमक्षयं दैर्घ्यनाशं कुर्वन्निति श्रौती पूर्णोपमा । अरिनिराकृतस्य कुतश्चिरावस्थानमिति भावः ॥

प्रसह्य योऽस्मासु परैः प्रयुक्तः
स्मर्तुं न शक्यः किमुताधिकर्तुम् ।
नवीकरीष्यत्युपशुष्यदार्द्रः
स त्वद्विना मे हृदयं निकारः ॥ ४४ ॥

प्रसह्येति ॥ पुनश्च । परैः शत्रुभिरस्मासु प्रसह्य प्रयुक्त आचरितो यो निकारः परिभवः केशाकर्षणरूपः स्मर्तुं न शक्यः । अधिकर्तुमनुभवितुं किमुत । यस्य स्मरणमपि दुःसहमनुभवस्तु दुःसह इति किमु वक्तव्यमित्यर्थः । स निकारस्त्वद्विना त्वया विना । 'पृथग्विना-' इत्यादिना पञ्चमी । आर्द्रः सन्कुतश्चिदभिभूतात्पुराणप्रहार इव । त्वद्विरहदुःखात्पुनर्नवीकरिष्यति । नवीभविष्यतीत्यर्थः । उपशुष्यत् । त्वया विना शुष्कमिति भावः । दुःखस्तम्भनं शोषपदार्थो मे हृदयं नवीकरिष्यत्यार्द्रीकरिष्यति । व्रणमिवेति भावः । दुखितस्य पुनर्दुःखोपचयः प्रशान्तप्रायमपि दुःखहेतुं पुनरुद्धाटयतीत्यर्थः । अत्र शोषादिविशेषणसाम्याद्व्रणाद्यप्रस्तुतार्थप्रतीतेः समासोक्तिरलंकारः ॥

पुनः प्रकारान्तरेण मन्युमुद्दीपयति 'प्राप्तः–' इत्यादिभिस्त्रिभिः । तत्र वक्ष्यमाणप्रत्यभिज्ञानहेतुभिर्धनंजयं विशिनष्टि—

प्राप्तोऽभिमानव्यसनादसह्यं
दन्तीव दन्तव्यसनाद्विकारम् ।
द्विषत्प्रतापान्तरितोरुतेजाः
शरद्घनाकीर्ण इवादिरह्नः ॥ ४५ ॥

अभिमानस्य व्यसनाद्भ्रंशात् । 'व्यसनं विपदि भ्रंशे दोषे कामजकोपजे' इत्यमरः । दन्तव्यसनाद्दन्तभङ्गाद्दन्तीवासह्यं विकारं वैरूप्यं प्राप्तः । अतो न प्रत्यभिज्ञायत इति भावः । एवमुत्तरत्राप्यनुसंधेयम् । पुनश्च । द्विषत्प्रतापेन शत्रुतेजसान्तरितं तिरस्कृतमुरु तेजः प्रतापो यस्य स तथोक्तः । अतएव शरद्घनाकीर्णः शरन्मेघच्छन्नोऽह्न आदिः प्रत्यूष इव स्थितः । तद्वदेवाप्रत्यभिज्ञायमान इत्यर्थः । मध्याह्नस्तु मेघावरणेऽपि कथंचित्प्रत्यभिज्ञायत एवेत्याद्यपेनोक्तमादिरिति ॥

सव्रीडमन्दैरिव निष्क्रियत्वान्-
नात्यर्थमस्त्रैरवभासमानः ।
यशःक्षयक्षीणजलार्णवाभ-
स्त्वमन्यमाकारमिवाभिपन्नः ॥ ४६ ॥

सव्रीडेति ॥ पुनश्च । निष्क्रियत्वादर्थक्रियाशून्यत्वात्सव्रीडमन्दैरिव सव्रीडैरतएव मन्दैरपटुभिरिव स्थितैरित्युत्प्रेक्षा । 'मूढाल्पापटुनिर्भाग्या मन्दाः'

इत्यमरः । अस्मैरत्यर्थं नावभासमानो न प्रकाशमानः । पूर्वं तु नैवमिति भावः । किंतु यशःक्षयाद्धेतोः क्षीणजलो योऽर्णवस्तदाभस्तत्सदृशस्त्वमन्यमाकारमभिपन्नः प्राप्त इव स्थित इवेत्युत्प्रेक्षा । तस्य क्षीणजलार्णवाभ इत्युपमासंसृष्टिः ॥

दुःशासनामर्षरजोविकीर्णै-
रेभिर्विनाथैरिव भाग्यनाथैः ।
केशैः कदर्थीकृतवीर्यसारः
कच्चित्स एवासि धनंजयस्त्वम् ॥ ४७ ॥

दुःशासनेति ॥ पुनश्च । दुःशासनस्य कर्तुरामर्ष आमर्षणमाकर्षणं स एव रजो धूलिः । मालिन्यहेतुत्वादिति भावः । तेन विकीर्णैर्विक्षिप्तैरतएव विनाथैरिव स्थितवतां युष्माकमसत्त्वप्रायत्वादनाथैरिव । स्थितैरित्युत्प्रेक्षा । अन्यथा कथमियं दुर्दशेति भावः । किंतु भाग्यनाथैर्दैवमात्रशरणैः । अन्यथा स्वरूपमपि लुप्येतेति भावः । एभिः परिदृश्यमानैः । असंयमितैरिति भावः । केशैः शिरोरुहैः कुत्सितोऽर्थो वस्तु कदर्थः । 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिषु' इत्यमरः । 'कोः कत्तत्पुरुषेऽचि' इति कुशब्दस्य कदादेशः । कदर्थीकृतौ गर्हार्थीकृतौ वीर्यसारौ शौर्यबले यस्य स तथोक्तः । इत्थं पूर्वविलक्षणस्त्वं स एव धनंजयोऽसि कच्चित् । 'कच्चित्कामप्रवेदने' इत्यमरः । स एव चेत्त्वं नैवमस्मानुपेक्षस इति भावः ॥

अथाप्युपेक्षणे दोषमाह-

स क्षत्रियस्त्राणसहः सतां य-
स्तत्कार्मुकं कर्मसु यस्य शक्तिः ।
वहन्द्वयीं यद्यफलेऽर्थजाते
करोत्यसंस्कारहतामिवोक्तिम् ॥ ४८ ॥

स इति ॥ क्षतात्त्रायत इति क्षत्रं क्षत्रियकुलम् । 'सुपि' इति योगविभागात्कप्रत्ययः । पृषोदरादित्वात्पूर्वपदस्यान्त्यलोपः । अथवा क्षदिति क्विबन्तोपपदात्कप्रत्ययः । क्षत्रे जातः क्षत्रियः । 'क्षत्राद्घः' इति घप्रत्ययः । कर्मणे प्रभवतीति कार्मुकम् । 'कर्मण उकञ्' इत्युकञ्प्रत्ययः । एवं स्थिते वाक्यार्थः कथ्यते । यः सतां साधूनाम् । सहत इति सहः । पचाद्यच् । यस्त्राणस्य सहस्त्राणसहो रक्षणक्षमः स एव क्षत्रियशब्दवाच्यः । तथा यस्य कार्मुकस्य कर्मसु रणक्रियासु शक्तिः । अस्तीति शेषः । तदेव कार्मुकशब्दवाच्यम् । अत्रैवैतौ शब्दौ मुख्यौ । नान्यत्रेत्यर्थः । एवं स्थिते द्वयीं द्विविधामुक्तिम् । द्वाविमौ क्षत्रियकार्मुकशब्दावित्यर्थः । अफले । पूर्वोक्तावयवार्थशून्ये अर्थजाते । स्वाभिधेयसामान्यजातिमात्र इत्यर्थः । 'जातं जात्योघजन्मसु' इति विश्वः । वहन्वर्तयन् । असंस्कारहतामव्युत्पत्तिदूषितामिव करोतीत्युत्प्रेक्षा । तस्मात्त्वमस्मद्रक्षणेनोक्तदोषादात्मानं मोचयस्वेत्यर्थः ॥

अथ त्वद्गुणा अपि नोज्जीवयेयुरित्याह—

वीतौजसः संनिधिमात्रशेषा
भवत्कृतां भूतिमपेक्षमाणाः ।

समानदुःखा इव नस्त्वदीयाः
सरूपतां पार्थ गुणा भजन्ते ॥ ४९ ॥

वीतेति ॥ हे पार्थ, वीतौजसो निष्प्रभाः संनिधिमात्रशेषाः सत्तामात्रावशिष्टा भवत्कृतां भवता करिष्यमाणाम्। 'आशंसायां भूतवच्च' इति भूतवत्प्रत्ययः। भूतिमभ्युदयमपेक्षमाणास्त्वदीया गुणाः समानदुःखाः। समदुःखभाज इव नोऽस्माकं सरूपतां वीतौजस्त्वादिसाधर्म्यं भजन्त इत्युपमा। सा च समानदुःखा इवेत्युत्प्रेक्षया वीतौजस्त्वादिसंभावितयानुप्राणितेत्यनुसंधेयम् ॥

तथापि ममैव कोऽयं भार इत्यत आह—

आक्षिप्यमाणं रिपुभिः प्रमादा-
न्नागैरिवालूनसटं मृगेन्द्रम्।
त्वां धूरियं योग्यतयाधिरूढा
दीप्त्या दिनश्रीरिव तिग्मरश्मिम्॥५०॥

आक्षिप्येति ॥ प्रमादात्प्रज्ञाहीनत्वात्। नतु दौर्बल्यादिति भावः। रिपुभिराक्षिप्यमाणमधिक्षिप्यमाणमतएव प्रमादात्। नागैर्गजैः। 'ग्रहेभाहिगजा नागाः' इति वैजयन्ती। आलूनसटमाच्छिन्नकेसरम्। 'सटा जटाकेसरयोः' इत्यमरः। मृगेन्द्रं सिंहमिव स्थितम्। त्वामियं धूः कार्यभारः। तिग्मरश्मिं सूर्यं दीप्त्या दिनश्रीरिव योग्यतया निर्वाहकतयाधिरूढारूढवती। कर्तरि क्तः। त्वदधीनेत्यर्थः॥

पूर्वं निर्व्यवसायस्य 'स त्वक्रियः' इत्यादिना दोष उक्तः। संप्रति व्यवसायिनो गुणमाह—

करोति योऽशेषजनातिरिक्तां
संभावनामर्थवतीं क्रियाभिः।
संसत्सु जाते पुरुषाधिकारे
न पूरणी तं समुपैति संख्या ॥ ५१ ॥

करोतीति ॥ यः पुमानशेषजनादितरजनादतिरिक्तामधिकाम्। सर्वातिशायिनीमित्यर्थः। संभावनां योग्यतां क्रियाभिश्चरितैरर्थवतीं सफलां करोति। तं पुमांसं संसत्सु सभासु। 'सभासमितिसंसदः' इत्यमरः। पुरुषाधिकारे योग्यपुरुषगणनाप्रस्तावे जाते सति। पूर्यतेऽनयेति पूरणी संख्या द्वित्वादिसंख्या न समुपैति न गच्छति। अद्वितीयो भवतीत्यर्थः। तस्मादसाधारणलाभाय त्वयापि महानुत्साह आस्थेय इति भावः ॥

अथ द्वाभ्यां सुलभविपक्षस्य प्रोषितस्यार्जुनस्य कर्तव्यमुपदिशति—

प्रियेषु यैः पार्थ विनोपपत्ते-
र्विचिन्त्यमानैः क्लममेति चेतः।
तव प्रयातस्य जयाय तेषां
क्रियादघानां मघवा विघातम् ॥ ५२ ॥

प्रियेष्विति ॥ हे पार्थ, प्रियेष्वस्मासु विषय उपपत्तेः कारणाद्विनैव विचिन्त्यमानैरकस्मादेवाश-

क्रुध्यमानैर्यैरघैश्चेतः क्लमं खेदमेति । जयाय प्रयातस्य तव संबन्धिनां तेषामघानां व्यसनानाम् । 'दुःखैनो-व्यसनेष्वघम्' इत्यमरः । मघवेन्द्रः । योऽस्माभिरुपा-स्यत इति भावः । विघातं निवारणं क्रियात्करोतु । आशिषि लिङ् । तस्मादस्मच्चिन्तया न चेतः खेदयि-तव्यं जयार्थिना त्वया । अन्यथा तदसंभवादि-ति भावः ॥

मागाश्चिरायैकचरः प्रमादं
वसन्नसंबाधशिवेऽपि देशे ।
मात्सर्यरागोपहतात्मनां हि
स्खलन्ति साधुष्वपि मानसानि ॥५३॥

मागा इति ॥ असंबाधोऽसंकटः । विजन इत्य-र्थः । 'संकटं ना तु संबाधः' इत्यमरः । शिवो निर्बा-धः । द्वयोरन्यतरस्य विशेष्यत्वविवक्षायां विशेषण-समासः । अस्मिन्नसंबाधशिवेऽपि देशे चिराय चि-रमेकश्चासौ चरश्चेत्येकचर एकाकी वसन्प्रमादं दौर्ब-ल्यं मा गाः । 'इणो गा लुङि' इति गादेशः । ननु निःस्पृहस्य ममाकिंचित्करः प्रमाद इति वाच्यमि-त्याशङ्क्याह –मात्सर्येति । मत्सर एव मात्सर्यं द्वेषो रागः स्नेहस्ताभ्यामुपहतात्मनां रागद्वेषदूषितस्वभा-वानां मानसानि मनांसि साधुषु सज्जनेष्वपि विषये स्खलन्ति विकुर्वते हि । अत्र प्रमादनिषेधलब्धाप्रमा-दरूपकारणेनार्थप्राप्तिरूपकार्यस्य व्यतिरेककारणसम-र्थनाद्वैधर्म्येण कार्यकारणसमर्थनरूपोऽर्थान्तरन्यासः ॥

निगमयति—

तदाशु कुर्वन्वचनं महर्षे-
र्मनोरथान्नः सफलीकुरुष्व ।
प्रत्यागतं त्वास्मि कृतार्थमेव
भुजोपपीडं परिरब्धुकामा ॥ ५४ ॥

तदिति ॥ तत्तस्मात्कारणात् । आशु शीघ्रं महर्षेर्वचनं कुर्वन् । तपस्यन्नित्यर्थः । नोऽस्माकं मनोरथान्सफलीकुरुष्व । अरिनिर्यातनेनास्मान्प्रतिष्ठापयेत्यर्थः । प्रार्थनायां लोट् । किंच कृतार्थं कृतकृत्यं प्रत्यागतमेव त्वा त्वाम् । 'त्वामौ द्वितीयायाः' इति त्वादेशः । भुजयोरुपपीड्य भुजोपपीडम् । 'सप्तम्यां चोपपीडरुधकर्षः' इति णमुल् । परिरब्धुं कामो यस्याः सा परिरब्धुकामास्मि । 'तुंकाममनसोरपि' इति मकारलोपः ।

उदीरितां तामिति याज्ञसेन्या
नवीकृतोद्ग्राहितविप्रकाराम् ।
आसाद्य वाचं स भृशं दिदीपे
काष्ठामुदीचीमिव तिग्मरश्मिः ॥ ५५ ॥

उदीरितामिति । सोऽर्जुन इतीत्थं यज्ञसेनस्यापत्येन स्त्रिया याज्ञसेन्या द्रौपद्योदीरितामुक्ताम् । नवीकृतः पुनरुद्घाटनेन तथा प्रत्यायितोऽतएवोद्ग्राहितो मनसि निधापितश्च विप्रकारः परिभवो यया सा तां वाचमासाद्य । आकर्ण्येत्यर्थः । उदीचीं का-

च्छां दिशम् । 'दिशस्तु ककुभः काष्ठा आशाश्च ह-रितश्च ताः' इत्यमरः । तिग्मरश्मिरिव भृशं दिदी-पे जज्वाल । चुक्रोधेत्यर्थः ॥

अथाभिपश्यन्निव विद्विषः पुरः
पुरोधसारोपितहेतिसंहतिः ।
बभार रम्योऽपि वपुः स भीषणं
गतः क्रियां मन्त्र इवाभिचारिकीम् ॥५६॥

अथेति ॥ अथ विद्विषः शत्रून्पुरोऽभिपश्यन्निव स्थितस्तथा पुरोधसा धौम्येनारोपिता समन्त्रमाहि-ता हेतिसंहतिरायुधकलापो यस्य स तथोक्तः । 'हे-तिर्ज्वालाङ्कुरायुधे' इति वैजयन्ती । सोऽर्जुनो र-म्यः सौम्यः सन्नपि । अभिचारः परहिंसा प्रयोजनं यस्याः साभिचारिकी । 'प्रयोजनम्' इति ठञ् । तां क्रियां गतः । अभिचारकर्मणि नियुक्त इत्यर्थः । म-न्त्र इव । रम्यः प्रकृत्या रमणीयः । भीषयत इति भीषणम् ।नन्द्यादित्वाल्ल्युप्रत्ययः। वपुर्बभार । प्रशा-न्तो मन्त्रः प्रयोगभेदादिव । सोऽप्यवस्थाभेदाद्भीषणो बभूवेत्यर्थः ॥

उक्तमायुधारोपणं विवृण्वन्प्रस्थानमाह त्रि-भिः—

अविलङ्घ्यविकर्षणं परैः
प्रथितज्यारवकर्म कार्मुकम् ।
अगतावरिदृष्टिगोचरं
शितनिस्त्रिंशयुजौ महेषुधी ॥ ५७ ॥

अविलङ्घ्येति ॥ परैः शत्रुभिरविलङ्घ्यमनतिक्रमणीयं विकर्षणं यस्य तत् । अमोघाकर्षणमित्यर्थः । किंच प्रथितो ज्यारवो गुणध्वनिः कर्म बाणमोक्षणादिकं च यस्य तत्कार्मुकं चोद्वहन्नित्यन्वयः । तथारीणां दृष्टिगोचरं दृष्टिपथमगतौ । आहवेच्छानिवर्तित्वादस्येति भावः । निर्गतस्त्रिंशतोऽङ्गुलिभ्यो निस्त्रिंशः खड्गः । डच्प्रत्यये संख्यायास्तत्पुरुषस्योपसंख्यानात्समासान्तः । तेन शितेन तीक्ष्णेन युङ्क्त इति शितनिस्त्रिंशयुजौ । 'सत्सूद्विष–' इत्यादिना क्विप् । महेषुधी महानिषङ्गौ । इषवो धीयन्तेऽनयोरिति विग्रहः । 'कर्मण्यधिकरणे च' इति किप्रत्ययः । 'तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः । तूण्यां, खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टयः ॥' इत्यमरः ॥

यशसेव तिरोदधन्मुहु-
र्महसा गोत्रभिदायुधक्षतीः ।
कवचं च सरत्नमुद्वहन्
ज्वलितज्योतिरिवान्तरं दिवः ॥ ५८ ॥

यशसेति ॥ किंच । गोत्रभिद इन्द्रस्यायुधक्षतीर्वज्रप्रहाररन्ध्राणि । वासवदाहसंभवादिति भावः । महसा स्वकान्त्या यशसेव मूर्त्या कीर्त्येव मुहुस्तिरोदधदाच्छादयन् । सरत्नं रत्नसहितमतएव ज्वलितज्योतिर्दीप्ततारकम् । 'ज्योतिस्ताराग्निभाज्वालादृक्पुत्रार्थधरात्मसु' इति वैजयन्ती । दिवोऽन्तरं नभोमध्यमिवावस्थितम् । 'अन्तरं परिधानीये बाह्ये

स्वीयेऽन्तरात्मनि । 'क्लीबे मध्ये प्रकाशे च' इति वैजयन्ती । कचवं चोद्वहन् ॥

अलकाधिपभृत्यदर्शितं
शिवमुर्वीधरवर्त्म संप्रयान् ।
हृदयानि समाविवेश स
क्षणमुद्बाष्पदृशां तपोभृताम् ॥ ५९ ॥

अलकेति ॥ सोऽर्जुनोऽलकाधिपभृत्येन यक्षेण दर्शितमतः शिवं निर्बाधमुर्वीधरवर्त्म हिमवन्मार्गं प्रति संप्रयान्प्रगच्छन् । क्षणमुद्बाष्पदृशां वियोगदुःखात्साश्रुनेत्राणां तपोभृतां द्वैतवननिवासिनां तपस्विनां हृदयानि समाविवेश । खेदयामासेत्यर्थः ॥

अनुजगुरथ दिव्यं दुन्दुभिध्वानमाशाः
सुरकुसुमनिपातैर्व्योम्नि लक्ष्मीर्वितेने ।
प्रियमिव कथयिष्यन्नालिलिङ्ग स्फुरन्तीं
भुवमनिभृतवेलावीचिबाहुः पयोधिः॥६०॥

इति भारविकृतौ महाकाव्ये किरातार्जुनीये
तृतीयः सर्गः ।

अनुजगुरिति ॥ अथाशा दिशः । दिवि भवं दिव्यम् । 'दिवादिभ्यो यत्' । दुन्दुभिध्वानमनुजगुरनुदध्वनुः । गायतेर्लिट् । व्योम्नि सुरकुसुमनिपातैर्लक्ष्मीर्वितेने । पुष्पवृष्टिश्चाजनिष्टेत्यर्थः । किंच । अनिभृताश्चञ्चला वेलायां कूले या वीचयस्ता एव बा-

ङ्गो यस्य स तथोक्तः । 'वेला कूलविकारयोः' इति शाश्वतः । पयोधिः स्फुरन्तीमुल्लसन्तीं हर्षात्स्पन्दमानां च भुवं प्रियमिष्टं भारावतारणरूपं कथयिष्यन्निव । कथयितुमिवेत्यर्थः । 'लृट् शेषे च' इति चकारात्क्रियार्थायां क्रियायां लृट् । आलिलिङ्ग । सर्वं चेदं शिवं दैवकार्यप्रवृत्तत्वादस्येति भावः । अत्र विशेषणमात्रसाम्यादप्रस्तुतस्य गम्यत्वात्समासोक्तिरलंकारः । तत्र चाप्रस्तुतयोर्भूमिसमुद्रयोः प्रतिपन्नाभ्यां नायकाभ्यां भेदेऽभेदलक्षणातिशयोक्तिवशादालिङ्गनोक्तिरिति रहस्यम् । एवमतिशयोक्त्यनुप्राणिता समासोक्तिः । प्रियकथनात्स्नेहमुज्जीवयति तदङ्गभावं भजत इत्युभयोरङ्गाङ्गिभावेन संकर इति विवेचनीयम् ॥

इति श्रीमहामहोपाध्यायकोलाचलमल्लिनाथसूरिविरचितायां किरातार्जुनीयकाव्यव्याख्यायां घण्टापथसमाख्यायां तृतीयः सर्गः समाप्तः ॥

अथ

शिशुपालवध-काव्यस्य

द्वितीयः सर्गः ।

अस्मिन्सर्गे मन्त्रवर्णनाय बीजं वपति—

यियक्षमाणेनाहूतः पार्थेनाथ द्विषन्मुरम् ।

अभिचैद्यं प्रतिष्ठासुरासीत्कार्यद्वयाकुलः ॥ १ ॥

यियक्षमाणेनेति ॥ अथेन्द्रसंदेशश्रवणानन्तरं यियक्षमाणेन यष्टुमिच्छता । यजतेः सन्नन्ताल्लटः शानच् । पार्थेन पृथापुत्रेण युधिष्ठिरेण । 'तस्येदम्' इत्यण् । अन्यथा 'स्त्रीभ्यो ढक्' स्यात् । ततः पार्थेय इति स्यात् । आहूत आकारितः । ह्वयतेः कर्मणि क्ते संप्रसारणदीर्घौ । तथा अभिचैद्यं शिशुपालं प्रति । 'लक्षणेनाभिप्रती आभिमुख्ये' इत्यव्ययीभावः । 'अभिरभागे' इति कर्मप्रवचनीयत्वे तद्योगे द्वितीया वा । प्रतिष्ठासुः प्रस्थातुमिच्छुः । तिष्ठतेः सन्नन्तादुप्रत्ययः । मुरं द्विषन्मुरारिः । 'द्विषोऽमित्रे' इति शतृप्रत्यये 'न लोका—' इत्यत्र 'द्विषः शतुर्वा' इति वैकल्पिकः षष्ठीप्रतिषेधः । कार्यद्वयेन सुरकार्यसुहृत्कार्यरूपेणाकुलो विप्रतिषेधादावश्यकत्वाच्च द्वयोः संदिहान आसीत् । अतो मन्त्रस्यायमवसर इति भावः ॥

एवं मन्त्रबीजसंदेहमुपन्यस्य मन्त्रोचितं देशमाह—

सार्धमुद्धवसीरिभ्यामथासावासदत्सदः ।
गुरुकाव्यानुगां बिभ्रच्चान्द्रीमभिनभः श्रियम् ॥ २॥

सार्धेति ॥ अथ संदेहानन्तरमसौ हरिः। अभिनभः। पूर्ववदव्ययीभावः । कर्मप्रवचनीयत्वे वा द्वितीया । गुरुकाव्यौ बृहस्पतिशुक्रावनुगावनुयायिनौ यस्यां ताम्। 'गीर्पतिर्धिषणो गुरुः' इति, 'शुक्रो दैत्यगुरुः काव्यः' इति चामरः । चन्द्रस्येमां चान्द्रीं श्रियं बिभ्रत् । अत्र श्रीतुल्यां श्रियमिति निदर्शनाभेदः—उद्धवसीरिभ्यां सार्धमुद्धवरामाभ्यां सह, सदः सभामासददगमत् । राजसदसः प्रासादत्वादिति भावः । सदेर्लुङि 'पुषादि–' इति च्लेरङादेशः । अत्र मनुः—'गिरिपृष्ठं समारुह्य प्रासादं वा रहोगतः । अरण्ये निःशलाके वा मन्त्रयेद्राबभाविनौ' ॥ इति ॥

जाज्वल्यमाना जगतः शान्तये समुपेयुषी ।
व्यद्योतिष्ट सभावेद्यामसौ नरशिखित्रयी ॥ ३॥

जाज्वल्यमानेति ॥ जगतः शान्तयेऽनुपद्रवाय समुपेयुषी मिलिता जाज्वल्यमाना भृशं ज्वलन्ती । 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' । ततो लटः शानजादेशे टाप् । असौ नराः पुरुषा एव शिखिनोऽग्नयस्तेषां त्रयी । 'द्वित्रिभ्याम्–' इत्यादिना तयस्यायजादेशे कृते 'टिड्ढाणञ्–' इत्यादिना ङीप् । सभा आस्थानी सैव वेदिः । 'वेदिः परिष्कृता भूमिः' इत्यमरः । तस्यां व्यद्योतिष्ट दीप्यते स्म । 'द्युद्भ्यो लुङि' इति वा तङ् । रूपकालंकारः ॥

रत्नस्तम्भेषु संक्रान्तप्रतिमास्ते चकाशिरे ।
एकाकिनोऽपि परितः पौरुषेयवृता इव ॥ ४ ॥

रत्नेति ॥ रत्नानां स्तम्भा इति षष्ठीसमासविशेषे पर्यवसानाद्विकारार्थत्वम् । तेषु संक्रान्तप्रतिमाः संक्रान्तप्रतिबिम्बाः । 'प्रतिमानं प्रतिबिम्बं प्रतिमा–' इत्यमरः । ते अथ एकाकिनोऽसहाया अपि । 'एकादाकिनिच्चासहाये' इत्याकिनिच्प्रत्ययः । परितोऽभितः सर्वतः । 'पर्यभिभ्यां च' इति तसिल्प्रत्ययः । स च सर्वोभयार्थाभ्यामिष्यते । पौरुषेयेण प्रतिबिम्बभूयस्त्वात्पुरुषसमूहेनावृता इवेत्युत्प्रेक्षा । चकाशिरे । 'सर्वपुरुषाभ्यां णढञौ' । 'पुरुषाद्वधविकारसमूहतेनकृतेष्विति वक्तव्यम्' इति समूहे ढञ्प्रत्ययः । एतेन विजनत्वमुक्तम् । यद्यपि 'निस्तम्भे निर्गवाक्षे च निर्भित्त्यन्तरसंश्रये । प्रासादाग्रे त्वरण्ये वा मन्त्रयेद्भावभाविनौ ॥' इति कामन्दकीये मन्त्रभूमेः स्तम्भप्राचुर्यनिषेधो गम्यते, तथापि तस्यापि विजनोपलक्षणत्वाददोष इति भावः ॥

अध्यासामासुरुत्तुङ्गहेमपीठानि यान्यमी ।
तैरूहे केशरिक्रान्तत्रिकूटशिखरोपमा ॥ ५ ॥

अध्यासामासुरिति ॥ अमी त्रयो यान्युत्तुङ्गहेमपीठान्यासनानि अध्यासामासुरधितष्ठुः । येषूपविष्टा इत्यर्थः । 'अधिशीङ्स्थासां कर्म' इति कर्मत्वम् । 'आस उपवेशने' लिट् । 'दयायासश्च' इत्याम्प्रत्ययः । 'कृञ्चानुप्रयुज्यते लिटि' इत्यस्तेरनुप्रयोगः । 'आम्प्र-

त्यग्रवत्कृञोऽनुप्रयोगस्य' इति कृञ एवेति नियमाद-स्तेर्नात्मनेपदम्। तैः पीठैः केशरिभिः सिंहैः कान्तानां त्रिकूटस्य त्रिकूटाद्रेः शिखराणामुपमा सादृश्यमूहे ऊहा। वहेः कर्मणि लिट् संप्रसारणम्। त्रीणि कूटान्यस्येत्यन्वर्थसंज्ञा। 'कूटोऽस्त्री शिखरं शृङ्गम्' इत्यमरः। उपमालंकारः॥

गुरुद्वयाय गुरुणोरुभयोरथ कार्ययोः।
हरिर्विप्रतिषेधं तमाचचक्षे विचक्षणः॥ ६॥

गुर्विति॥ अथोपवेशनानन्तरं विचष्टे इति विचक्षणो वक्ता। कर्तरि ल्युडिति न्यासकारः। 'असनयोश्च प्रतिषेधो वक्तव्यः' इति चक्षिङः ख्याञादेशाभावः। हरिर्गुर्वोरुद्धवरामयोः पितृव्यज्येष्ठभ्रात्रोर्द्वयाय। द्वाभ्यामित्यर्थः। गुरुणोर्महतोरुभयोः कार्ययोः पूर्वोक्तयोः तं विप्रतिषेधं विरोधमाचचक्षे आख्यातवान्। तुल्यबलविरोधो विप्रतिषेधः॥

द्योतितान्तःसभैः कुन्दकुड्मलाग्रदतः स्मितैः।
स्नपितेवाभवत्तस्य शुद्धवर्णा सरस्वती॥ ७॥

द्योतितेति॥ कुन्दं माघभवः पुष्पविशेषः। 'माध्यं कुन्दम्' इत्यमरः। कुन्दकुड्मलाग्राणीव दन्ता यस्य तस्य कुन्दकुड्मलाग्रदतः। 'अग्रान्तशुद्धशुभ्रवृषवराहेभ्यश्च' इत्यग्रान्तपूर्वपदबहुव्रीहेः समासान्तो वैभाषिको दतादेशः। तस्य हरेः सरस्वती अन्तःप्रधाना सभा अन्तःसभा। सभाभ्यन्तरमित्यर्थः। सा द्योतिता प्रकाशिता यैस्तैः स्मितैः स्नपितेव

च्चालितेव। स्नातेर्ण्यन्तात् क्तः। 'अर्तिह्री—'इत्यादिना पुगागमः। मितां ह्रस्वः। शुद्धवर्णा स्फुटाक्षरत्वात्स्वच्छकान्तिरभवत्। अत्र स्वाभाविकवर्णशुद्धेः स्नानहेतुकत्वमुत्प्रेक्ष्यते। स्मितपूर्वाभिभाषी हरिरिति भावः।

कार्यविप्रतिषेधं निवेद्य तत्र स्वमतमावेदयिष्यन्नपरिहृतमालित्वं तावत् परिहरति—

भवद्गिरामवसरप्रदानाय वचांसि नः।
पूर्वरङ्गः प्रसङ्गाय नाटकीयस्य वस्तुनः॥ ८॥

भवद्गिरामिति॥ भवद्गिरां युष्मद्वाचामवसरप्रदानाय। प्रसञ्जनायेत्यर्थः। नोऽस्माकं वचांसि सिद्धांतोन्नयनार्थमुच्यन्ते। न तु सिद्धान्तत्वेनेत्यर्थः। तथाहि—पूर्वं रज्यतेऽस्मिन्निति पूर्वरङ्गः नाट्यशाला, तत्स्थं कर्मापि पूर्वरङ्ग इति दशरूपके। अतः पूर्वरङ्गो नाम रङ्गप्रधानाख्यो रङ्गविघ्नशान्तिकारी नान्दीपाठगीतवादित्राद्यनेकांगविशेषो नाट्यादौ कर्तव्यः कर्मविशेषः। तदुक्तं वसन्तराजीये— 'यन्नाट्यवस्तुनः पूर्वं रंगविघ्नोपशान्तये। कुशीलवाः प्रकुर्वन्ति पूर्वरंगः प्रकीर्तितः॥' इति। स पूर्वरंगः नाटके भवं नाटकीयम्। तत्र वर्ण्यमित्यर्थः। वृद्धाच्छः। तस्य 'आयने—' इतीयादेशः। तस्य वस्तुनः प्रवृत्तस्य प्रसङ्गाय प्रसञ्जनाय। प्रवर्तनायेति यावत्। अतः प्रथमवादो न दोषायेति भावः। पूर्वरंगः प्रस्तावनेति रंगराजः। तच्चिन्त्यम्। 'पूर्वरंगं विधायादौ सूत्रधारे विनिर्गते।

प्रविश्य तद्वदपरः काव्यमास्थापयेन्नटः ॥ प्रथमं पूर्वरंगश्च ततः प्रस्तावनेति च । आरम्भे सर्वनाट्यानामेतत्सामान्यमिष्यते ॥' इति दशरूपकाद्युक्तभेदविरोधादिति । अत्र हरिवाक्यपूर्वरंगयोः प्रसञ्जकत्वस्वरूपसामान्यस्य वाक्यद्वये शब्दान्तरेण पृथग्निर्देशात्प्रतिवस्तूपमालंकारः । तल्लक्षणं तूक्तम् ॥

संप्रति स्वमतमाह—

करदीकृतभूपालो भ्रातृभिर्जित्वरैर्दिशाम् ।
विनाप्यस्मदलंभूष्णुरिज्यायै तपसः सुतः ॥८॥

करदीकृतेति ॥ दिशां जित्वरैर्जयनशीलैः । 'इणनशजिसर्तिभ्यः क्वरप्' । कृद्योगात्कर्मणि षष्ठी । भ्रातृभिर्भीमादिभिर्हेतुभिः करदाः षष्ठभागप्रदाः । 'भागधेयो बलिः करः' इत्यमरः । ततश्च्विः । 'ऊर्यादिच्विडाचश्च' इति गतिसंज्ञायां 'कुगतिप्रादयः' इति नित्यसमासः । अकरदाः करदाः संपद्यमानाः कृताः । करदीकृता भूपालाः यस्य सः, वशीकृतराजमण्डलः तपसः सुनो धर्मपुत्रः । 'तपश्चान्द्रायणादौ स्याद्धर्मे लोकान्तरेऽपि च' इति विश्वः । अस्माद्विना । अस्माभिर्विनापीत्यर्थः । 'पृथग्विनानाना—' इत्यादिना तृतीयाविकल्पात्पञ्चमी । इज्यायै यागाय । यजेर्भावे क्यप् 'वचिस्वपि–' इत्यादिना संप्रसारणम् । 'नमःस्वस्ति–' इत्यादिना चतुर्थी । अलं समर्थो भूष्णुर्भवनशीलः । 'भूष्णुर्भविष्णुर्भविता' इत्यमरः । 'ग्लाजिस्थश्च ग्स्नुः' इति ग्स्नुप्रत्ययः ।

'क्ङिति च' इत्यत्र गकारप्रश्लेषाद्गुणाभावः । तथा च जयादित्यः–'तत्रैव गकारोऽपि च त्त्वभूतो निर्दिश्यते' । अतो जैत्रयात्रैव कार्या न यज्ञयात्रेति भावः ॥

ननु यज्ञान्ते जैत्रयात्रायामुभयानुसरणं स्यात्तत्राह--

उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता ।
समौ हि शिष्टैराम्नातौ वर्त्स्यन्तावामयः स च ॥१०॥

उत्तिष्ठमान इति ॥ उत्तिष्ठमानो वर्धमानः । 'उदोऽनूर्ध्वकर्मणि' इत्यात्मनेपदम् । परः शत्रुः पथोऽनपेतं पथ्यं हितमारोग्यं चेच्छता । पुंसेति शेषः । नोपेक्ष्यो नौदासीन्येन द्रष्टव्यः । कुतः । हि यस्माद्वर्त्स्यन्तौ वर्धिष्यमाणौ । 'लृटः सद्वा' इति सदादेशे 'वृद्भ्यः स्यसनोः' इति विभाषया परस्मैपदम् । 'न वृद्भ्यश्चतुर्भ्यः' इतीडभावः । आमयो व्याधिः । 'रोगव्याधिगदामयाः' इत्यमरः । स शत्रुश्च शिष्टैर्नीतिज्ञैः समौ तुल्यवृत्ती आम्नातावाख्यातौ । 'अल्पीयसोऽप्यरेर्वृद्धिर्महानर्थाय रोगवत् । अतस्तस्यानुपेक्ष्यत्वादुभयानुसृतिः कुत' इति भावः । उपमालंकारः ॥

नन्वेवं स्वार्थपरत्वदोषः स्यादिति चेन्न । लोकानुग्रहार्थत्वादस्याः प्रवृत्तेरित्याशयेनाह–

न दूये सात्वतीसूनुर्यन्मह्यमपराध्यति ।
यत्तु दन्दह्यते लोकमदो दुःखाकरोति माम् ॥११॥

नेति ॥ सत्वतोऽपत्यं स्त्री सात्वती नाम हरेः पितृष्वसा । 'उत्सादिभ्योऽञ्' । तस्याः सूनुश्चैद्यः । बन्धुरपि खलो न मृष्यत इति भावः । यन्मह्यमपराध्यति द्रुह्यतीति यावत् । 'क्रुधद्रुह–' इत्यादिना चतुर्थी । तत इति शेषः । यत्तदोर्नित्यसंबन्धात् । न तृपे न परितप्ये । तृपेर्दैवादिकात्कर्तरि लट् । उत्तमपुरुषैकवचनम् । किंतु लोकं दन्दह्यते । गर्हितं यथा स्यादेवं दहतीति यावत् । 'लुपसदचरजप–' इत्यादिना गर्हायां यङ् । 'जपजभदहदशभञ्जपशां च' इत्यभ्यासस्य नुगागमः । अदो लोकदहनं मां दुःखाकरोति । दुःखमनुभावयतीत्यर्थः । 'दुःखात्प्रातिलोम्ये' इति डाच्प्रत्ययः । अतश्चैद्य एवाभियातव्यः, पार्थस्तु प्रार्थनयापि पश्चात्समाधेय इत्यर्थः ॥

स्वमतं निगमयन्परमतं शुश्रूषुः पृच्छति–

मम तावन्मतमिदं श्रूयतामङ्ग वामपि ।

ज्ञातसारोऽपि खल्वेकः संदिग्धे कार्यवस्तुनि ॥ १२ ॥

ममेति ॥ तावत् । भवन्मतश्रवणपर्यन्तमित्यर्थः । मम मतमिदम् । अङ्गेत्यामन्त्रणेऽव्ययम् । 'अथ संबोधनार्थकाः । स्युः प्याट् पाडङ्ग हे है भोः' इत्यमरः । वां युवयोः । 'युष्मदस्मदोः षष्ठीचतुर्थी–' इत्यादिना वामादेशः । मतं श्रूयताम् । विधौ लोट् । तदिदं मया श्रोतव्यम् । अन्यथा संदेहानिवृत्तेरिति भावः । विदुषस्ते कुतः संदेहस्तत्राह–ज्ञातसारः ज्ञाततत्त्वार्थोऽप्येकः एकाकी कार्यवस्तुनि कर्तव्यार्थे संदिग्धे सं-

शेते। खलु निश्चये। अतो मयापि संदिह्यत इत्यर्थः। 'दिह उपचये' कर्तरि लट्। घत्वधत्वे। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः॥

यावदर्थपदां वाचमेवमादाय माधवः।
विरराम महीयांसः प्रकृत्या मितभाषिणः॥१३॥

यावदिति॥ माधवो हरिर्यावानर्थो यावदर्थम्। 'यावदवधारणे' इत्यव्ययीभावः। यावदर्थं पदानि यस्यास्ताम्। अभिधेयसंमिताक्षरामित्यर्थः। एवमुक्तप्रकारेण वाचमादाय गृहीत्वा। उक्त्वेत्यर्थः। विरराम तूष्णीमास। 'व्याङ्परिभ्यो रमः' इति परस्मैपदम्। तथाहि-महीयांसः उत्तमाः प्रकृत्या स्वभावेन मितभाषिणः। भवन्तीति शेषः। वृथालापनिषेधादिति भावः। पूर्ववदलंकारः॥

अथ पञ्चभिः कुलकेन रामं वर्णयंस्तद्वाक्यमवतारयति—

ततः सपत्नापनयस्मरणानुशयस्फुरा।
ओष्ठेन रामो रेवत्या रमणः स महाबली॥१४॥

तत इति॥ ततो रामो जगादेत्युत्तरेणान्वयः। सपत्नो रिपुः 'रिपुर्वैरिसपत्नारि—' इत्यमरः। तस्यापनयोऽपकारः तस्य स्मरणेन योऽनुशयः पश्चात्तापः। 'भवेदनुशयो द्वेषे पश्चात्तापानुबन्धयोः' इति विश्वः। तेन स्फुरतीत्यनुशयस्फूः तेन स्फुरा। तेनौष्ठेनोपलक्षितः। स रेवत्या रमणः, रमयतीति रमणः। नन्द्यादित्वाल्ल्युः। महाबलीत्यनेन बलवत्त्वमेव तस्य गम्यते॥

विवक्षितामर्थविदस्तत्क्षणप्रतिसंहृताम् ।
प्रापयन्पवनव्याधेर्गिरमुत्तरपक्षताम् ॥ १५ ॥

विवक्षितामिति ॥ विवक्षितां वृद्धत्वाभिमाना-दग्रे वक्तुमिष्टाम् । वचेर्ब्रूञो वा सन्नन्तात्कर्मणि क्तः । तत्क्षणे विवक्षाक्षण एव । इत्यविलम्बोक्तिः । प्रतिसंहृतां रामानुरोधानुरुद्धां अर्थविदः कार्यज्ञस्य अतएव पवनव्याधेरुद्धवस्य गिरमुत्तरपक्षतां सिद्धा-न्तपक्षतां प्रापयन् । स्वयमभतपक्षावलम्बित्वादिति भावः । अनेन रामस्य व्यग्रतोक्ता ॥

दधत्संध्यारुणव्योमस्फुरत्तारानुकारिणीः ।
द्विषद्वेषोपरक्ताङ्गसङ्गिनीः स्वेदविप्रुषः ॥ १६ ॥

दधदिति ॥ पुनः । संध्यायामरुणे व्योम्नि स्फु-रन्तीस्तारा अनुकुर्वन्तीति तथोक्ताः। कुतः । द्विषतः शत्रोर्द्वेषेण क्रोधेनोपरक्तेऽङ्गे वपुषि सङ्गिनीः सक्ताः स्वेदविप्रुषः स्वेदबिन्दून् । 'पृषन्तिबिन्दुपृषताः पुमांसो विप्रुषः स्त्रियः' इत्यमरः । दधद्दधानः । 'नाभ्यस्ता-च्छतुः' इति नुमभावः । उपमालंकारः ॥

प्रोल्लसत्कुण्डलप्रोतपद्मरागदलत्विषा ।
कृष्णोत्तरासङ्गरुचं विदधच्चौतपल्लवीम् ॥ १७ ॥

प्रोल्लसदिति ॥ पुनः । प्रकर्षेणोल्लसतां कुण्डलयोः प्रोतानां स्यूतानां पद्मरागदलानां माणिक्यशकला-नां त्विषा कान्त्या । प्रोतेति प्रपूर्वाद्वेञः कर्मणि क्तः । यजादित्वात्संप्रसारणम् । कृष्णोत्तरासंगो नीलोत्त-रीयम् । 'द्वौ प्रावारोत्तरासंगौ समौ बृहतिका तथा ।

संव्यानमुत्तरीयं च' इत्यमरः। तस्य रुचं चूतपल्लवरूपेमां चौतपल्लवीं विदधत्। कृष्णलोहितमिश्रवर्णचूतपल्लवरूपां कुर्वन्नित्यर्थः। 'धूम्रधूमलौ कृष्णलोहिते' इत्यमरवचनात्। अत्रान्यरुचोऽन्यदीयत्वायोगात्सादृश्याक्षेपान्निदर्शनालंकारः॥

जगाद वदनच्छद्मपद्मपर्यन्तपातिनः।

नयन्मधुलिहः श्वैत्यमुदग्रदशनांशुभिः॥ १८॥

जगादेति॥ वदनमेव छद्म कपटं यस्य तत्पद्मम्। वदनमेव पद्ममित्यर्थः। छद्मशब्देनासत्यत्वप्रतिपादनरूपोऽपह्नवः। तस्य पर्यन्तपातिनः प्रान्तसंचारिणः। मधु लिहन्तीति मधुलिहस्तान्मधुपान्। क्विप्। उदग्रैरुच्छ्रितैः दशनांशुभिः श्वैत्यं धावल्यं नयन्नेव जगाद। तद्गुणालंकारः। तस्य मधुपसंनिधापकवदनापह्नवसापेक्षत्वात्तेन संकरः॥

कुलकम्।

रामो जगादेत्युक्तम्। किं तदित्याकाङ्क्षायामाह—

यद्वासुदेवेनादीनमनादीनवमीरितम्।

वचसस्तस्य सपदि क्रिया केवलमुत्तरम्॥ १९॥

यदिति॥ वासुदेवेन न दीनमित्यदीनमकातरं नादीनवोऽस्येत्यनादीनवं निर्दोषम्। 'दोष आदीनवो मतः' इत्यमरः। यच्च ईरितम्। 'उत्तिष्ठमानस्तु परः' इत्यादिपक्षमाश्रित्य यदुक्तमित्यर्थः। तस्य व-

चमः सपदि क्रिया केवलं सद्योऽनुष्ठानमेवोत्तरम् । सिद्धान्तस्यैवोक्तत्वादिति भावः ॥

अथ तदेव प्रतिपादयिष्यन्नन्यातिशायतयोपस्करोति—

नैतल्लघ्वपि भूयस्या वचो वाचातिशय्यते ।
इन्धनौघधगप्यग्निस्त्विषा नात्येति पूषणम् ॥२० ॥

नैतदिति ॥ लघु संक्षिप्तमप्येतद्वचो भूयस्या बहुतरया । विस्तृतयापीत्यर्थः । 'द्विवचनविभज्य—' इत्यादिना ईयसुनि 'बहोर्लोपो भू च बहोः' इतीकारलोपो बहोश्च भूरादेशः । वाचा नातिशय्यते नातिरिच्यते । गुर्वर्थत्वादिति भावः । शीङः कर्मणि लटि यक् 'अयङ् यि क्ङिति' इत्ययङादेशः । तथाहि—इन्धनौघान्दहतीतीन्धनौघधक् काष्ठराशिदाहकः भूयानपीत्यर्थः । क्विपि घत्वेधत्वभष्भावः । अग्निस्त्विषा प्रभया पूषणं सूर्यम् । अल्पीयांसमपीति भावः । नात्येति नातिक्रामति । तेजसः प्रभावस्त्वमिव वचसोऽर्थवत्त्वमलङ्घ्यत्वहेतुरित्यर्थः । अत्र समानधर्मबिम्बाविम्बिततया दृष्टान्तालंकारः ॥

यदि हरिवचो नातिशय्यते, अलं तर्हि तवापि वागारम्भैरत आह—

संक्षिप्तस्याप्यतोऽस्यैव वाक्यस्यार्थगरीयसः ।
सुविस्तरतरा वाचो भाष्यभूता भवन्तु मे ॥ २१ ॥

संक्षिप्तस्येति अतो ॥ हरिवचसोऽनतिशयनीयत्वादेव सुविस्तरतराः प्रपञ्चतराः । 'प्रयत्ने वावश-

न्दे' इति घञः प्रतिषेधे 'ऋदोरप्' इत्यप्। मे वाचः संक्षिप्तस्याल्पाक्षरस्याप्यर्थेन गरीयसः । सूत्रकल्पस्येत्यर्थः । 'अल्पाक्षरमसंदिग्धं सारवद्विश्वतोमुखम् । अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥' इति लक्षणात् । अस्यैव वाक्यस्य नान्यस्य भाष्यभूता भाष्यैः समाः । नित्यसमासः । 'क्ष्मादौ जन्तौ भूतं क्लीबं समेऽतीते चिरे त्रिषु' इति वैजयन्ती । व्याख्यानरूपा भवन्त्वित्यर्थः । सूत्रव्याख्यानविशेषो भाष्यम् । 'सूत्रस्थं पदमादाय वाक्यैः सूत्रानुसारिभिः । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥' इति । मया तु तदेव विशेषप्रकाशनाय व्याख्यायते, नत्वतिशयाय प्रत्याख्यायते इत्यदोष इत्यर्थः। उपमालंकारः ॥

इत्थं यानं सिद्धान्तयित्वा तत्रोद्भवप्रतिरोधं हृदि निधाय त्रिभिः प्रत्याचष्टे—

विरोधिवचसो मूकान्वागीशानपि कुर्वते ।
जडानप्यनुलोमार्थान्प्रवाचः कृतिनां गिरः ॥२२॥

विरोधीति ॥ कृतिनां कुशलानां गिरः कर्त्र्यः । विरोधिवचसः प्रतिकूलवादिनो वागीशान्वाक्पतीनपि । 'वागीशो वाक्पतिः समौ' इत्यमरः । मूकान्निर्वाचः कुर्वते । जडयन्तीत्यर्थः । अनुलोमोऽनुकूलोऽर्थो ऽभिधेयं येषां तेऽनुकूलार्था अनुकूलवादिनः । ताञ्जडान्मन्दानपि प्रवाचः प्रगल्भवाचः कुर्वते । अतोऽस्मद्गिरःप्रवाच्या इति भावः । अत्र वागीशानां

मूकीकरणाज्ज्ञानां पूर्वोक्तत्वकरणाच्च शक्यवस्तुकरणरूपो विशेषोऽलंकारः। असंबन्धे संबन्धातिशयोक्तिप्रतिभोत्थापित इति संकरः॥

नन्वात्मनीनेन स्वामिना 'बुद्धेःफलमनाग्रहः' इति न्यायेन शास्त्रज्ञवचनं प्रतिकूलमपि ग्राह्यमेवेत्याशङ्कयाह—

षड्गुणाः शक्तयस्तिस्रः सिद्धयश्चोदयास्त्रयः।
ग्रन्थानधीत्य व्याकर्तुमिति दुर्मेधसोऽप्यलम्॥२३॥

षडिति॥ दुष्टा मेधा येषां ते दुर्मेधसः मन्दबुद्धयोऽपि। 'नित्यमसिच्प्रजामेधयोः' इति समासान्तोऽसिच्प्रत्ययः। ग्रन्थानौशनसादीनधीत्य पठित्वा गुणाः संधिविग्रहयानासनद्वैधीभावसमाश्रयाख्याः षट्। शक्तयः प्रभुत्वमन्त्रोत्साहाख्यास्तिस्रः। सिद्धयः पूर्वोक्तशक्तित्रयसाध्याः पुरुषार्थलाभात्मिकाः। ताश्च तिस्रः प्रभुसिद्धिर्मन्त्रसिद्धिरुत्साहसिद्धिश्चेति। उदया वृद्धिक्षयस्थानानि छत्रिन्यायेनोदया उच्यन्ते। तत्र वृद्धिक्षयौ स्वशक्तिसिद्ध्योः पूर्वावस्थानादुपचयापचयौ स्थानं ते च त्रय इति व्याकर्तुं व्याख्यातुमलं समर्थाः। 'पर्याप्तिवचनेष्वलमर्थेषु' इति तुमुन्। पञ्चाङ्गनिर्णयशक्तिविकलानां संध्यादिरूपसंख्यामात्रपाठकानामशास्त्रज्ञत्वादयो न ग्राह्यवचना इत्यभिसंधिः। अत्रामरः 'संधिर्ना विग्रहो यानमासनं द्वैधमाश्रयः। षड्गुणाः शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजाः। क्षयः स्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिना-

म् ॥' इति । तत्रारिविजिगीष्वोर्व्यवस्थाकरणमैक्यं संधिः। विरोधो विग्रहः। विजिगीषोररिं प्रति यात्रा यानम् । तयोर्मिथः प्रतिबद्धशक्त्योः कालप्रतीक्षया तूष्णीमवस्थानमासनम् । दुर्बलप्रबलयोर्वाचिकमात्मसमर्पणं द्वैधीभावः। अरिणा पीड्यमानस्य बलवदाश्रयणं संश्रयः । कोशदण्डोत्थं तेजः प्रभावः। कर्तव्यार्थेषु स्थेयान्प्रयत्न उत्साहः । षड्गुणचिन्तनं मन्त्रः। गतमन्यदिति संक्षेपः ॥

ननु शास्त्रोक्तार्थव्याख्यातैव शास्त्रज्ञः, स एव ग्राह्यवचनश्चेत्याशङ्क्याह—

अनिर्लोडितकार्यस्य वाग्जालं वाग्मिनो वृथा ।
निमित्तादपराद्धेषोर्धानुष्कस्येव वल्गितम् ॥२४॥

अनिर्लोडितेति ॥ अनिर्लोडितं नालोकितं कार्यं येन तस्य । कार्याकार्यमजानत इत्यर्थः । वाचोऽस्य सन्तीति वाग्मी वावदूकः। 'वाचो युक्तिपटुर्वाग्मी वावदूकोऽतिवक्तरि' इत्यमरः । 'वाचो ग्मिनिः' इति ग्मिनिप्रत्ययः। तस्य वाग्जालं वागाडम्बरो निमित्ताल्लक्ष्यात् । 'वेध्यं लक्ष्यं निमित्तं च शरव्यं च समं विदुः' इति वैजयन्ती । अपराद्धेषोः स्खलितबाणस्य । धनुः प्रहरणमस्येति धानुष्को धन्वी । 'प्रहरणम्' इति ठक् 'इसुसुक्तान्तात्कः' । 'अपराद्धपृषत्कोऽसौ लक्ष्याद्यश्च्युतसायकः। धन्वी धनुष्मान्धानुष्कः' इत्यमरः । तस्य वल्गितमिव वृथा नि-

च्छलम् । कार्यज्ञस्य वचो ग्राह्यं न तु वाचालस्येति भावः ॥

इत्थं षाड्गुण्यादिपाठमात्रं न मंत्र इति सिद्धे संप्रति स्वयं मंत्रस्वरूपमाह—

सर्वकार्यशरीरेषु मुक्त्वाङ्गस्कन्धपञ्चकम् ।
सौगतानामिवात्मान्यो नास्ति मन्त्रो महीभृताम् २५

सर्वेति ॥ सर्वाणि कार्याणि संध्यादीनि तानि शरीराणीवेत्युपमितसमासः । व्यासे सौगतानामिवेति लिङ्गान्तेषु सर्वकार्यशरीरेषु सर्वेषु शरीरेष्विव । सर्वकार्येष्विवत्यर्थः । अङ्गानि स्कन्धा इवेत्युपमितसमासः । तेषां पंचकं मुक्त्वा । स्कन्धपंचकमिवाङ्गपंचकं हित्वेत्यर्थः । पंच परिमाणमस्येति पंचकम् । 'संख्यायाः संज्ञासंघसूत्राध्ययनेषु' इति कप्रत्ययः । सुगतो भक्तिर्भजनीय एषां सौगता बौद्धाः । 'भक्तिः' इत्यण्प्रत्ययः । तेषामन्य आत्मेव महीभृतामन्यो मंत्रो नास्ति । कर्मणामारम्भोपायः, पुरुषद्रव्यसंपत्, देशकालविभागः, विपत्तिप्रतीकारः, कार्यसिद्धिश्चेति पंचांगानि । यथाह कामन्दकः—'सहायाः साधनोपाया विभागो देशकालयोः । विपत्तेश्च प्रतीकारः सिद्धिः पंचाङ्गमिष्यते ॥' इति । रूपवेदनाविज्ञानसंज्ञासंस्काराः पंच स्कन्धाः । तत्र विषयप्रपंचो रूपस्कन्धः, तज्ज्ञानप्रपंचो वेदनास्कन्धः, आलयविज्ञानसंतानो विज्ञानस्कन्धः, नामप्रपंचः संज्ञास्कन्धः, वासनाप्रपंचः संस्कारस्कन्धः । एवं पंचधा परिवर्तमानो ज्ञा-

नसंतान एवात्मा इति बौद्धाः ॥ एवं यथा बौद्धानां सर्वेषु शरीरेषु स्कन्धपंचकातिरिक्त आत्मा नास्ति, तथा राज्ञामंगपंचकातिरिक्तो मंत्रो नास्तीत्युपमालंकारः । तच्चास्माकं समग्रमेवेत्ययमेव यात्राकाल इति भावः ॥

अथ मंत्रितार्थक्रियाविलंबे दोषमाह–

मन्त्रो योध इवाधीरः सर्वाङ्गैः संवृतैरपि ।
चिरं न सहते स्थातुं परेभ्यो भेदशङ्कया ॥ २६ ॥

मन्त्र इति ॥ संवृतैर्गुप्तैः सर्वाङ्गैः पूर्वोक्तैरुपायादिभिरुरःस्थलादिभिश्चोपलक्षितोऽपि । सर्वाङ्गसंवृतोऽपीत्यर्थः । मन्त्रो विचारः अधीरो भीरुः, क्षुभ्यत इति योधो भट इव । पचाद्यच् । परेभ्योऽन्येभ्योऽरिभ्यश्च । 'परं दूरान्यमुख्येषु परोऽरिपरमात्मनोः' इति वैजयन्ती । भेदो विदारणं तृतीयगामित्वं च तस्य शङ्कया चिरं स्थातुम् । विलम्बितुमित्यर्थः । न सहते न क्षमः । 'शकधृष –'इत्यादिना तुमुन्प्रत्ययः । अतो न विलम्बितव्यम्, अन्यथा मंत्रभेदे कार्यहानिः स्यादिति भावः ॥

किंच नीतिसर्वस्वपर्यालोचनयापि न विलम्बः कार्य इत्यभिप्रेत्याह–

आत्मोदयः परज्यानिर्द्वयं नीतिरितीयती ।
तदूरीकृत्य कृतिभिर्वाचस्पत्यं प्रतायते ॥ २७ ॥

आत्मोदय इति ॥ आत्मन उदयो वृद्धिः परस्य शत्रोर्ज्यानिर्हानिः । 'वीज्याहाज्वरिभ्यो निः' इत्यौ-

णादिको निः प्रत्ययः । इति द्वयम् । इदं परिमाणम-
स्या इति इयती एतावती । 'किमिदंभ्यां वो घः' इ-
ति वतुपो वस्य घश्च । 'उगितश्च' इति ङीप् । नीति-
र्नीतिसंग्रहः । एतद्द्वयातिरिक्तो न कश्चिन्नीतिपदार्थो-
ऽस्तीत्यर्थः । यदन्यत्षाड्गुण्यादिवर्णनं तत्सर्वमस्यैव
प्रपञ्च इत्याह–तदिति । तद्द्वयमूरीकृत्याङ्गीकृत्य ।
'ऊरीकृतमुररीकृतमंगीकृतम्' इत्यमरः । 'ऊर्यादि-
च्विडाचश्च' इति गतिसंज्ञायां 'कुगतिप्रादयः' इति
समासे क्त्वो ल्यप् । कृतिभिः कुशलैः वाचस्पत्यं
वाग्मित्वम् । कस्कादित्वादलुक्सत्वे । 'षष्ठ्याः प-
तिपुत्र–' इत्यादिना सत्वमिति स्वामी । तन्न । तस्य
छन्दोविषयत्वात् । ब्राह्मणादित्वाद्भावे ष्यञ्प्रत्ययः ।
प्रतायते विस्तार्यते । कर्मणि लट् । 'तनोतेर्यकि' इ-
त्यात्वम् । तस्मादात्मोदयार्थिभिरविलम्बाच्छत्रुरुच्छे-
त्तव्यः । तन्नान्तरीयत्वात्तस्येति भावः ॥

ननु लब्धोदयस्य किं परोच्छित्त्येत्यत्राह—

तृप्तियोगः परेणापि महिम्ना न महात्मनाम् ।
पूर्णश्चन्द्रोदयाकांक्षी दृष्टान्तोऽत्र महार्णवः ॥२८॥

तृप्तियोग इति ॥ महीयसां महात्मनां परेणापि
प्रभूतेनापि महिम्ना ऐश्वर्येण तृप्तियोगः संतोषलाभो
न । अत्र तृप्त्यभावे पूर्णः सन् चन्द्रोदयाकांक्षी । वृद्ध्य-
र्थमिति भावः । महार्णवो दृष्टान्तः, दृष्टः अन्तो नि-
श्चयो यस्मिन् । दृष्टान्तो निदर्शनम् । उपमानमिति
यावत् । राज्ञा वृद्धावलंबुद्धिर्न कार्या । 'असंतुष्टा द्विजा

नष्टाः संतुष्टाश्च महीभुजः । सलज्जा गणिका नष्टा निर्लज्जा च कुलांगना ॥' इति न्यायादिति भावः । नायं दृष्टान्तालंकारः। बिम्बप्रतिबिम्बभावेनौपम्यस्य गम्यत्वे तस्योत्थानात् । किंतु दृष्टान्तशब्देन तस्याभिधानादुपमालंकारः। अत एव दृष्टान्तोदाहरणनिदर्शनरूपाः शब्दा न प्रयोक्तव्याः पौनरुक्त्यापत्तेरित्येकावल्यलंकारः ॥

तथापि संतोषे दोषमाह—

संपदा सुस्थिरंमन्यो भवति स्वल्पयापि यः ।
कृतकृत्यो विधिर्मन्ये न वर्धयति तस्य ताम् ॥२९॥

संपदेति॥ यः स्वल्पयापि संपदा सुस्थिरमात्मानं मन्यत इति सुस्थिरंमन्यः स्वस्थमानी भवति । 'आत्ममाने खश्च' इति खश्प्रत्यये मुमागमः । तस्याल्पसंतुष्टस्य तां स्वल्पसंपदं कृतकृत्यस्तावतैव कृतार्थो विधिर्दैवमपि न वर्धयति अहमिति मन्ये, पौरुषहीनाद्दैवमपि जुगुप्सते। तत्प्रवृत्तेःपारार्थ्यादिति भावः ॥

किंच पराक्रमलब्ध एवोदयो नान्यलब्ध इत्याह—

समूलघातमघ्नन्तः परान्नोद्यन्ति मानिनः ।
प्रध्वंसितान्धतमसस्तत्रोदाहरणं रविः ॥ ३० ॥

समूलेति॥ मानिनोऽभिमानिनः परान्शत्रून् समूलं हत्वा समूलघातमघ्नन्तः । अनुन्मूलयन्त इत्यर्थः । 'समूलाकृतजीवेषु हन्कृञ्ग्रहः' इति णमुल् प्रत्ययः । 'कषादिषु यथाविध्यनुप्रयोगः' इति हन्तेरनुप्रयोगः । नोद्यन्ति । किंतु हत्वैवोद्यन्तीत्यर्थः । तत्र हत्वैवोदये

अन्धयतीत्यन्धं गाढं तमोऽन्धतमसम्। 'ध्वान्ते गाढेऽन्धतमसम्' इत्यमरः। 'अवसमन्धेभ्यस्तमसः' इत्यच्प्रत्ययः। प्रध्वंसितमन्धतमसं येन सः। उदयात्प्रागिति भावः। रविरुदाहरणं दृष्टान्तः। अत्रापि दृष्टान्तोऽत्र महार्णव इतिवदुपमालंकारो न तु दृष्टान्त इति द्रष्टव्यम् ॥

किंचानुच्छिन्नशत्रोः प्रतिष्ठैव दुर्घटेत्याह—

विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा।
अनीत्वा पङ्कतां धूलिमुदकं नावतिष्ठते ॥ ३१ ॥

विपक्षमिति ॥ विपक्षं शत्रुमखिलीकृत्य। खिलमुत्सन्नमकृत्वा। अनुन्मूल्येत्यर्थः। प्रतिष्ठा दुर्लभा खलु। तथाहि— उदकं कर्तृ धूलिम्। स्वपरिभाविनीमिति भावः। पङ्कतामनीत्वा। नाधःकृत्येत्यर्थः। नावतिष्ठते किंतु नीत्वैव तिष्ठतीत्यर्थः। 'समवप्रविभ्यः स्थः' इत्यात्मनेपदम्। वाक्यभेदेन प्रतिबिम्बनापेक्षो दृष्टान्तालंकारः ॥

नन्वयं शिशुपाल एकाकी नः किं करिष्यतीत्याशङ्क्याह—

ध्रियते यावदेकोऽपि रिपुस्तावत्कुतः सुखम्।
पुरः क्लिश्नाति सोमं हि सैंहिकेयोऽसुरद्रुहाम् ॥३२॥

ध्रियत इति ॥ एकोऽपि रिपुर्यावद्ध्रियतेऽवतिष्ठते। 'धृङ् अवस्थाने' इति धातोस्तौदादिकात्कर्तरि लट्। 'रिङ्शयग्लिङ्क्षु' इति रिङादेशः। तावत्तदवधि सुखं कुतः। 'यावत्तावच्च साकल्येऽवधौ' इत्यमरः।

तथाहि--सिंहिकाया अपत्यं पुमान्सैंहिकेयो राहुः। 'तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुंतुदः' इत्यमरः। 'स्त्रीभ्यो ढक्'। असुरद्रुहां देवानां पुरोऽग्रे सोमं क्लिश्नाति बाधते। प्रासुर्यात्सोमग्रहणम्। सूर्यं चेति भावः। तस्मादेकोऽपि शत्रुरुच्छेत्तव्य इति भावः। 'अग्नेः शेषमृणाच्छेषं शत्रोः शेषं न शेषयेत्' इति तात्पर्यम्। विशेषेण सामान्यसमर्थनरूपोऽर्थान्तर-न्यासः॥

ननु क्षुद्रोऽयं चैद्यः किं नः करिष्यतीत्याशङ्क्य तस्य बलवत्त्वं वक्तुं मित्रामित्रबलाबलविवेकं ताव-त्करोति--

सखा गरीयान् शत्रुश्च कृत्रिमस्तौ हि कार्यतः।
स्यातामभित्रौ मित्रे च सहजप्राकृतावपि ॥३३॥

सखेति ॥ क्रियया उपकारापकारान्यतररूपया निर्वृत्तः कृत्रिमः। 'ड्वितः क्त्रिः' 'क्त्रेर्मम्नित्यम्'। सखा सुहृत् शत्रुश्च कृत्रिमो गरीयान्। कुतः--हि यस्मात्तौ कृत्रिममित्रशत्रू कार्यतः उपकारापकाररूपकार्यवशात् निर्वृत्ताविति शेषः। उक्तकार्योपाधेर्यावज्जीवमनपा-यादनयोर्मित्रामित्रभावोऽप्यनपायीति गरीयस्त्व-मिति भावः। सहजप्राकृतौ तु नैवमित्याह--स्या-तामिति। सहजातः सहजः एकशरीरावयवत्वात्। तत्र सहजं मित्रं मातृष्वसेयपितृष्वसेयादि। सहज-शत्रुस्तु पितृव्यतत्पुत्रादिः। प्रकृत्या सिद्धः प्राकृतः पूर्वोक्तसहजकृत्रिमलक्षणरहित इत्यर्थः। तत्र वि-

षयान्तरः प्राकृतः शत्रुः । तदन्तरः प्राकृतं मित्रम् । अपि त्वर्थे । तौ सहजप्राकृतौ शत्रुमित्रे च स्यातां तावात्मकार्यवशादनियमेनोभयरूपतामापद्येते न कृत्रिमशत्रुमित्रे । कृत्रिमः शत्रुः शत्रुरेव । मित्रं च मित्रमेवेति कृत्रिमावेव मित्रामित्रौ गरीयांसौ । न तु सहजौ, नापि प्राकृतावित्यर्थः । अनेन कृत्रिमत्वं सर्वापवादीति सिद्धम् ॥

एवं चेदस्माकं पैतृष्वसेयः शिशुपालः सहजमित्रत्वात्सन्धातव्यो न तु यातव्य इत्यत आह—

उपकर्त्रारिणा संधिर्न मित्रेणापकारिणा ।
उपकारापकारौ हि लक्ष्यं लक्षणमेनयोः ॥ ३४ ॥

उपकर्त्रेति ॥ उपकर्त्रोपकारकारिणा अरिणापि सहजेन । प्राकृतेन चेति शेषः । सन्धिः कार्यः । अरित्वापवादेन कृत्रिममित्रताया बलीयस्या यावज्जीवभाविन्यास्तत्रोत्पन्नत्वादिति भावः । एवमपकारिणा मित्रेणापि । सहजेन प्राकृतेन चेति शेषः । सन्धिर्न कार्यः । मित्रत्वापवादेन कृत्रिमशत्रुताया बलीयस्या यावज्जीवभाविन्यास्तत्रोत्पन्नत्वादिति भावः । ननु साक्षादरिणा सन्दध्यात् । मित्रेण कथं विरुन्ध्यादित्याशङ्क्य क्रियया तयोर्वैपरीत्याददोष इत्याह—हि यस्मादुपकारापकारावेव तयोर्मित्रामित्रयोर्लक्षणं स्वरूपं लक्ष्यं द्रष्टव्यम् । उपकर्तैव मित्रम्, अपकर्तैव शत्रुरित्यर्थः । तस्मात्सहजमित्रत्वेऽपि चैद्यः क्रियया शत्रुत्वाद्यातव्य एवेति भावः ॥

अथ चैद्यस्य कृत्रिमशत्रुत्वं चतुर्भिराह—

त्वया विप्रकृतश्चैद्यो रुक्मिणीं हरता हरे ।
बद्धमूलस्य मूलं हि महद्वैरतरोः स्त्रियः ॥ ३५ ॥

त्वयेति ॥ हे हरे, रुक्मिणीं हरता । बन्धुभिस्तस्मै प्रदत्तां राक्षसधर्मेणोद्वहतेत्यर्थः । 'राक्षसो युद्धहरणात्' इति याज्ञवल्क्यः । 'गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ' इति मनुः । त्वया चैद्यो विप्रकृतः विप्रियं प्रापितः । तथाहि—बद्धमूलस्य रूढमूलस्य वैरतरोः स्त्रियो महत्प्रधानं मूलम् । हि निश्चये । रूपकसंसृष्टोऽयं सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥

अथ तेनापि त्वं विप्रकृत इत्याह—

त्वयि भौमं गते जेतुमरौत्सीत्स पुरीमिमाम् ।
प्रोषितार्यमणं मेरोरन्धकारस्तटीमिव ॥ ३६ ॥

त्वयीति ॥ त्वयि भूमेरपत्यं पुमांसं भौमं नरकासुरं जेतुं गते सति । स चैद्य इमां पुरीं द्वारकाम् । प्रोषितोऽर्यमा सूर्यो यस्यास्तां मेरोस्तटीं सानुमन्धकार इवारौत्सीद्रुद्धवान् । रुधेरनिटो लुङि सिचि वृद्धिः । उपमालंकारः ॥

अपकारान्तरमाह—

आलप्यालमिदं बभ्रोर्यत्स दारानपाहरत् ।
कथापि खलु पापानामलमश्रेयसे यतः ॥ ३७ ॥

आलप्येति ॥ स चैद्यो बभ्रोर्यादवभेदस्य दारान्भार्याम् । 'भार्या जायाथ पुंभूम्नि दाराः स्यात्तु

कुटुम्बिनी' इत्यमरः। अपाहरदिति यदिदं दारापहरणं आलप्योच्चार्यालम्। नालपनीयमित्यर्थः। 'अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा' इति क्त्वाप्रत्यये समासे ल्यबादेशः। यतः पापानां पाप्मनां कथनमुच्चारणमपि। 'चिन्तिपूजिकुथिकुम्बि—' इत्यप्रत्ययः। अश्रेयसेऽनर्थायालं समर्थं खलु। 'नमःस्वस्ति—' इत्यादिना चतुर्थी। अत्र निषिध्यमानालपननिषेधनसमर्थनात्कार्येण कारणसमर्थकोऽर्थान्तरन्यासः॥

फलितमाह—

विराद्ध एवं भवता विराद्धा बहुधा च नः।
निर्वर्त्यतेऽरिः क्रियया स श्रुतश्रवसः सुतः॥३८॥

विराद्ध इति॥ एवं भवता विराद्धो विप्रकृतः। राधेरनिटः कर्मणि क्तः। बहुधा नोऽस्माकं च विराद्धा विप्रकर्ता श्रुतश्रवा नाम हरेः पितृष्वसा तस्याः सुतः। पैतृष्वसेयत्वात्सहजमित्रमपीति भावः। स चैद्यः क्रियया पूर्वोक्तान्योन्यापक्रियया अरिर्निर्वर्त्यते कृत्रिमः शत्रुः क्रियते। अतो बलीयस्त्वादनुपेक्ष्य इति भावः॥

अत्राप्युपेक्षायां दोषमाह—

विधाय वैरं सामर्षे नरोऽरौ य उदासते।
प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम्॥३९॥

विधायेति॥ ये नरः पुमांसः। 'स्युः पुमांसः पंचजनाः पुरुषा पूरुषा नरः' इत्यमरः। सामर्षे प्रागेव सरोषेऽरौ वैरं विधाय। स्वयं चापकृत्येत्यर्थः। उदासते उपेक्षन्ते ते नरः कक्षे गुल्मे। 'कक्षस्तु गुल्मे दोर्मूले

पापे जीर्णवने तृणे' इति वैजयन्ती । उदर्चिषमधिकज्वालमग्निं प्रक्षिप्य अभिमारुतम् । आभिमुख्येऽव्ययीभावः । शेरते स्वपन्ति । तन्नाशहेतुरित्यर्थः । 'शीङो रुट्' इति रुडागमः । अत्र ये उदासते ते शेरते इति विशिष्टौदासीन्यशयनयोर्वाक्यार्थयोर्निर्दिष्टैकत्वासंभवात्सादृश्यलक्षणायामसंभवद्वस्तुसंबंधो वाक्यार्थनिर्वृत्तिरिति निदर्शनाभेदः । न चायं दृष्टान्तः । वाक्यभेदेन प्रतिबिम्बकारणाक्षेपे तस्योत्थानात् । अत्र तु वाक्यार्थे वाक्यार्थसमारोपाद्वाक्यैकवाक्यतायां तदभाव इत्यलंकारसर्वस्वकारः ॥

तथापि बान्धवत्वात्सोढव्य इत्याशङ्क्याह—

मनागनभ्यावृत्त्या वा कामं क्षाम्यतु यः क्षमी ।
क्रियासमभिहारेण विराध्यन्तं क्षमेत कः ॥ ४० ॥

मनागिति ॥ यः क्षमी सहनः । 'शमित्यष्टाभ्यो घिनुण्' इति घिनुणप्रत्ययः । स सोढा मनागल्पम् । अभ्यावृत्तावपीति भावः । अनभ्यावृत्त्या सकृद्वा । अनल्पत्वेऽपीति भावः । विराध्यन्तमपकुर्वाणं कामं भृशं क्षाम्यतु क्षमताम् । संभावनायां लोट् । 'शमामष्टानां दीर्घः श्यनि' । क्रियासमभिहारेण भृशम् । पौनःपुन्येन चेत्यर्थः । न च पुंवाक्येष्वनेकार्थत्वं दोषाय । विराध्यन्तं कः क्षमेत सहेत सोढुं शक्नुयात् । न कोऽपीत्यर्थः । 'शकि लिङ्—' इति शक्यार्थे लिङ् । 'क्षमू प्रसहने' दैवादिको भौवादिकश्च ॥

ननु सर्वदा क्षमैव पुंसो भूषणम्, अतोऽपराधेऽपि क्षन्तव्यमत आह—

अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः।
पराक्रमः परिभवे वैयात्यं योधनेष्विव * ॥४१॥

अन्यदेति॥ अन्यदा धर्मयुद्धव्यतिरिक्ते काले योषितो लज्जेव पुंसोऽन्यदा अपरिभवे क्षमा शमो भूषणम्। परिभवे तु योषितः योधनेषु वैयात्यं धार्ष्ट्यमिव। 'धृष्टे धृष्णुर्वियातश्च' इत्यमरः। पराक्रमः पौरुषं भूष्यतेऽनेनेति भूषणमाभरणम्। एवं चाक्रियावचनत्वान्नियतलिङ्गत्वाद्विरोध इति वल्लभोक्तं प्रत्युक्तम्॥

अथ परिभवेऽप्यपराक्रमे त्रिभिर्निन्दामाह—

माजीवन्यः परावज्ञादुःखदग्धोऽपि जीवति।
तस्याजननिरेवास्तु जननीक्लेशकारिणः॥ ४२॥

माजीवन्निति॥ यः परस्यापकर्तुरवज्ञया अपमानेन यद्दुःखं तेन दग्धस्तप्तोऽत एव माजीवन्गर्हितजीवी सन्। 'माङ्याक्रोशे' इति लटः शत्रादेशः। जीवति प्राणान्धारयति। जनन्याः क्लेशकारिणो गर्भधारणप्रसवादिवेदनाकारिणः। तद्व्यतिरिक्तार्थक्रियाहीनस्येत्यर्थः। तस्याजननमजननिरनुत्पत्तिरेवास्तु। जन-

---

*उपस्थितायां विपदि (यवनाक्रमणादिरूपायां) बह्व्यो धर्मरक्षायै युयुधिरे, इति भारतीयेतिहासेषु सुप्रसिद्धमिति कल्पनैव साध्वी॥

नीक्लेशनिवृत्त्यर्थमिति भावः । 'आक्रोशे नञ्यनिः' इति नञ्पूर्वाज्जनिधातोरनिप्रत्ययः ॥

पादाहतं यदुत्थाय मूर्धानमधिरोहति ।
स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ॥ ४३ ॥

पादेति ॥ यद्रजो धूलिः पादेनाहतं सदुत्थायोड्डीय मूर्धानमाहन्तुरेव शिरोऽधिरोहत्याक्रामति तद्रजः । अचेतनमपीति भावः । अवमाने सत्यपि स्वस्थात्संतुष्टाद्देहिनश्चेतनाद्वरं श्रेष्ठम् । व्यतिरेकालंकारः ॥

असंपादयतः कंचिदर्थं जातिक्रियागुणैः ।
यदृच्छाशब्दवत्पुंसः संज्ञायै जन्म केवलम् ॥४४॥

असंपादयत इति ॥ किंच जातिर्ब्राह्मणत्वादिः, क्रिया इज्याध्ययनयादिः, गुणः शौर्यादिः, तैः साधनैः । करणे तृतीया । कंचिदर्थं सुकृतकीर्त्यादिपौरुषार्थम्, अन्यत्र गोत्वपाचकत्वशौक्ल्यादिभिः स्वाभिधेयभूतैः करणैः कंचिदर्थं व्यवहाररूपं प्रयोजनमसंपादयतः । उभयत्र तादृग्जात्याद्यसंभवादिति भावः । पुंसो जन्म सत्तालाभः यदृच्छाशब्दवत् इच्छाप्रकल्पितस्य जात्यादिप्रवृत्तिनिमित्तशून्यस्य डित्थादिशब्दस्येव । 'तत्र तस्येव' इति वतिप्रत्ययः । 'स्वेच्छा यदृच्छा स्वच्छन्दः स्वैरता चेति ते समाः' इति केशवः। संज्ञायै केवलं संज्ञार्थमेव। एकत्र पारिभाषिकं किंचिन्नाममात्रमनुभवितुम्, अन्यत्र तादृक्तामनुभवितुमित्यर्थः ॥

एवमपौरुषं दूषयित्वा पौरुषं भूषयति—

तुङ्गत्वमितरा नाद्रौ नेदं सिन्धावगाधता ॥
अलङ्घनीयताहेतुरुभयं तन्मनस्विनि ॥४५॥

तुङ्गत्वमिति ॥ अद्रौ पर्वते तुङ्गत्वम् । औन्नत्यमस्तीति शेषः । अस्तिर्भवन्तीपरोऽप्रयुज्यमानोऽप्यस्तीत्यादिभाष्यात् । भवन्ती पूर्वाचार्याणां लटः संज्ञा । इतरागाधता नास्ति । सिन्धौ समुद्रेऽगाधता गम्भीरतास्ति । इदं तुङ्गत्वं नास्ति । मनस्विनि वीरे त्वलङ्घनीयताहेतुरलङ्घ्यत्वकारणं तदुभयं तुङ्गत्वमगाधता च ॥ तस्मादद्रिसिन्धुभ्यामधिको मनस्वीति व्यतिरेकालंकारः ॥

संप्रति शत्रौ मार्दवमनर्थायेत्याह—

तुल्येऽपराधे स्वर्भानुर्भानुमन्तं चिरेण यत् *।
हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलम्॥४६॥

तुल्य इति ॥ स्वर्भानू राहुरपराधे तुल्येऽपि भानुमन्तं सूर्यं चिरेण ग्रसते, हिमांशुं चन्द्रमाशु शीघ्रं ग्रसते गिलतीति यत् । 'ग्रसिते गिलितं गीर्णम्' इत्यभिधानात् । तन्म्रदिम्नो मार्दवस्य फलं स्फुटम् । 'पृथ्वादिभ्य इमनिच्' इतीमनिच्प्रत्ययः । तस्माद्विपक्षे तीव्रेण भवितव्यम् । अन्यथा मृदुः सर्वत्र बाध्यत

* लोकप्रसिद्धिमनुरुध्येदम् । नहि कवीनां वस्तुयाथार्थ्यायाथार्थ्ययोराग्रहः । अतएव 'सर्वपथीनाः कवयः' इति केषांचिदुक्तिः । एवं सर्वत्र बोध्यम् ॥

इति भावः । एतच्च प्रस्तुतमप्रस्तुतार्केन्दुकथनेन सारूप्यात्प्रतीयते इत्यप्रस्तुतप्रशंसाभेदोऽयम् । 'अप्रस्तुतस्य कथनात्प्रस्तुतं यत्र गम्यते । अप्रस्तुतप्रशंसेयं सारूप्यादिनियन्त्रिता ॥' इति लक्षणात् ॥

एतदेव भङ्ग्यन्तरेणाह—

स्वयं प्रणमतेऽल्पेऽपि परवायावुपेयुषि ।
निदर्शनमसाराणां लघुर्बहुतृणं नरः ॥ ४७ ॥

स्वयमिति ॥ असाराणां दुर्बलानां निदर्शनं दृष्टान्तः । अत एव ईषदसमाप्तं तृणं बहुतृणम् । तृणकल्पमित्यर्थः । 'विभाषा सुपो बहुच्पुरस्तात्—' इति बहुच्प्रत्ययः प्रकृतेः पूर्वं च भवति । 'स्यादीषदसमाप्तौ तु बहुच्प्रकृतिलिङ्गके' इति वचनात्प्रकृतिलिङ्गता । लघुर्निष्पौरुषो नरोऽल्पेऽपि परो वायुरिवेत्युपमितसमासः । बहुतृणमिति स्पष्टोपमासाहचर्यात्कल्पब्देश्यदेशीयदेश्यादीति दण्डिना कल्पबादीनामौपम्यवाचकेष्वभिधानात् । तस्मिन्नुपेयुषि प्राप्ते सति स्वयं प्रणमते स्वयमेव प्रह्वीभवति । 'कर्मवत्कर्मणा तुल्यक्रियः' इति कर्मवद्भावात् 'भावकर्मणोः' इत्यात्मनेपदम् । 'न दुहस्नुनमां यक्चिणौ' इति यक्प्रतिषेधः । वायुना तृणमिवाल्पीयसापि रिपुणा लघुरक्लेशेन परिभूयत इत्यर्थः । उपमालंकारः ॥

पुनः पौरुषे गुणमाह—

तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते ।
पञ्चमः पञ्चतपसस्तपनो जातवेदसाम् ॥४८॥

तेजस्वीति ॥ दवीयानपि दूरस्थोऽपि । 'स्थूलदूर–' इत्यादिना पूर्वगुणयणादिपरलोपौ । तेजस्वी तेजस्विनां मध्ये गण्यते संख्यायते । तथाहि–पञ्चाग्निसाध्यं तपो यस्य स तथा तस्य पञ्चतपसः पञ्चाग्निमध्ये तपस्यतः तपनोऽर्को जातवेदसामग्नीनां पञ्चमः पञ्चानां पूरणः । पञ्चमो जातवेदा भवतीत्यर्थः । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥

गुणान्तरं च व्यतिरेकेणाह—

अकृत्वा हेलया पादमुच्चैर्मूर्धसु विद्विषाम् ।
कथंकारमनालम्बा कीर्तिर्द्यामधिरोहति ॥ ४९ ॥

अकृत्वेति ॥ उच्चैरुन्नतेषु विद्विषां मूर्धसु हेलया पादमकृत्वा अनिधाय । 'अनञ्पूर्वः' इति निषेधात्समासेऽपि न ल्यबादेशः । कीर्तिः कथंकारम् । कथमित्यर्थः । 'अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत्' इत्यनर्थकादेव करोतेः कथंपूर्वाण्णमुल् । अनालम्बा निराधारा कीर्तिर्द्यां दिवमधिरोहति । न कथंचिदित्यर्थः । किंचिन्निःश्रेण्यादिकमनाक्रम्य उच्चसौधस्य दुरारोहत्वादिति भावः । तस्मात्कीर्तिमिच्छता पौरुषमेवाश्रयणीयमिति श्लोकतात्पर्यम् । कीर्तितद्वतोरभेदोपचारात्समानकर्तृतानिर्वाहः । अत्र प्रस्तुतायाः कीर्तेर्विषयमहिम्ना अप्रस्तुतप्रासादारोहणस्त्रीव्यवहारप्रतीतेः समासोक्तिः ॥

पौरुषमेवाश्रयणीयमित्यत्रान्वयव्यतिरेकदृष्टान्तावाचष्टे—

अङ्काधिरोपितमृगश्चन्द्रमा मृगलाञ्छनः ।
केशरी निष्ठुरक्षिप्तमृगयूथो मृगाधिपः ॥ ५० ॥

अङ्केति ॥ अङ्कमुत्सङ्गमधिरोपितो मृगो येन स चन्द्रमाः मृगलाञ्छनः मृगाङ्कः । तथा निष्ठुरं यथा तथा क्षिप्तो हतो मृगयूथो मृगसमूहो येन स केशरी सिंहो मृगाधिपः । उभयत्रापि ख्यात इति शेषः । तस्माच्छत्रौ मार्दवं दुष्कीर्तये, पौरुषं तु कीर्तये इति भावः । अत्राप्रस्तुतकथनात्प्रस्तुतार्थप्रतीतेरप्रस्तुतप्रशंसा ॥

ननु सामादि सुकरोपायमुपेक्ष्य किं पाक्षिकासिद्धिना दण्डेन । यथाह मनुः–'साम्ना भेदेन दानेन समस्तैरुत वा पृथक् । विजेतुं प्रयतेतारीन्न युद्धेन कदाचन ॥' इति । तस्मात्सान्त्वमेव युक्तमित्याशङ्क्य द्वाभ्यां निराचष्टे—

चतुर्थोपायसाध्ये तु रिपौ सान्त्वमपक्रिया ।
स्वेद्यमामज्वरं प्राज्ञः कोऽम्भसा परिषिञ्चति ॥५१॥

चतुर्थोपायेति ॥ चतुर्थोपायसाध्ये दण्डसाध्ये रिपौ सान्त्वं साम । 'साम सान्त्वमुभे समे' इत्यमरः । अपक्रियापकारः । तथाहि–स्वेद्यं स्वेदार्हम् । स्वेदनकार्यमित्यर्थः । 'स्वेदस्तु स्वेदने घर्मे' इति विश्वः । आमज्वरमपक्वज्वरं प्राप्य । 'आमो रोगे रोगभेदे आमोऽपक्वे तु वाच्यवत्' इति विश्वः । कः प्राज्ञः पण्डितोऽम्भसा जलेन परिषिञ्चति । न कोऽपीत्यर्थः ।

ज्वरितस्याऽनस्यैकवत्कुद्धस्य सान्त्वमुद्दीपकं स्यात् । अतो दण्ड एवेति भावः । वाक्यभेदेन प्रतिबिम्बकरणापेक्षो दृष्टान्तालंकारः ॥

सामवादाः सकोपस्य तस्य प्रत्युत दीपकाः ।
प्रतप्तस्येव सहसा सर्पिषस्तोयबिन्दवः ॥ ५२ ॥

सामेति ॥ सकोपस्य रूढवैरस्य तस्य चैद्यस्य सामवादाः प्रियोक्तयः सहसा प्रतप्तस्य क्वथितस्य सर्पिषो घृतस्य तोयबिन्दव इव प्रत्युत वैपरीत्येन दीपकाः प्रज्वलनकारिणः । न तु शान्तिकरा इत्यर्थः । तस्माद्दण्ड्य एव सः । मृदुवचनं त्वप्ररूढवैरविषयमिति भावः ॥

एवं स्थिते यदि केचिदुद्धवादयः प्रत्याचक्षीरंस्तान्प्रत्याह--

गुणानामायथातथ्यादर्थं विप्लावयन्ति ये ।
अमात्यव्यञ्जना राज्ञां दूष्यास्ते शत्रुसंज्ञिताः ॥५३॥

गुणानामिति ॥ संध्यादीनां गुणानामायथातथ्यात् । तथात्वमनतिक्रम्य यथातथम् । यथायोग्यमिति यावत् । 'यथार्थे तु यथातथम्' इत्यमरः । यथार्थेऽव्ययीभावः । स 'नपुंसकं' इति नपुंसकत्वम् । 'ह्रस्वो नपुंसके-' इति ह्रस्वत्वम् । ततो नञ्समासे अयथातथं, तस्य भाव आयथातथ्यम् । ब्राह्मणादित्वात्ष्यञ्प्रत्ययः । 'यथातथयथापुरयोः पर्यायेण' इति विकल्पान्नञ्पूर्वपदवृद्धिः । तस्मादायथातथ्यादयथायोग्यत्वात् । अन्य-

कालेऽन्यप्रयोगादित्यर्थः । अर्थं प्रयोजनं ये विघ्नावयन्ति निघ्नन्ति । कार्यहानिं कुर्वन्तीत्यर्थः । अमात्यानां व्यञ्जनं चिह्नं येषां ते तथोक्ताः । तद्वेषधारिण इत्यर्थः । 'अव्ययो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपदः' इति वामनः । वस्तुतस्तु शत्रुरिति संज्ञा एषां संजाता शत्रुसंज्ञिताः शत्रव एव ते कूटमन्त्रिणो राज्ञां दूषयितुमर्हाः दूष्या गर्ह्याः । त्याज्या इति यावत् । 'कृत्यानां कर्तरि वा' इति कर्तरि षष्ठी । अतः स्वोक्तं न प्रतिरोद्धव्यमिति भावः ॥

ननु यातव्योऽपि काले यातव्य इत्याशङ्क्यायमेव काल इत्याह—

स्वशक्त्युपचये केचित्परस्य व्यसनेऽपरे ।
यानमाहुस्तदासीनं त्वामुत्थापयति द्वयम् ॥ ५४॥

स्वेति ॥ केचिद्वृद्धाः स्वस्य शक्त्युपचये सामर्थ्यातिरेके यानं यात्रामाहुः । यथाह कामन्दकः—'प्रायेण सन्तो व्यसने रिपूणां यातव्यमित्येव समादिशन्ति । तथा* विपक्षे व्यसनानपेक्षी क्षमो द्विषन्तं मुदितः प्रतीयात् ॥' इति । अपरे वृद्धाः परस्य शत्रोर्व्यसने विपदि । 'व्यसनं विपदि भ्रंशे' इत्यमरः । यानमाहुः । अत्र मनुः—'तदा यायाद्विगृह्यैव व्यसने चोत्थिते रिपोः' इति । तद्द्वयमुक्तपक्षद्वयं कर्तृ आसीनमनुद्युञ्जा-

---

* 'तन्नैष पक्षो व्यसनं ह्यनिष्टं क्षमस्तु सन्नभ्युदितः मतीयात्' इत्यपि पाठः ॥

नम् । 'ईदासः' इति शानजाकारस्येकारादेशः । त्वामुत्थापयति प्रेरयति । तदुभयलाभादीदृक्कालो न कदापि लक्ष्यत इत्यर्थः ॥

तत्र स्वशक्त्युपचयं तावल्लक्षयति—

लिलङ्घयिषतो लोकानलङ्घ्यानलघीयसः ।
यादवाम्भोनिधीन्रुन्धे वेलेव भवतः क्षमा ॥ ५५ ॥

लिलंघयिषत इति ॥ लोकाँल्लंघयितुमिच्छतो लिलङ्घयिषतः । लंघयतेः सन्नन्ताल्लटः शतरि शस् । अलंघयान् स्वयं दुर्लंघ्यान् । कुतः अलघीयसोऽतिगुरून् । अत एव यादवा अम्भोनिधय इवेत्युपमितसमासः । वेलेवेति लिङ्गात् । तान्यादवाम्भोनिधीन्भवतः क्षमा तितिक्षा वेलेव कूलमिव । 'वेला कूलेऽपि वारिधेः' इति विश्वः । रुन्धे प्रतिबध्नाति । अन्यथा प्रागेव सर्वं संहरेयुरिति भावः ॥

अभ्युच्चयश्चायमपरो यदक्लेशेनैव ते विजयलाभ इत्याह—

विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम् ।
फलभाजि समीक्ष्योक्ते बुद्धेर्भोग इवात्मनि ॥ ५६ ॥

विजय इति ॥ सेनायाः कर्त्र्या विजयः साक्षिमात्रे उदासीने एव फलभाजि त्वयि समीक्ष्योक्ते सांख्योक्ते । 'सांख्यं समीक्ष्यम्' इति त्रिकाण्डः । आत्मनि बुद्धेर्महत्तत्त्वस्य मूलप्रकृतेः प्रथमविकारस्य कर्त्र्याः भोगः सुखदुःखानुभव इवापदिश्यतां व्यव-

ह्रियताम् । भृत्यजयपराजययोः स्वामिगम्यत्वादिति भावः। सांख्या अप्याहुः। कर्तैव भवत्युदासीन इति, 'सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य साधयति बुद्धिः' इति च ॥

अथ परस्य व्यसनमाह—

हते हिडिम्बरिपुणा राज्ञि द्वैमातुरे युधि ।
चिरस्य मित्रव्यसनी सुदमो दमघोषजः॥ ५७ ॥

हत इति ॥ हिडिम्बरिपुणा भीमेन द्वयोर्मात्रोरपत्यं पुमान्द्वैमातुरः । 'मातुरुत्संख्यासंभद्रपूर्वायाः' इत्यण्प्रत्ययः, उकारश्चान्तादेशो रेफपरः। तस्मिन्राज्ञि जरासन्धे। सहिताभ्यां पत्नीभ्यामर्धशः प्रसूतो जरया नाम पिशाच्या संधितश्चेति कथयन्ति । युधि हते सति चिरस्य चिरकालेन । 'चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः' इत्यमरः। मित्रव्यसनी मित्रव्यसनवान् । मित्रभ्रंशवानिति यावत् । 'व्यसनं विपदि भ्रंशे' इत्यमरः। दमघोषाज्जातो दमघोषजश्चैद्यः सुखेन दम्यत इति सुदमः । एकाकित्वात्सुसाध्य इत्यर्थः ॥

कष्टश्चायं पक्षोऽभ्युपेत्यवादेनोक्तः, वस्तुतस्तु शूराणामग्रिमपक्ष एवेष्टः शास्त्रसंवादी। यथाह कामन्दकः—'यदा समस्तं प्रसभं निहन्तुं पराक्रमादूर्जितमप्यमित्रम् । तदाभियायादहितानि कुर्वन्नुपान्ततः कर्षणपीडनानि ॥' इतीत्यभिप्रेत्याह—

नीतिरापदि यद्गम्यः परस्तन्मानिनो ह्रियै ।
विधुर्विधुंतुदस्येव पूर्णस्तस्योत्सवाय सः ॥ ५८ ॥

नीतिरिति ॥ परः शत्रुरापदि गम्यो गमनार्हः नीतिरिति यत्तदापदि गमनं मानिनः शौर्याभिमानिनो ह्रियै । लज्जाकरमित्यर्थः । किंतु पूर्ण उपचितगात्रः स शत्रुस्तस्य मानिनः । विधुश्चन्द्रः विधुं तुदति छिनत्तीति विधुंतुदो राहुः । 'विध्वरुषोस्तुदः' इति खश्प्रत्यये मुमागमः । तस्येवोत्सवाय । अत एव बलिना बलवानेव यातव्यः' बलिनश्च वयमिति भावः ॥

तर्हि पूर्वोदाहृतमन्वादिशास्त्रविरोधः स्यादित्याशङ्क्याह—

अन्यदुच्छृङ्खलं सत्त्वमन्यच्छास्त्रनियन्त्रितम् ।
सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः ॥ ५९ ॥

अन्यदिति ॥ अन्यदुच्छृङ्खलमनर्गलं प्रसह्य पीडनक्षममिति भावः । सत्त्वं बलमन्यत् शास्त्रेण मन्वादिशास्त्रेण नियन्त्रितमुदाहृतं । परव्यसनकाले निर्मितं सत्त्वमन्यत् । उत्कटानुत्कटलक्षणवैलक्षण्यमन्यशब्दार्थः । तयोः सापेक्षत्वनिरपेक्षत्वाभ्यां मिथो विरोधान्नैकशास्त्रत्वं संभवतीत्यर्थः । अत्र दृष्टान्तमाह—तेजस्तिमिरयोः समानमधिकरणं ययोस्तयोर्भावः सामानाधिकरण्यमेकाश्रयत्वं कुतः । न कुतश्चित् । तयोः सहावस्थानविरोधादिति भावः ।

तस्मादुभयोरुदितानुदितहोमवद्भिन्नविषयत्वादितरेतरशास्त्रविरोधो न बाधक इति भावः ॥

तर्हि नः किमिदानीं कार्यमत आह—

इन्द्रप्रस्थगमस्तावत्कारि मा सन्तु चेदयः ।
आस्माकदन्तिसांनिध्याद्वामनीभूतभूरुहः ॥६०॥

इन्द्रप्रस्थेति ॥ इन्द्रप्रस्थस्य पार्थनगरस्य गमो गमनम् । 'ग्रहवृदृनिश्चिगमश्च' इत्यप्रत्ययः । तावदिदानीम् मा कारि तावत् । न क्रियतामित्यर्थः । 'यावत्तावत्परिच्छेदे कार्त्स्न्ये मानावधारणे' इति विश्वः । कृञः कर्मणि लुङ् । 'माङि लुङ्' इत्याशीरर्थे । 'न माङ्योगे' इत्यट्प्रतिषेधः । किन्तु चेदयश्चेदिदेशाः । अस्माकमिमे आस्माकाः । 'युष्मदस्मदोरन्यतरस्यां खञ्च' इति विकल्पादण्प्रत्ययः । 'तस्मिन्नणि च युष्माकास्माकौ' इत्यस्माकादेशः । संनिधिरेव सांनिध्यम् । स्वार्थे ष्यञ्प्रत्ययः । आस्माकानां दन्तिनां सांनिध्याद्वामनीभूताः शाखाभङ्गात्खर्वीभूता भूरुहो वृक्षा येषां ते तथोक्ताः सन्तु । चेदियात्रैव क्रियतामित्यर्थः । सा च प्रस्तुता प्रस्तुतेनैव स्वकार्येण गम्यत इति पर्यायोक्तालंकारः । 'कारणं गम्यते यत्र प्रस्तुतात्कार्यवर्णनात् । प्रस्तुतत्वेन संबन्धात्पर्यायोक्तः स उच्यते ॥' इति लक्षणात् ॥

निरुद्धवीवधासारप्रसारा गा इव व्रजम् ।
उपरुन्धन्तु दाशार्हाः पुरीं माहिष्मतीं द्विषः ॥६१॥

निरुद्धेति ॥ किंच दाशार्हा यादवाः वीवधो धा-

न्यादिप्राप्तिः, आसारः सुहृद्बलम्, प्रसारस्तृणकाष्ठादेः प्रवेशः । 'धान्यादेर्वीवधः प्राप्तिरासारस्तु सुहृद्बलम् । प्रसारस्तृणकाष्ठादेः प्रवेशः' इति वैजयन्ती। ते निरुद्धा यैस्ते तथोक्ताः, अन्यत्र निरुद्धौ वीवधानां पर्याहारापरनाम्नां स्कन्धवाह्यव्रीराद्याहरणसाधनभारविशेषाणामासारप्रसारौ प्रवेशनिर्गमौ यैस्ते तथोक्ताः । 'विवधो वीवधो भारे पर्याहाराध्वनोरपि' इति हेमचन्द्रः। व्रजं गोष्ठम्। 'व्रजः स्याद्गोकुलं गोष्ठम्' इति वैजयन्ती । गा इव माहिष्मतीं पुरीं द्विषोऽरीननुपरुन्धन्तु। व्रजे गा इव माहिष्मत्यामरीनावृण्वन्त्वित्यर्थः । 'दुहियाच्पिरुधि-' इति द्विकर्मकत्वम्। तत्र पुरीव्रजावकथितं कर्म, अन्यदीप्सितं कर्म ॥

तर्हि पार्थप्रार्थनायाः का गतिरित्याशङ्क्य, उपेक्षैव गतिरित्याह—

यजतां पाण्डवः स्वर्गमवत्विन्द्रस्तपत्विनः ।
वयं हनाम द्विषतः सर्वः स्वार्थं समीहते ॥ ६२ ॥

यजतामिति ॥ पाण्डवो युधिष्ठिरो यजतां यागं करोतु । इन्द्रः स्वर्गमवतु रक्षतु । इनोऽर्कः 'इनः पत्यौ नृपार्कयोः' इति मेदिनी । तपतु प्रकाशताम् । वयं द्विषोऽरीन्हनाम मारयाम । 'आडुत्तमस्य पिच्च' इत्याडागमः । सर्वत्र प्राप्तकाले लोट् । तथाहि–सर्वो जनः स्वार्थं स्वप्रयोजनं समीहतेऽनुसंधत्ते । इन्द्रादिसमानयोगक्षेमो नः पार्थ इत्यर्थः । अर्थान्तरन्यासः ॥

प्राप्यतां विद्युतां संपत्संपर्कादर्करोचिषाम् ।
शस्त्रैर्द्विषच्छिरश्छेदप्रोच्छलच्छोणितोक्षितैः॥६३॥

प्राप्यतामिति ॥ किंच द्विषतां शिरश्छेदेन प्रोच्छलतोद्गच्छता शोणितेनोक्षितैः सिक्तैः शस्त्रैरर्करोचिषां संपर्कात्संबन्धाद्विद्युतां संपल्लक्ष्मीः प्राप्यतामिति । निदर्शनालंकारः ॥

इति संरम्भिणो वाणीर्बलस्यालेख्यदेवताः ।
सभाभित्तिप्रतिध्वानैर्भयादन्ववदन्निव ॥ ६४ ॥

इतीति ॥ इतीत्थं संरम्भिणः क्षुभितस्य बलभद्रस्य वाणीरालेख्यदेवताश्चित्रलिखितदेवताः सभायाः सदोगृहस्य भित्तीनां प्रतिध्वानैः । प्रतिध्वनिव्याजेनेत्यर्थः । भयादन्ववदन्ननुवादयन्निवेत्युत्प्रेक्षा ॥

निशम्य ताः शेषगवीरभिधातुमधोक्षजः ।
शिष्याय बृहतां पत्युः प्रस्तावमदिशद्दृशा ॥ ६५ ॥

निशम्येति ॥ अधः कृतमक्षजमिन्द्रियजं ज्ञानं येन सोऽधोक्षजो हरिः, ताः शेषस्य शेषावतारस्य बलभद्रस्य गाः वाचः शेषगवीः । 'गोरतद्धितलुकि' इति टच् । टित्वान्ङीप् । निशम्य श्रुत्वा । 'निशाम्यतीति श्रवणे तथा निशमयत्यपि' इति भट्टमल्लः । तत्र शाम्यतेरिदं रूपम् । अन्यथा निशमय्येति स्यात् । अत एव वामनः । 'निशम्यनिशमय्यशब्दौ प्रकृतिभेदात्' । इति बृहतां वाचां पत्युर्बृहस्पतेस्तस्य शिष्यायोद्धवायाभिधातुं वक्तुं दृशा दृक्संज्ञया प्रस्तावम-

अवसरमादरादतिसृष्टवान् । 'प्रस्तावः स्यादवसरः' इत्यमरः ॥

भारतीमाहितभरामथानुद्धतमुद्धवः ।
तथ्यामुतथ्यानुजवज्जगादाग्रे गदाग्रजम् ॥ ६६ ॥

भारतीमिति ॥ अथ कृष्णानुज्ञानन्तरमुद्धवः आहितो भरोऽर्थगौरवं यस्यां सा तां तथ्यां यथार्थां भारतीं वाचम् । अनुद्धतमगर्वितं यथा तथा गदस्याग्रजं कृष्णम् । अग्रे पुरत इति प्रागल्भ्योक्तिः, उतथ्यस्य महर्षेरनुजो बृहस्पतिः । 'उतथ्यावरजो जीवः' इति विश्वः । तद्वत्तेन तुल्यं जगाद । 'तेन तुल्यं क्रिया चेद्वतिः' इति वतिः । तद्धितगतेयमुपमा ॥

किं जगादेत्याह—

संप्रत्यसांप्रतं वक्तुमुक्ते मुसलपाणिना ।
निर्धारितेऽर्थे लेखेन खलूक्त्वा खलु वाचिकम् ॥ ६७ ॥

संप्रतीति ॥ संप्रति मुसलपाणिना बलभद्रेण । केवलं शूरेणेति ध्वनिः । उक्ते सति वक्तुमसांप्रतमयुक्तम् । साधूक्तत्वादभ्याससमानयोगक्षेमप्रसङ्गादिति ध्वनिः । सांप्रतशब्दस्यार्हार्थत्वात्तद्योगे 'शकधृष—' इत्यादिना तुमुन् । तथा हि लेख्येन पत्रेणार्थे वाच्ये निर्धारिते निर्णीते सति वाचिकं व्याहृतार्थां वाचम् । संदेशवचनमित्यर्थः । 'संदेशवाग्वाचिकं स्यात्' इत्यमरः । 'वाचो व्याहृतार्थायाम्' इति ठक् । उक्त्वा खलु । न वाच्यं खल्वित्यर्थः । खलुराद्यः प्रतिषेधे, अन्त्यो वाक्यालंकारे । 'निषेधवाक्यालंकारे जि-

ज्ञासानुनये खलु' इत्युभयत्राप्यमरः। 'अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा' इति क्त्वाप्रत्ययः। इह न पादादौ खल्वादय इति निषेधस्योद्वेजकाभिप्रायत्वात्। नञर्थखलुशब्दस्यानुद्वेजकत्वात् नञ्वदेवपादादौ प्रयोगे न दूष्यतीत्यनुसंधेयम्। लिखितार्थे वाचिकमिव बलोक्ते मदुक्तिरनवकाशेति वाक्यार्थप्रतिबिम्बकरणात्। स्पष्टस्तावदृष्टान्तः। स्तुतिव्याजेन निन्दावगमाद्व्याजस्तुतिश्च। लक्षणं चाग्रे वक्ष्यते ॥

तर्हि किं तूष्णींभूतेन भाव्यं नेत्याह--

तथापि यन्मय्यपि ते गुरुरित्यस्ति गौरवम्।
तत्प्रयोजककर्तृत्वमुपैति मम जल्पतः॥ ९८॥

तथापीति॥ तथापि बलेन निर्णीतेऽपि ते तव मय्यपि। बलभद्र इवेत्यपिशब्दार्थः। गुरुरित्येव यद्गौरवमादरः तद्गौरवं जल्पतः जल्पने प्रयोज्यकर्मणो मे प्रयोजककर्तृत्वं प्रेरकत्वमुपैति। अतो वक्ष्यामीत्यर्थः। न हि पण्डितैः सादरं पृष्टस्य विशेषज्ञस्याज्ञवत्तूष्णींभावो युक्त इति भावः॥

ननु रामेणैव सर्वं प्रपञ्चेनोक्तम्, संप्रति किं ते वाच्यमस्तीत्याशङ्क्य वृथा प्रपञ्चोऽयमिति हृदि निधाय स्तुवन्नाह--

वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव।
अनन्ता वाङ्मयस्याहो गेयस्येव विचित्रता॥९९॥

वर्णैरित्यादित्रयेण॥ कतिपयैः परिमितैर्वर्णैः पञ्चाशतैव मातृकाक्षरैः, कतिपयैः सप्तभिरेव स्वरै-

निषादादिभिर्ग्रथितस्य गुम्फितस्य वाङ्मयस्य शब्द-जालस्य । 'एकाचोऽपि नित्यं मयटमिच्छन्ति' इति स्वार्थे मयट् । गीयत इति गेयं तस्य गानस्येव विचित्रता रचनाभेदादनन्ता । अपरिमिता । भवतीत्यर्थः । अहो अतस्तेन साधूक्तेऽपि विशेषानन्त्यान्ममापि वक्तव्यमस्तीत्येको भावः । तस्य दुरुक्तत्वान्ममैवा-स्तीत्यन्यः । प्रत्ययवमिवोपादानादनेकैवेयमुपमा ॥

बह्वपि स्वेच्छया कामं प्रकीर्णमभिधीयते ।
अनुज्झितार्थसंबन्धः प्रबन्धो दुरुदाहरः ॥ ७० ॥

बह्वपीति ॥ स्वेच्छया स्वप्रतिभानुसारेण प्रकी-र्णमसंगतं बह्वपि कामं यथेष्टमभिधीयते । किंतु, अनुज्झितोऽर्थसंबन्धः पदार्थसंगतिर्यस्मिन्स प्रबन्धः संदर्भः दुरुदाहरो दुर्वचः । हरतेः खल् प्रत्ययः । रामेण तु संगतमेवोक्तमिति स्तुतिः, असंगतमेवोक्तमिति निन्दा च गम्यते ॥

अदीयसीमपि घनामनल्पगुणकल्पिताम् ।
प्रसारयन्ति कुशलाश्चित्रां वाचं पटीमिव ॥ ७१ ॥

अदीयसीमिति ॥ कुशला वक्तारो अदीयसीम-तिसुकुमारात्तरां, श्लक्ष्णतरां च तथापि घनामर्थगु-र्वीम्, अन्यत्र सान्द्राम् । कदलीदलकल्पामित्यर्थः । अनल्पैर्बहुभिर्गुणैः श्लेषादिभिः, तन्तुभिश्च कल्पितां रचितां, निर्मितां च चित्रां शब्दादिविचित्रां, विचित्र-रूपां च वाचं पटीं शाटीमिव प्रसारयन्ति । रामवा-गप्येवंविधेति स्तुतिः, रामवाक्तु नैवंविधेति निन्दा

च गम्यते । अत्र श्लेषस्य शुद्धविषयासंभवेन सर्वालंकारबाधकत्वादुपमाप्रतिभोत्थापितः प्रकृताप्रकृतश्लेषोऽयमित्यलंकारसर्वस्वकारः । एवं च पूर्णोपमाया निर्विषयत्वप्रसङ्गाच्छ्लेषप्रतिभोत्थापितेयमुपमैवेत्यन्ये ॥

अथोद्धवः स्वसिद्धान्तं वर्णयिष्यन्स्तुत्या गर्वं परिहरन्हरिमभिमुखीकरोति—

विशेषविदुषः शास्त्रं यत्तवोद्ग्राह्यते पुरः ।
हेतुः परिचयस्थैर्ये वक्तुर्गुणनिकैव सा ॥ ७२ ॥

विशेषेति ॥ विशेषानवान्तरभेदान्वेत्ति विशेषविद्वान् तस्य विशेषविदुषो विशेषज्ञस्य । गतिबुद्ध्यादिपाठाद्द्वितीयासमासः । तव पुरोऽग्रे शास्त्रं नीतिशास्त्रमुद्ग्राह्यते उपन्यस्यत इति यत् । 'उद्ग्राहितमुपन्यस्तम्' इति वैजयन्ती । सा । तदुद्ग्रहणमित्यर्थः । विधेयप्राधान्यात्स्त्रीलिङ्गत्वम् । वक्तुरुद्ग्राहयितुः परिचयस्थैर्येऽभ्यासदार्ढ्ये हेतुर्गुणनिका । आम्रेडितमेवेति यावत् । न तु वैदुष्यप्रकटनमिति भावः । 'गुण आम्रेडने' चौरादिकात् 'ण्यासश्रन्थो युच्' इति युच् । ततः संज्ञायां कन् । कात्पूर्वस्येकारः ॥

संप्रति स्वमतमुपन्यस्यति—

प्रज्ञोत्साहावतः स्वामी यतेताधातुमात्मनि ।
तौ हि मूलमुदेष्यन्त्या जिगीषोरात्मसंपदः ॥ ७३ ॥

प्रज्ञेति ॥ अतोऽस्मात्कारणात्स्वमस्यास्तीति स्वामी प्रभुः । 'स्वामिन्नैश्वर्ये' इति निपातः । प्रज्ञोत्साहौ

मन्त्रोत्साहशक्ती आत्मनि स्वस्मिन्नाधातुं संपादयितुं यतेत । स्वयमुभयशक्तिमान्भवेदित्यर्थः । कुतः—हि यस्मात्तौ प्रज्ञोत्साहौ उदेष्यन्त्याः वर्त्स्यन्त्याः जिगीषोरात्मनः संपदः प्रभुशक्तेर्मूलं निदानम् । मन्त्रोत्साहग्रहणं दृष्टान्तार्थम् । यथोत्साहस्तथा मन्त्रोऽपि ग्राह्यो, न तु केवलोत्साह इति बलभद्रापवादः ॥

उत्साहवत्प्रज्ञापि ग्राह्येत्युक्तं, तस्याः प्रयोजनमाह—

सोपधानां धियं धीराः स्थेयसीं खट्वयन्ति ये ।
तत्रानिशं निषण्णास्ते जानते जातु न श्रमम् ॥७४॥

सोपधानामिति ॥ ये धीरा धीमन्तः सोपधानां सविशेषाम् । युक्तियुक्तामित्यर्थः । अन्यत्र सगेन्दुकां सोपबर्हामित्यर्थः । 'उपधानं विशेषे स्याद्गेन्दुके प्रणयेऽपि च' इति विश्वः । स्थेयसीं स्थिरतरामचपलां, द्रढीयसीं च । स्थिरशब्दादीयसुनि 'प्रियस्थिर—' इत्यादिना स्थादेशः । धियं खट्वयन्ति खट्वां पर्यङ्कं कुर्वन्ति । आश्रयन्तीत्यर्थः । 'शयनं मञ्चपर्यङ्कपल्यङ्काः खट्वया समाः' इत्यमरः । 'तत्करोति तदाचष्टे' इति णिच् । ते धीरास्तत्र धीखट्वायामनिशमश्रान्तं निषण्णा विश्रान्ताः सन्तो जातु कदाचिदपि श्रमं खेदं न जानते न विदन्ति । श्रमः खेदो रत्यादेरिति लक्षणम् । धीपूर्वक एवोत्साहः सेव्यो न केवल इति सर्वथा धीराश्रयणीयेत्यर्थः । अत्र धिय आरोप्यमाणायाः प्रकृतश्रमापनोदरूपोपकारपर्यन्ततया परिणामालं-

कारः । 'आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामः' इति लक्षणात् ॥

अथ प्रज्ञाप्रज्ञयोर्द्वाभ्यां वैषम्यमाह—

स्पृशन्ति शरवत्तीक्ष्णास्तोकमन्तर्विशन्ति च ।
बहुस्पृशापि स्थूलेन स्थीयते बहिरश्मवत् ॥७५॥

स्पृशन्तीति ॥ तीक्ष्णा निशितप्रज्ञाः शरवच्छरेण तुल्यं स्तोकमल्पमेव स्पृशन्ति । अन्तः कार्यस्य चान्तरं विशन्ति । अल्पायासेन बहु कार्यं साधयन्तीत्यर्थः । बहुस्पृशा व्यापिना स्थूलेन मन्देन, बृहता चाश्मनोपलेन तुल्यमश्मवत् । 'तेन तुल्यं क्रिया चेद्वतिः' बहिरेव । कार्यस्याकार्यस्य चेति भावः । स्थीयते स्थितिः क्रियते । मूढो हि अल्पस्य हेतोर्बहु प्रयासं करोति । मूषकग्रहणाय शिखरिखननं परिहासास्पदं भवतीति भावः । तद्धितगलेयमुपमा ॥

आरभन्तेऽल्पमेवाज्ञाः कामं व्यग्रा भवन्ति च ।
महारम्भाः कृतधियस्तिष्ठन्ति च निराकुलाः ॥७६॥

आरभन्त इति ॥ किंचाज्ञा अल्पं तुच्छमेवारभन्ते प्रक्रमन्ते । काममत्यन्तं व्यग्राः, त्वरिताश्च भवन्ति । न च पारं गच्छन्तीति भावः । कृतधियः शिक्षितबुद्धयस्तु महारम्भा महोद्योगा भवन्ति । निराकुला अव्यग्राश्च भवन्ति । पारं गच्छन्तीति भावः ॥

अथ प्रज्ञावानपि न प्रमाद्येदित्याह—

उपायमास्थितस्यापि नश्यन्त्यर्थाः प्रमाद्यतः ।
हन्ति नोपशयस्थोऽपि शयालुर्मृगयुर्मृगान् ॥७७॥

उपायमिति ॥ उपायमास्थितस्य प्राप्तस्यापि । उपायेनैव कार्यं साधयतोऽपीत्यर्थः । किमुत व्यग्रतयेति भावः । प्रमाद्यतोऽनवधानस्य । 'प्रमादोऽनवधानता' इत्यमरः । अर्थाः प्रयोजनानि नश्यन्ति । तथाहि—शयालुर्निद्रालुः । आलुचि शीङो वक्तव्यत्वादालुच् । मृगान्यातीति मृगयुर्व्याधः । 'मृगय्वादयश्च' इत्यौणादिकः कुप्रत्ययान्तो निपातः । 'व्याधो मृगवधाजीवो मृगयुर्लुब्धकश्च सः' इत्यमरः । उपशेरतेऽस्मिन्नित्युपशयो मृगमार्गस्थायिनो व्याधस्यात्मगुप्तिस्थानं गर्तविशेषः । 'एरच्' इत्यच्प्रत्ययः । तत्र तिष्ठतीत्युपशयस्थोऽपि मृगान्न हन्ति । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥

एवं प्रज्ञाया आवश्यकत्वमुक्तम्, तथोत्साहस्याप्याह—

उदेतुमत्यजन्नीहां राजसु द्वादशस्वपि ।
जिगीषुरेको दिनकृदादित्येष्विव कल्पते ॥७८॥

उदेतुमिति ॥ जेतुमिच्छुर्जिगीषुरेक एव द्वादशस्वपि राजसु मध्ये द्वादशस्वादित्येषु दिनकृतो दिनकरणे व्याप्रियमाण आदित्यः स इवेहामुत्साहमत्यजन्प्रयुञ्जान एव । न तु निरुद्योग इति भावः । उदेतुं कल्पते उदयाय प्रभवति । उत्साहशक्तिरेव प्रभुशक्तेरपि मूलमित्यर्थः । 'नानालिङ्गत्वाद्धेतूनां ना-

वासूर्यत्वम्' इति श्रुतेः । प्रतिमासमादित्यभेदा-
द्द्वादशत्वं तचैकस्यैव द्वादशात्मकत्वम् । 'द्वादशात्मा
दिवाकरः' इत्यभिधानात् । ते चार्यमादयः पुराणो-
क्ता द्रष्टव्याः । राजानस्तु 'अरिर्मित्रमरेर्मित्रं मित्र-
मित्रमतः परम् । तथारिमित्रमित्रं च विजिगीषोः
पुरस्सराः ॥' पञ्चेति शेषः । 'पार्ष्णिग्राहस्ततः पश्चा-
दाक्रन्दस्तदनन्तरम् । आसारावनयोश्चैव विजिगीषो-
स्तु पृष्ठतः ॥' पार्ष्णिग्राहासारः, आक्रन्दासारश्चेत्य-
र्थः । अत्र चत्वार इति शेषः । एवं नव भवन्ति ।
विजिगीषुर्दशमः । 'अरेश्च विजिगीषोश्च मध्यमो
भूम्यनन्तरः । अनुग्रहे संहतयोः समर्थो व्यस्तयोर्वधे ।
मण्डलाद्बहिरेतेषामुदासीनो बलाधिकः ॥' इति म-
ध्यमोदासीनाभ्यां सह द्वादश वेदितव्याः । पूर्णोप-
मा ॥

उपायमास्थितस्येत्यत्र राजा न प्रमाद्येदित्युक्तम्,
अप्रमादप्रकारमाह—

बुद्धिशस्त्रः प्रकृत्यङ्गो घनसंवृतिकञ्चुकः ।
चारेक्षणो दूतमुखः पुरुषः कोऽपि पार्थिवः ॥७६॥

बुद्धिशस्त्र इति ॥ बुद्धिरेव शस्त्रं यस्य स बुद्धिशस्त्रः ।
अमोघपातित्वात्तस्या इति भावः । प्रकृतयः स्वाम्या-
दिराज्याङ्गानि 'राज्याङ्गानि प्रकृतयः' इत्यमरः । ता एवा-
ङ्गानि यस्य सः । तद्वैकल्ये राज्ञो वैकल्यं स्यादिति भावः ।
घना दुर्भेदा संवृतिर्मन्त्रगुप्तिरेव कञ्चुकः कवचो यस्य स
तथोक्तः । मन्त्रभेदे राज्यभेदादिति भावः । चरतीति

चरः। पचाद्यच्। स एव चारो गूढपुरुषः। प्रज्ञादित्वात्स्वार्थिकोऽण्प्रत्ययः। 'चारश्च गूढपुरुषः' इत्यमरः। स एवेक्षणं चक्षुर्यस्य स चारेक्षणः। अन्यथा स्वपरमण्डलवृत्तान्तादर्शनात्। 'अन्धस्येवान्धलग्नस्य विनिपातः पदे पदे' इति भावः। दूतः संदेशहरः। 'स्यात्संदेशहरो दूतः' इत्यमरः। स एव मुखं वाग्यस्यासौ दूतमुखः। अन्यथा मूकस्येव वाग्व्यवहारासिद्धौ तत्साध्यासाध्यकार्यप्रतिबन्धः स्यादिति भावः। एवंभूतः पार्थिवः कोऽपि पुरुषोऽन्य एवायम्। लोकविलक्षणः पुमानित्यर्थः। अतो राज्ञा बुद्ध्यादिसंपन्नेन भवितव्यम्। एतदेवाप्रमत्तत्वम्। अन्यथा स्वरूपहानिः स्यादिति भावः। अत्र कोऽपीति राज्ञो लोकसंबन्धेऽपि तदसंबन्धोक्त्या तद्रूपातिशयोक्तिः। सा च बुद्धिशस्त्र इत्यादिरूपकनिर्व्यूढेति तेन सहाङ्गाङ्गिभावेन संकरः॥

चतुर्थोपायसाध्य इत्यादिना यत्क्षात्रमेव कर्तव्यमुक्तं तत्रोत्तरमाह—

तेजः क्षमा वा नैकान्तं कालज्ञस्य महीपतेः।
नैकमोजः प्रसादो वा रसभावविदः कवेः॥८७॥

तेज इति॥ कालं जानातीति कालज्ञस्तस्य। अयं काल इति विदुष इत्यर्थः। 'आतोऽनुपसर्गे कः'। न तु 'इगुपध—' इत्यादिना कविधिः। समासे कर्मोपपदस्यैव बलवत्त्वभाषणात्। तस्य महीपतेस्तेजः क्षात्रमेवेति वा क्षमैव वा एकान्तं नियमो न नास्ति,

किंतु यथाकालमुभयमप्याश्रयणीयमित्यर्थः । तथा हि–रसाञ्छृङ्गारादीन्, भावान् निर्वेदादींश्च वेत्ति यस्तस्य रसभावविदः । भावग्रहणं संपातायातम् । कवेः कवितुरेकं केवलमोजः प्रौढप्रबन्धत्वं वा एकः प्रसादः, सुकुमारप्रबन्धत्वं वा न । किंतु तत्र हि रसानुगुण्येन यथायोग्यमुभयमप्युपादेयम् । दृष्टान्तालंकारः ॥

यदुक्तं 'क्रियासमभिहारेण विराध्यन्तं सहेत कः' इति तत्रोत्तरमाह–

कृतापचारोऽपि परैरनाविष्कृतविक्रियः ।
असाध्यः कुरुते कोपं प्राप्ते काले गदो यथा ॥८१॥

कृतापचार इति ॥ परैः शत्रुभिः कृतः अपचारोऽपकारः, अपथ्यं च यस्य सः, तथाप्यनाविष्कृतविक्रियोऽन्तर्गूढविकारः अत एवासाध्योऽप्रतिसमाधेयः सन् गदो यथा रोग इव । 'इववद्वा यथाशब्दः' इति दण्डी । काले बलचयावसरे प्राप्ते सति कोपं कुरुते। प्रकुप्यतीत्यर्थः । तदुक्तम्—'वहेदमित्रं स्कन्धेन यावत्कालविपर्ययः । तमेव चागते काले भिन्द्याद्घटमिवाश्मना ॥' इति ॥

इतश्च क्षन्तव्यमिदानीमित्याह–

मृदुव्यवहितं तेजो भोक्तुमर्थान्प्रकल्पते ।
प्रदीपः स्नेहमादत्ते दशयाभ्यन्तरस्थया ॥ ८२ ॥

मृद्विति ॥ मृदुना मृदुवस्तुना व्यवहितमन्तर्हितं तेजः अर्थान्भोक्तुं प्रकल्पते प्रभवति । तथाहि–प्रदी-

पोऽभ्यन्तरस्थया मध्यस्थया दशया वर्त्या । 'दशा वर्तावृवस्थायां स्नेहस्तैलादिके रसे' इति विश्वः । स्नेहं तैलादिकमर्थमादत्ते। अन्यथा स्वयमेव निर्वाणादिति। ततः क्षान्तिपूर्वमेव क्षात्रं फलतीति सर्वथा प्रथमं क्षन्तव्यमिति भावः । विशेषेण सामान्यसमर्थनादर्थान्तरन्यासः ॥

तर्हि पौरुषं मा भूदित्यं क्षममाणस्य दैवमेव श्रेयो विधास्यतीत्याशङ्क्याह—

नालम्बते दैष्टिकतां न निषीदति पौरुषे ।
शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते ॥ ८३ ॥

नालम्बत इति ॥ विद्वानभिज्ञः दिष्टे मतिर्यस्येति दैष्टिकः । दैवप्रमाणक इत्यर्थः । 'दैवं दिष्टं भागधेयम्' इत्यमरः। 'अस्ति नास्ति दिष्टं मतिः' इति ठक्। तद्भावं दैष्टिकतामेव नालम्बते । सर्वथा यद्भविष्यस्य विनाशादिति भावः । तथा पौरुषे केवलपुरुषकारेऽपि । युवादित्वादण्प्रत्ययः । न निषीदति न तिष्ठति। दैवप्रातिकूल्ये तस्य वैफल्यादिति भावः । किंतु सत्कविः सत्कविता शब्दार्थाविव । तयोः काव्यशरीरत्वादिति भावः। यथाह वामनः—'अदोषौ सगुणौ सालंकारौ शब्दार्थौ काव्यम्' इति । द्वयं पौरुषं, दैवं चापेक्षते । अतः पौरुषमप्यावश्यकम्, किंतु काले कर्तव्यमिति विशेषः । पौरुषादृष्टयोः परस्परसापेक्षत्वादिति भावः ॥

अथ क्षान्तेः फलमाह—

स्थायिनोऽर्थे प्रवर्तन्ते भावाः संचारिणो यथा।
रसस्यैकस्य भूयांसस्तथा नेतुर्महीभृतः ॥ ८४ ॥

स्थायिन इति ॥ रस्यते स्वाद्यते इति रसः शृङ्गारादिः। रसतेः स्वादनार्थत्वाद्रस्यन्त इति ते रसा इति निर्वचनात्। तस्य रसस्य रसीभवतः स्थायिभावस्य रत्यादेः। 'रतिर्हासश्च क्रोधश्च शोकोत्साहभयानि च। जुगुप्साविस्मयशमाः स्थायिभावाः प्रकीर्तिताः ॥' इत्युक्तत्वात्। एकस्यैवार्थे स्वादुभावरूपे प्रयोजने भूयांसः संचारिणो व्यभिचारिणो भावा निर्वेदादयः। विभावादीनामुपलक्षणमेतत्। यथा प्रवर्तन्ते। तदुक्तम्—'विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः। आनीयमानः स्वादुत्वं स्थायिभावो रसः स्मृतः ॥' इति। तथा स्थायिनः स्थिरस्य। क्षान्त्या कालं प्रतीक्षमाणस्येत्यर्थः। एकस्यैव नेतुर्विजिगीषोर्नायकस्यार्थे प्रयोजने भूयांसो महीभृतो राजानः प्रवर्तन्ते। स्वयमेवास्य कार्यं साधयन्तीत्यर्थः। ततः क्षन्तव्यमिति भावः। केचित्तु भावपदस्यापि रसपरत्वमाश्रित्य यथा संचारिणः प्रसङ्गादागन्तुका अन्ये रसाः स्थायिनः स्थिरस्यैकस्य मुख्यस्यार्थे प्रवर्तन्ते, यथास्मिन्नेव काव्ये वीरस्य शृङ्गारादय इति व्याचक्षते। उपमालंकारः ॥

क्षान्तिपक्ष एव गुणान्तरमाह—

तन्त्रावापविदा योगैर्मण्डलान्यधितिष्ठता।
सुनिग्रहा नरेन्द्रेण फणीन्द्रा इव शत्रवः ॥८५॥

तन्त्रेति ॥ तन्त्रावापौ स्वपरराष्ट्रचिन्तनम् । अन्यत्र तन्त्रावापं शास्त्रौषधप्रयोगं च वेत्ति यस्तेन तन्त्रावापविदा । 'तन्त्र स्वराष्ट्रचिन्तायामावापः परचिन्तने । शास्त्रौषधान्तमुख्येषु तन्त्रम्' इति वैजयन्ती । योगैः सामाद्युपायैः, अन्यत्र देवताध्यानैश्च 'योगः संनहनोपायध्यानसंगतियुक्तिषु' इत्यमरः । मण्डलानि स्वपरराष्ट्राणि, माहेन्द्रादिदेवतायतनानि च अधितिष्ठतातिक्रमता नरेन्द्रेण राज्ञा, विषवैद्येन च । 'नरेन्द्रो वार्तिके राज्ञि विषवैद्ये च कथ्यते' इति विश्वः । शत्रवः फणीन्द्रा इव सुनिग्रहाः सुखेन निग्राह्याः । एवं च प्रकृताप्रकृतविषयः श्लेषः । उपमैवेति केचित् ॥

'प्रज्ञोत्साहावतः स्वामी' इत्यत्र तावेव प्रभुशक्तेर्मूलमित्युक्तं तदेव व्यनक्ति—

करप्रचेयामुत्तुङ्गः प्रभुशक्तिं प्रथीयसीम् ।
प्रज्ञाबलबृहन्मूलः फलत्युत्साहपादपः ॥ ८६ ॥

करेति ॥ उत्तुङ्गो महोन्नतः प्रज्ञाबलं मन्त्रशक्तिरेव बृहत्प्रधानं मूलं यस्य सः, उत्साह एव पादपः करेण बलिना प्रचेयां वर्धनीयां, हस्तग्राह्यां, च । 'बलिहस्तांशवः कराः' इत्यमरः । प्रथीयसीं पृथुतराम् । 'रऋतो हलादेः—' इति रेफादेशः । प्रभुशक्तिं तेजोविशेषम् । 'स प्रतापः प्रभावश्च यत्तेजः कोशदण्डजम्' इत्यमरः । फलति । प्रसूते इत्यर्थः । 'फल नि-

स्पत्तौ'। मन्त्रपूर्वक एवोत्साहः फलति। विपरीतस्तु छिन्नमूलो वृक्ष इव शुष्यतीति भावः। रूपकालंकारः॥

विमृश्यकारिणस्तु विश्वमपि विधेयं स्यादिति ग्रयेणाह—

अनल्पत्वात्प्रधानत्वाद्वंशस्येवेतरे स्वराः।
विजिगीषोर्नृपतयः प्रयान्ति परिवारताम्॥८७॥

अनल्पत्वादिति॥ अनल्पत्वात्प्रज्ञोत्साहाधिकत्वादत एव प्रधानत्वान्मण्डलाभिज्ञत्वात्, अन्यत्रानल्पत्वादुच्चैस्तरत्वात् प्रधानत्वान्नायकस्वरत्वाच्च वंशस्य वंशवाद्यस्वरस्य इतरे स्वरा वीणागानादिशब्दा इव। अथवा आश्रयत्वाद्वंश इव वंशस्तत्कालविहितः स्वर उच्यते तस्य स्वरस्येतराः षड्जादयः विजिगीषोर्नृपतयोऽन्ये मण्डलपरिवर्तिनो राजानः परिवारतां पोष्यतां प्रयान्ति। तत्कार्यमेव साधयन्तीत्यर्थः। तस्माद्विमृश्य कर्तव्यमित्यर्थः॥

अप्यनारभमाणस्य विभोरुत्पादिताः परैः।
व्रजन्ति गुणतामर्थाः शब्दा इव विहायसः॥८८॥

अपीति॥ किंच अनारभमाणस्य स्वयमकिंचित्कुर्वाणस्यापि विभोः प्रभोः, व्यापकस्य च परैरन्यैर्नृपतिभिः, शङ्खभेर्यादिभिश्च उत्पादिताः संपादिताः,जनिताश्चार्थाः प्रयोजनानि विहायस आकाशस्य शब्दा इव गुणतां विशेषणतां कारणत्वाद्गुणत्वं व्रजन्ति। शक्तो हि राजा स्वयमुदासीन एवाकाश-

वत्स्वमहिम्नैव कार्यदेशं व्याप्नुवच्छब्दादीनिव सर्वार्थानपि स्वकीयतां नयतीत्यर्थः। 'गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुषु' इति वैजयन्ती ॥

यातव्यपार्ष्णिग्राहादिमालायामधिकद्युतिः।
एकार्थतन्तुप्रोतायां नायको नायकायते ॥ ८९ ॥

यातव्येति ॥ किंच एकार्थ एकप्रयोजनं स एव तन्तुः सूत्रं तत्र प्रोतायाम्। एकाभीष्टाभिलाषिण्यामित्यर्थः। प्रपूर्वाद्वेञः कर्मणि क्तः। 'वचिस्वपि–' इत्यादिना संप्रसारणम्। यातव्योऽभिषेणयितव्योऽरिः पार्ष्णि गृह्णातीति पार्ष्णिग्राहः पृष्ठानुधावी। कर्मण्यण्। तावादी येषां ते पूर्वोक्ताः पङ्क्तिशः स्थितास्त एव माला रत्नमालिका तस्यामधिकद्युतिर्महातेजा नायकः शक्तिसंपन्नो जिगीषुर्नायकायते मध्यमणिरिवाचरति। स्वयमेव सर्वोत्कर्षेण वर्तत इत्यर्थः। तस्माद्विमृष्य कर्तव्यमिति भावः। 'नायको नेतरि श्रेष्ठे हारमध्यमणावपि' इति विश्वः। 'उपमानादाचारे' इति क्यङ्। 'अकृत्सार्वधातुक–' इति दीर्घः। नायकायते इत्युपमा। अन्यथानुशासनविरोधात्। एकार्थतन्त्वित्यत्र तु रूपकमधिष्ठानतिरोधानेनारोप्यमाणतन्तुत्वस्यैवोद्भटत्वात्प्रोतत्वसिद्धेस्तदेव युक्तम्। तद्बलात्पार्ष्णिग्राहादिमालायामित्यत्रापि रूपकमेव। तदनुप्राणिता चेयमुपमेत्यङ्गाङ्गिभावेन तयोः संकरः ॥

अथ विमृष्यकरणप्रकारमाह—

षाड्गुण्यमुपयुञ्जीत शक्त्यपेक्षो रसायनम् ।
भवन्त्यस्यैवमङ्गानि स्थास्नूनि बलवन्ति च ॥६०॥

षाड्गुण्यमिति ॥ शक्तिं प्रभावादित्रयं, बलं चापेक्षते इति शक्त्यपेक्षः सन् । पचाद्यच् 'शक्तिर्बले प्रभावादौ' इति विश्वः । षड्गुणा एव षाड्गुण्यं संधिविग्रहादिषट्कम् । चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्प्रत्ययः । तदेव रसायनमौषधविशेषमुपयुञ्जीत सेवेत । 'रसायनं विहंगेऽपि जराव्याधिभिदौषधे' इति विश्वः । एवं सत्यस्य प्रयोक्तुरङ्गानि स्वाम्यादीनि । 'स्वामी जनपदोऽमात्यः कोषो दुर्गबलं सुहृत् । राज्यं सप्त प्रकृत्यङ्गं नीतिज्ञाः संप्रचक्षते ॥' इति । गात्राणि च स्थास्नूनि स्थिराणि । कालान्तरक्षमाणीत्यर्थः । 'ग्लाजिस्थश्च–' इति ग्स्नुः । बलवन्ति च परपीडाक्षमाणि च भवन्ति । श्लिष्टपरम्परितरूपकम् ॥

स्थाने शमवतां शक्त्या व्यायामे वृद्धिरङ्गिनाम् ।
अयथाबलमारम्भो निदानं क्षयसंपदः ॥ ६१ ॥

स्थाने इति ॥ किंच स्थाने शक्यविषये शमवतां क्षमावतामङ्गिनां सप्ताङ्गिनां राज्ञां, शरीरिणां च शक्त्या प्रभावाद्यनुसारेण, बलेन च व्यायामे व्यापारे । षाड्गुण्यप्रयोगे गमनादौ च सतीत्यर्थः । वृद्धिरुपचयः । राज्यस्य, शरीरस्य चेति भावः । विपक्षे बाधकमाह–अयथाबलं शक्त्यतिक्रमेण । 'यथाऽसादृश्ये' इत्यव्ययीभावे नञ्समासः । आरम्भो व्यायामः । क्षयसंपदोऽत्यन्तहानेर्निदानमादिकारणम् । अङ्गानामिति

भावः । तस्मादस्माकमकस्माच्चैद्यास्कन्दनमश्रेयस्कर-मिति भावः । अत्र विशेषस्यापि श्लिष्टत्वाच्छब्दशा-क्तिमूलो वस्तुना वस्तुध्वनिः । अतो द्वयानामङ्गिरा-औपम्यं च गम्यते इति संक्षेपः ॥

फलितमाह—

तदीशितारं चेदीनां भवांस्तमवमंस्त मा ।
निहन्त्यरीनेकपदे य उदात्तः स्वरानिव ॥ ९२ ॥

तदिति ॥ तत्तस्मादशक्यार्थस्याकार्यत्वात्तं चे-दीनामीशितारं शिशुपालं भवान्मावमंस्त नावम-न्यस्व । मन्यतेर्माङि लुङ् । अनुदात्तत्वान्नेडागमः । कुतो यश्चैद्यः उदात्तः स्वरानुदात्तानिवारीनेकपदे एकस्मिन्पदन्यासे, सुप्तिङन्तलक्षणे च निहन्ति, नीचैः करोति च । अतिशूरत्वात् । 'अनुदात्तं पदमे-कवर्जम्' इति परिभाषाबलाच्चेति भावः ॥

न चायमेकाकी किं नः करिष्यतीति मन्तव्य-मित्याह—

मा वेदि यदसावेको जेतव्यश्चेदिराडिति ।
राजयक्ष्मेव रोगाणां समूहः स महीभृताम् ॥ ९३ ॥

मा वेदीति ॥ असौ चेदिराट् एकः एकाकी अतो जेतव्यः सुजय इति मा वेदि मा ज्ञायि । वेत्तेः क-र्मणि माङि लुङ् । यद्यस्मात्स चेदिराट् राज्ञश्चन्द्रस्य यक्ष्मा, राजा चासौ यक्ष्मेति वा राजयक्ष्मा क्षयरो-गो रोगाणामिव महीभृतां समूहः समष्टिरूपः । त-थाह वाग्भटः—'अनेकरोगानुगतो बहुरोगपुरःसरः ।

राजयक्ष्मा क्षयः शोषो रोगराडिति च स्मृतः ॥ न-क्षत्राणां द्विजानां च राज्ञोऽभूद्यदयं पुरा। यच्च राजा च यक्ष्मा च राजयक्ष्मा ततो मतः ॥' इति । अतो दुर्जेय इति भावः । एतेन 'चिरस्य मित्रव्यसनी सु-दमो दमघोषजः' इति निरस्तम् ॥

अथास्य सर्वराजसमष्टितामेव द्वाभ्यां व्या-चष्टे—

संपादितफलस्तेन सपक्षः परभेदनः ।
कार्मुकेणेव गुणिना बाणः संधानमेष्यति ॥ ९४ ॥

संपादितेति ॥ संपादितं फलं लाभो, बाणाग्रं च यस्य सः । 'फलं लाभशराग्रयोः' इति शाश्वतः' । सपक्षः ससुहृत्, कङ्कादिपत्रयुतश्च परेषां भेदकः श-त्रुविदारणः बाणो बाणासुरः, शरश्च । गुणिना शौ-र्यादिगुणवता, अधिज्येन च तेन चैद्येन कर्मणे प्रभ-वती कार्मुकम् । 'कर्मण उकञ्' । तेनैव संधानं संधि-मेष्यति । अतो नैकाकीति भावः । अत्राप्युपमा श्ले-षो वा मतभेदात् ॥

ये चान्ये कालयवनशाल्वरुक्मिद्रुमादयः ।
तमःस्वभावास्तेऽप्येनं प्रदोषमनुयायिनः ॥ ९५ ॥

ये चेति ॥ ये चान्ये कालयवनशाल्वरुक्मिद्रुमा-दयो राजानस्तमःस्वभावास्तमोगुणात्मका अत एव तेऽपि प्रदोषं प्रकृष्टदोषम् । 'प्रदोषो दुष्टरात्र्यंशौ' इ-ति वैजयन्ती । तामसमेवैनं चैद्यमनुयायिनोऽनुया-स्यन्ति । सादृश्यादिति भावः । 'भविष्यति गम्या-

दयः' इति णिनिर्भविष्यदर्थे । 'अकेनोर्भविष्यदाधमर्ण्ययोः' इति षष्ठीप्रतिषेधाद्द्वितीया । यथा ध्वान्तं रजनीमुखमनुयाति तद्वदिति वस्तुनालंकारध्वनिः ॥

ननु बाणादयोऽस्मादिभिः कृतसंधाना इदानीं [illegible] विराधयन्तीत्यत आह—

उपजापः कृतस्तेन तानाकोपवतस्त्वयि ।
आशु दीपयिताल्पोऽपि साग्नीनेधानिवानिलः ॥६६॥

उपेति ॥ तेन चैद्येन कृतोऽल्पोऽप्युपजापो भेदः 'भेदोपजापौ' इत्यमरः । त्वय्याकोपवतस्तान्बाणादीन् अनिलः साग्नीनेधानिन्धनानीव । 'काष्ठं दार्विन्धनं त्वेध इध्ममेधः समित्स्त्रियाम्' इत्यमरः । आशु दीपयिता सद्यः प्रज्वलयिष्यति । दीपेर्ण्यन्ताल्लुट् । अन्तर्वैराः संहिताः, आपदि सति रन्ध्रे सद्यो विश्लिष्यन्तीति भावः ॥

ततः किमत आह—

बृहत्सहायः कार्यान्तं क्षोदीयानपि गच्छति ।
संभूयाम्भोधिमभ्येति महानद्या नगापगा ॥६७॥

बृहदिति ॥ बृहत्सहायो महासहायवान्क्षोदीयान्क्षुद्रतरोऽपि । 'स्थूलदूर—'इत्यादिना यणादिपरलोपः पूर्वगुणश्च । कार्यस्यान्तं पारं गच्छति । तथाहि—अपां समूह आपम् । 'तस्य समूहः' इत्यण् । तेन गच्छतीत्यापगा नगापगा गिरिनदी महानद्या गङ्गादिकया संभूय मिलित्वाम्भोधिमभ्येति । क्षुद्रोऽप्येवं तादृक् । महावीरश्चैद्यस्तु किमु वक्तव्य इत्यपि शब्दार्थः ।

विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥

किंच न केवलं शत्रोरसाध्यत्वं मित्रविरोधश्चाधिकोऽनर्थकर इत्याह—

तस्य मित्राण्यमित्रास्ते ये च ये चोभये नृपाः ।
अभियुक्तं त्वयैनं ते गन्तारस्त्वामतः परे ॥ ९८ ॥

तस्येत्यादि द्वयेन ॥ ये च तस्य चैद्यस्य मित्राणि, ये चोभये नृपाः, ये च ते तवामित्रा नृपास्त उभये त्वयाभियुक्तमभियातमेनं चैद्यं गन्तारो गमिष्यन्ति । गमेः कर्तरि लुट् । अतः परे उक्तोभयव्यतिरिक्ताः तव मित्राणि तस्यामित्राश्चेत्यर्थः । त्वां गन्तारः ॥

ततः किमत आह—

मखविघ्नाय सकलमित्थमुत्थाप्य राजकम् ।
हन्त जातमजातारेः प्रथमेन त्वयारिणा ॥ ९९ ॥

मखेति ॥ इत्थमनेन प्रकारेण । 'इदमस्थमुः' इति थमुप्रत्ययः । मखविघ्नाय मखविघाताय सकलं राजकं राजसमूहम् । 'गोत्रोक्ष–' इत्यादिना वुञ् । उत्थाप्य क्षोभयित्वा । हन्त इति खेदे । अजातारेरजातशत्रोर्युधिष्ठिरस्य त्वया प्रथमेनारिणा जातमजनि । नपुंसके भावे क्तः ॥

अस्तु सोऽपि शत्रुः को दोषस्तत्राह—

संभाव्य त्वामतिभरक्षमस्कन्धं स बान्धवः ।
सहायमध्वरधुरां धर्मराजो विवक्षते ॥ १०० ॥

संभाव्येति ॥ बन्धुरेव बान्धवः स धर्मराजः अतिभरस्य क्षमः स्कन्धो यस्य स तम् । समानस्कन्ध-

मित्यर्थः । त्वां सहायं संभाव्याभिसंधाय । अध्वरस्य धुरमध्वरधुराम् । 'ऋक्पूर्–' इत्यादिना समासान्तोऽच्प्रत्ययः । समासान्तानां प्रकृतिलिङ्गत्वात्तत्पुरुषे परवल्लिङ्गत्वे टाप् । विवक्षते वोढुमिच्छति । वहतेः स्वरितेतः सन्नन्ताल्लट् । तथाहि–विरोधे विश्वासघातो, बन्धुद्रोहश्च (तौ) स्यातामिति भावः । विशेषणसाम्यात्प्रस्तुतयागधर्मप्रतीतेः समासोक्तिः ॥

ननु प्रतिश्रुत्याकरणे दोषः प्रागेव परिहारे तु को दोष इत्यत आह—

महात्मानोऽनुगृह्णन्ति भजमानान्रिपूनपि ।
सपत्नीः प्रापयन्त्यब्धिं सिन्धवो नगनिम्नगाः॥१०१॥

महात्मान इति ॥ महात्मानो निग्रहानुग्रहसमर्था भजमानाञ्शरणागतान्रिपूनप्यनुगृह्णन्ति । किमुत बन्धूनिति भावः । अर्थान्तरं न्यस्यति–सिन्धवो महानद्यः समान एकः पतिर्यासां ताः सपत्नीः । 'नित्यं सपत्न्यादिषु' इति ङीप् नकारश्च । नगनिम्नगा गिरिनिर्झरिणीरब्धिं प्रापयन्ति । स्वसौभाग्यं ताभ्यः प्रयच्छन्तीति भावः । अतः परिहारोऽप्यनर्थ इति भावः ॥

तर्हि संप्रत्युपेक्षायामपि पश्चात्प्रार्थनया पार्थमावर्जयेयमित्यत आह—

चिरादपि बलात्कारो बलिनः सिद्धयेऽरिषु ।
छन्दानुवृत्तिदुःसाध्याः सुहृदो विमनीकृताः॥१०२॥

चिरादिति ॥ बलिनः स्वयं बलवतोऽप्यरिषु वि-

षये बलात्कारो दण्डश्चिराच्चिरकालेनापि । सद्यो मा भूदिति भावः । सिद्धये । वशंवदत्वसिद्धये भवतीति शेषः । अविमनसो विमनसः संपद्यमानाः कृता विमनीकृताः । वैमनस्यं प्रापिता इत्यर्थः । 'अरुर्मनश्चक्षुश्चेतोरहोरजसां लोपश्च' इति च्विप्रत्ययसलोपौ । 'अस्य च्वौ' इतीकारः । शोभनं हृदयं येषां ते सुहृदो मित्राणि तु । 'सुहृद्दुर्हृदौ मित्रामित्रयोः' इति निपातः । छन्दस्याभिप्रायस्यानुवृत्त्या चित्तानुरोधेनापि दुःसाध्याः । आर्जवयितुमशक्या इत्यर्थः । 'अभिप्रायश्छन्द आशयः' इत्यमरः । शनैः शत्रुर्दण्डेनापि वशो भवति, मित्रं वैमनस्ये न साम्नापीति भावः ॥

ननु सुहृत्कार्यात्सुरकार्यं बलीय इत्यत्राह—

मन्यसेऽरिवधः श्रेयान्प्रीतये नाकिनामिति ।
पुरोडाशभुजामिष्टमिष्टं कर्तुमलंतराम् ॥ १०३ ॥

मन्यस इति ॥ नाकिनां देवानां प्रीतयेऽरिवधः श्रेयान्प्रशस्ततरः । 'प्रशस्यस्य श्रः' इति आदेशः । इति मन्यसे चेत्तर्हि पुरोडाशभुजां हविर्भोजिनाम् । अतएव नाकिनामिष्टमभीप्सितं कर्त्तुम् । इषेः कर्मणि क्तः । इष्टं इष्टिः । याग इति यावत् । यजेर्भावे क्तः । 'वचिस्वपि–' इत्यादिना संप्रसारणम् । अलंतरामतिपर्याप्तम् । अव्ययादामुप्रत्ययः । शत्रुवधादतिप्रियकरो याग एव । नाकिनां भुक्त्वापि शत्रुवधस्य सुकरत्वादिति भावः ।

तथाप्यमृताशिनां तेषां देवानां किमेभिः पिष्टभक्षणप्रलोभनैरत आह—

अमृतं नाम यत्सन्तो मन्त्रजिह्वेषु जुह्वति ।
शोभैव मन्दरक्षुब्धक्षुभिताम्भोधिवर्णना ॥१०४॥

अमृतमिति ॥ अमृतं नाम सन्तो विद्वांसः मन्त्रा एव जिह्वा येषां तेषु मन्त्रजिह्वेष्वग्निषु । 'मन्त्रजिह्वः सप्तजिह्वः सुजिह्वो हव्यवाहनः' इति वैजयन्ती । यत्पुरोडाशादिकं जुह्वति । तदेवेति शेषः । यत्तदोर्नित्यसंबन्धात् । मन्दर एव क्षुब्धो मन्थनदण्डः । 'क्षुब्धध्वान्त–' इत्यादिनास्मिन्नर्थे निपातनात्सिद्धम् । तेन क्षुभितस्य मथितस्याम्भोधेर्वर्णना शोभैवालंकार एव । अब्धिमन्थनेनामृतमुत्पादितमिति यतः कीर्तिमात्रम् । अतो हुतमेवामृतमिति भावः । वाक्यार्थयोर्हेतुमद्भावाद्वाक्यार्थहेतुकं काव्यलिङ्गमलंकारः ॥

यात्रायाः प्रतिबन्धः कश्चिद्दुस्तरस्तवास्तीत्याह—

सहिष्ये शतमागांसि सूनोस्त इति यत्त्वया ।
प्रतीक्ष्यं तत्प्रतीक्ष्यायै पितृष्वस्रे प्रतिश्रुतम् ॥१०५॥

सहिष्य इति ॥ प्रतीक्ष्यायै पूज्यायै । 'पूज्यः प्रतीक्ष्यः' इत्यमरः । पितृष्वस्रे पितृभगिन्यै । 'विभाषा स्वसृपत्योः' इति विकल्पादलुगभावः । 'मातृपितृभ्यां स्वसा' इति षत्वम् । ते तव सूनोः शतमागांस्यपराधान् । 'आगोऽपराधो मन्तुश्च' इत्यमरः । सहिष्ये सोढाहे इति यत्त्वया प्रतिश्रुतं प्रतिज्ञातं तत्प्रतीक्ष्यं प्रतिपालनीयम् । अन्यथा महादोषस्मरणादिति भावः ॥

सत्यमस्ति प्रतिश्रुतं, किंत्वस्योन्मत्तत्वादौद्धत्यादपि जिहासितमत आह--

तीक्ष्णा नारुंतुदा बुद्धिः कर्म शान्तं प्रतापवत् ।
नोपतापि मनः सोष्म वागेका वाग्मिनः सतः॥१०६॥

तीक्ष्णेति ॥ सतः सत्पुरुषस्य बुद्धिस्तीक्ष्णा निशिता स्यादिति विधीत्यध्याहारः । एवमुत्तरत्रापि । तथाप्यरुस्तुदतीत्यरुंतुदा शस्त्रवन्मर्मच्छेदिनी न भवेत् । अहिंसयैव परं पीडयेदित्यर्थः । कर्म व्यापारः प्रतापवत्तेजस्वि भयदं स्यात्, तथापि शान्तं स्यात् । न तु सिंहादिवद्धिंस्रं भवेदित्यर्थः । मनश्चित्तं सोष्म अभिमानोष्णं स्यात्तथापि उपतापयतीत्युपतापि । अग्न्यादिवत्परसन्तापि न स्यात् । वाग्मिनो वक्तुर्वागेका एकरूपा स्यात् । वाग्मी सत्यमेव वदेदित्यर्थः । अतः सत्यसंधस्य प्रतिश्रुतार्थहानिरनर्हेति भावः । अत्र प्रकृताया वाचोऽप्रकृतानां बुद्धिकर्ममनसां च तुल्यधर्मादौपम्यावगमाद्दीपकालंकारः । 'प्रकृताप्रकृतानां च साम्ये तु तुल्यधर्मतः । औपम्यं गम्यते यत्र दीपकं तन्निगद्यते ॥' इति लक्षणात् । बुद्ध्यादीनां शस्त्रादिव्यतिरेको व्यज्यते ॥

अशक्यश्चाकाले चैद्यवध इत्याह—

स्वयं कृतप्रसादस्य तस्याह्नो भानुमानिव ।
समयावधिमप्राप्य नान्तायालं भवानपि ॥१०७॥

स्वयमिति ॥ किंच अह्नो भानुमानिव स्वयं कृतः प्रसादोऽनुग्रहः, प्रकाशश्च यस्य तस्य चैद्यस्यान्ताय

समयावधि नियतकालावसानमप्राप्य भवानपि नालं शक्तो न। तथा च वृथापकीर्तिरेव। अन्यत्र किंचित्फलं स्यादिति भावः॥

तर्हि किमयमुपेक्ष्य एव नेत्याह—

कृत्वा कृत्यविदस्तीर्थेष्वन्तः प्रणिधयः पदम्।
विदांकुर्वन्तु महतस्तलं विद्विषदम्भसः॥ १०८॥

कृत्वेति॥ किंतु कृत्यविदः कार्यज्ञाः, विधिज्ञाश्च प्रणिधीयन्त इति प्रणिधयो गूढचारिणः। 'प्रणिधिर्गूढपुरुषः' इति हलायुधः। तरन्त्येभिरिति तीर्थानि मन्त्राद्यष्टादश स्थानानि, जलावताराश्च। 'योनौ जलावतारे च मन्त्राद्यष्टादशस्वपि। पुण्यक्षेत्रे तथा पात्रे तीर्थं स्यात्' इति हलायुधः। तेष्वन्तः पदं स्थानं, पादप्रक्षेपं च कृत्वा महतो दुरवगाहस्य, पूज्यस्य च विद्विषन् शत्रुरेवाम्भस्तस्य तलं स्वरूपम्। प्रमाणमिति यावत्। 'अधःस्वरूपयोरस्त्री तलम्' इत्यमरः। विदांकुर्वन्तु विदन्तु। 'विद ज्ञाने' लोट्। 'विदांकुर्वन्त्वित्यन्यतरस्याम्' इति विकल्पादाम्प्रत्ययनिपातः। अम्भस इव शत्रोः कृततीर्थस्य सुप्रवेशत्वात्प्रागन्तः प्रविश्य परीक्ष्येत्यर्थः। श्लिष्टपरम्परितरूपकम्॥

आवश्यकं चैतदित्याह—

अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निबन्धना।
शब्दविद्येव नो भाति राजनीतिरपस्पशा॥ १०९॥

अनुदिति॥ उत्सूत्र उच्छास्त्रो नीतिशास्त्रविरुद्धः प-

दन्यासः एकपदप्रक्षेपोऽपिस्वल्पव्यवहारादौपीति या-वत्। स नास्ति यस्यां सानुत्सूत्रपदन्यासा। नीतिपूर्व-कसर्वव्यवहारेत्यर्थः। अन्यत्रानुत्सूत्रपदन्यासा अनु-त्सृष्टसूत्राक्षरः, इष्ट्युपसंख्याननैरपेक्ष्येण सूत्राक्षरैरेव सर्वार्थप्रतिपादको न्यासो वृत्तिव्याख्यानग्रन्थविशेषो यस्यां सा तथोक्ता। तथा सती यथार्थ कल्पनया शोभ-ना वृत्तिर्भृत्यामात्यादीनामाजीविका यस्यां सा सद्वृ त्तिः, अन्यत्र सती वृत्तिः काशिकाख्यसूत्रव्याख्यानग्र-न्थविशेषो यस्यां सा। 'वृत्तिर्ग्रन्थजीवनयोः' इति वै-जयन्ती। सन्ति निबन्धनान्यनुजीव्यादीनां क्रियाव-सानेषु दत्तानि गोहिरण्यादिशाश्वतपारितोषिकदा-नानि यस्यां सा। एतच्च 'दत्वा भूमिनिबन्धनं' चेत्ये-तद्वचनव्याख्याने मिताक्षरायां द्रष्टव्यम्। अन्यत्र सन्निबन्धनं भाष्यग्रन्थो यस्यां सा। एवंभूतापि राज-नीती राजवृत्तिः। अपगतः स्पशः चारो यस्याः सा-पस्पशा चेत्। 'यथार्थवर्णो मन्त्रज्ञः स्पशो हरक उ-च्यते' इति हलायुधः। अन्यत्र अविद्यमानः पस्पशः शास्त्रारम्भसमर्थक उपोद्घातसंदर्भग्रन्थो यस्याः सा। अपस्पशा शब्दविद्या व्याकरणविद्येव नो भाति न शोभते। तस्माच्चरप्रेषणमावश्यकम्, तद्रहितस्य रा-ज्ञोऽन्धप्रायत्वादिति भावः। अत्रापस्पशेत्यत्र जतु-काष्ठवच्छब्दयोरेव श्लिष्टत्वाच्छब्दश्लेषः। सद्वृत्तिः सन्निबन्धनेत्यत्रैकवृन्तावलम्बिफलद्वयवदर्थश्लेषः। अ-नुत्सूत्रपदन्यासेत्यत्र तूभयसंभवादुभयश्लेषः। शब्द-

विधेयेति पूर्णोपमा व्यक्तैव । तयोः सापेक्षत्वात्संकरः ॥

न केवलं चारमुखेन वृत्तान्तज्ञानम्, अपि तूपजापश्च कर्तव्य इत्याह—

अज्ञातदोषैर्दोषज्ञैरुद्दूष्योभयवेतनैः ।
भेद्याः शत्रोरभिव्यक्तशासनैः सामवायिकाः ॥ ११० ॥

अज्ञातेति ॥ किंचाज्ञातदोषैः परैरज्ञातस्वकर्मभिर्दोषज्ञैः स्वयं परमर्मज्ञैरभिव्यक्तानि भेद्यस्याग्रे प्रकटितानि शासनानि तदमात्याद्यविश्वासकराणि कूटलिखितानि येषां तैः । उभयवेतनैरुभयत्र भेद्ये स्वामिनि च वेतनं भृतिर्येषां तैरुभयजीविकाग्राहिभिः । भेद्यनगरवास्तव्यैश्चरैरित्यर्थः । 'भृतयो भर्मवेतनम्' इत्यमरः । शत्रोः संबन्धिनः समवायं समवयन्तीति सामवायिकाः सङ्घमुख्याः सचिवादयः । 'समवायान्समवैति' इति ठक् । उद्दूष्य छिषामेते दत्तहस्ता अस्माभिरेषां लिखितान्येव गृहीतानीत्युच्चैर्दूषयित्वा भेद्याः विघट्टनीयाः ॥

उपेयिवांसि कर्तारः पुरीमाजातशात्रवीम् ।
राजन्यकान्युपायज्ञैरेकार्थानि चरैस्तव ॥ १११ ॥

उपेयिवांसीति ॥ किंच उपायज्ञैः कार्यसाधनकुशलैस्तव चरन्तीति चरैर्गूढचारिभिः । पचाद्यच् । एकार्थानि त्वया सहैकप्रयोजनानि राजन्यानां समूहा राजन्यकानि । 'गोत्रोक्ष—' इत्यादिना वुञ् । अजातशत्रोरिमामाजातशात्रवीं पुरीमिन्द्रप्रस्थमुपेयिवांसि

प्राभुवन्ति । 'उपेयिवान्–' इत्यादिना क्वसुप्रत्ययान्तो निपातः । कर्तारः करिष्यन्ते । कृञः कर्मणि लुट् । इन्द्रप्रस्थेऽस्माकं महत्कार्यं भविष्यति तदध्वरयात्राव्याजेन संनद्धैरागन्तव्यमिति गूढं संदिश्य तत्र सर्वे मेलयितव्या इत्यर्थः ॥

ननु तत्राध्वरकर्मणि को युद्धावकाश इत्याशङ्क्य तत्रैव महत्कलहबीजं संपादयति–

सविशेषं सुते पाण्डोर्भक्तिं भवति तन्वति ।
वैरायितारस्तरलाः स्वयं मत्सरिणः परे ॥ ११२ ॥

सविशेषमिति ॥ पाण्डोः सुते युधिष्ठिरे भवति पूज्ये त्वयि सविशेषं यथा तथा भक्तिं तन्वति सति तरलाश्चपला मत्सरिणो द्वेषवन्तः परे शत्रवः स्वयमेव वैरायितारो वैरं कर्तारः । 'शब्दवैरकलह–'इत्यादिना क्यङ् । ततः कर्तरि लुट् ॥

किं तेऽपि सर्वे वैरायिष्यन्ते नेत्याह—

य इहात्मविदो विपक्षमध्ये
सह संवृद्धियुजोऽपि भूभुजः स्युः ।
बलिपुष्टकुलादिवान्यपुष्टैः
पृथगस्मादचिरेण भाविता तैः ॥ ११३ ॥

य इति ॥ ये इह विपक्षमध्ये शत्रुमध्ये सह संवृद्धियुजोऽपि चैद्येन सहैश्वर्यं गता अपि । 'सत्सूद्विष–' इत्यादिना क्विप् । ये भूभुजो राजान आत्मविदः स्वाभिजनवेदिनः स्युः, यद्वा स्वात्मस्वरूपवेदिनः स्युस्तैर्भूभुग्भिः बलिपुष्टकुलात्काककुलात् ।

'काके तु करटारिष्टबलिपुष्टसकृत्प्रजाः' इत्यमरः । अन्यपुष्टैः परभृतैरिवाचिरेण सद्योऽस्माद्विपत्तमध्यात् । 'अन्यारात्–' इत्यत्रान्यशब्दस्यार्थपरत्वात्पृथगादिप्रयोगेऽपि पञ्चमी । पृथग्भाविता पृथग्भविष्यते । भावे लुट् । चिरवदिटि वृद्धिः । तेष्वपि केचिदस्माभिः संगच्छन्त इत्यर्थः । औपच्छन्दसिकं वृत्तम् ॥

अथ फलितं निगमयन्नाशिषं प्रयुंक्ते—

सहजचापलदोषसमुद्धत-
श्चलितदुर्बलपक्षपरिग्रहः ।
तव दुरासदवीर्यविभावसौ
शलभतां लभतामसुहृद्गणः ॥ ११४ ॥

सहजेति ॥ सहजं स्वाभाविकं चापलं दुर्विनीतत्वम्, अनवस्थितत्वं च । 'चपलः पारदे शीघ्रे दुर्विनीतेऽनवस्थिते' इति वैजयन्ती । तेनैव दोषेण समुद्धतो दृप्तः पक्षः सहायो गरुच्च । 'पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिषु' इति वैजयन्ती । चलितोऽस्थिरो दुर्बलपक्षपरिग्रहो यस्य सः, असुहृद्गणः शत्रुवर्गस्तव दुरासदवीर्यविभावसौ दुःसहतेजोवह्नौ । 'वीर्यं शुक्रे प्रभावे च तेजःसामर्थ्ययोरपि', 'सूर्यवह्नी विभावसू' इति विश्वामरौ । शलभतां पतङ्गत्वम् । 'समौ पतङ्गशलभौ' इत्यमरः । भावे तल् । लभतां गच्छतु । रूपकालंकारः । द्रुतविलम्बितं वृत्तम् ॥

इति विशकलितार्थामौद्धवीं वाचमेना-
मनुगतनयमार्गामर्गलां दुर्नयस्य ।

जनितमुदमुदस्थादुच्चकैरुच्छ्रितोरः-
स्थलनियतनिषण्णश्रीश्रुतां शुश्रुवान्सः ॥११५॥

इति श्रीमाघकृतौ शिशुपालवधे महाकाव्ये श्र्यङ्के
मन्त्रवर्णनं नाम द्वितीयः सर्गः ॥ २ ॥

इतीति ॥ स हरिरित्थं विशकलितार्थां विवेचितार्थामनुगतनयमार्गां नीतिमार्गानुसारिणीं, दुर्नयस्य । बलभद्राद्युक्तस्येत्यर्थः । अर्गलां निवारयित्रीमिति वैधर्म्येण रूपकालंकारः । 'तद्विष्कम्भोऽर्गलं न ना' इत्यमरः । अत एव जनितमुदं हरेः कृतानन्दाम् । उच्छ्रित उन्नते उरःस्थले नियतं निषण्णया अविश्रान्तमाश्रितया श्रिया श्रुतां नान्यथेति मन्त्रशुद्धिः । उद्धवस्येमामौद्धवीमेनां पूर्वोक्तां वाचं शुश्रुवाञ्श्रुतवान् । 'भाषायां सदवसश्रुवः' इति क्वसुः । उच्चैरेवोच्चकैरुन्नतः सन् । 'अव्ययसर्वनाम्नामकच्प्राक्टेः' इत्यकच्प्रत्ययः । उदस्थादासनादुत्थितवान् । 'उदोऽनूर्ध्वकर्मणि' इत्यस्य प्रत्युदाहरणमेतत् । रूपकानुप्रासालंकारौ । मालिनी वृत्तम् ॥

इतिश्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते
शिशुपालवधकाव्यव्याख्याने सर्वंकषाख्ये
द्वितीयः सर्गः ॥ २ ॥

॥ अथ ॥

भट्टि-काव्यस्य

आदिमं सर्गत्रयम्।

जयमङ्गलया समेतम्--

प्रथमः सर्गः—

प्रणिपत्य सकलवेदिनमतिदुस्तरभट्टिकाव्यसलिलनिधेः ॥
जयमङ्गलेति नाम्ना नौकेव विरच्यते टीका ॥ १ ॥

लक्ष्यं लक्षणं चोभयमेकत्र विदुषः प्रदर्शयितुं श्रीस्वामिसूनुः कविर्भट्टिनामा रामकथाश्रयमहाकाव्यं चकार। तथाह्यस्योपनिबन्धनं कविना द्विधा कृतम्। एकं लक्षणसूचकैः प्रकीर्णाधिकारप्रसन्नतिङन्तकाण्डैश्चतुर्भिः। द्वितीयं लक्ष्यसूचकं रामसंभवादिभिर्द्वाविंशत्या सर्गैः। तत्र लक्षणं द्विविधम्। शब्दलक्षणं, काव्यलक्षणं च। तत्र प्रथमस्य प्रकीर्णाधिकारतिङन्तकाण्डानि। द्वितीयस्य प्रसन्नकाण्डम्। यत्रोद्यावचेन बहूनां लक्षणानां प्रकरणं तत्प्रकीर्णकाण्डम्। तदेवात्र प्रथममुक्तं तस्य व्यापित्वात्। 'उत्तरत्रापि द्रष्टव्यम्' इति प्रदर्शनार्थम्। अत्र यद्यप्यादौ कविना देवतानमस्कारो न कृतस्तथापीष्टदेवतासंकीर्तनमपि विघ्नोपशमनहेतुर्भवतीति मन्यमान आह--

१-अभून्नृपो विबुध-सखः परं-तपः
श्रुताऽन्वितो दश-रथ इत्युदाहृतः, ॥
गुणैर् वरं भुवन-हितच्छलेन यं
सना-तनः पितरमुपागमत् स्वयम् ॥५

अभूदित्यादि॥ तस्य हीष्टदेवता सनातनो विष्णुः। स चादौ कीर्तितः। तत्प्रतिबन्धना चेयं कथेति प्रबन्धेनैवात्र संकीर्तनं रामायणवत्। तत्र विष्णोर्यस्मिन्काले जगत्कार्यवशादवतारः कृतस्तदेव प्रथमं दर्शयति। अभूदिति भूतसामान्ये लुङ्। भूत इत्यर्थः। अन्यथा राज्ञश्चिरातीतत्वात्कवेः परोक्षत्वाच्च लिट् स्यात्। '२२२३। गाति--स्था- ।२।४।७७।' इति सिचो लुक्। '२२२४। भू-सुवोस्तिङि।७।३।८८।' इति गुणप्रतिषेधः॥ 'नयतेर्डिच्च' इति नयतेरौणादिक ऋन्। नरो मनुष्यास्तान्नृन्पातीति। '२९१५। आतोऽनुपसर्गे कः।३।२।३।'। '२३७२। आतो लो-

---

१—अभून्नृपो दशरथ इत्युदाहृतः श्रुतान्वितो विबुधसखः परन्तपः॥ इति पाठव्यत्यासोऽपि क्वचित्। २—'७७७। अथ मित्रं सखा सुहृत्।' इति नामलिङ्गानुशासनेऽमरसिंहः। ३—दशसु दिक्षु रथो रथगतिर्यस्येति यथार्थनामेति भावः।

४—'१५६। छे च।६।१।७३। ह्रस्वस्य छे परे तुगागमः स्यात्संहितायाम्। यथा—सदाशिव+छात्रः=सदाशिवच्छात्रः।' इति सिद्धान्तकौमुद्यां भट्टदीक्षितः। ५—पद्येऽस्मिन्वृत्तं रुचिरा। तल्लक्षणम्—चतुर् (४)-ग्रहै (९) रिह रुचिरा ज-भ-स्-ज-गाः।' इति वृत्तरत्नाकरे भट्टकेदारः।

पः-।६।४।६४।' नृपो राजा। अत्यन्तधर्मविजयित्वाद्देवराजस्य मित्रमासीदित्याह-विबुधसख इति। विबुध्यन्त इति विबुधा देवास्तेषामपि प्रधानत्वात्। तत्रेगुपधलक्षणः कः। सामान्यशब्दोऽपि देवेषु र्तमानोऽप्यर्थवशाच्छक्रे प्रयुक्तस्तस्य सखेति। ७८८। राजाऽहः सखिभ्यष्टच्।५।४।९१।' विबुधसखः। अनेन धर्मविजयित्वं दर्शयति विबुधसखत्वस्य धर्मकार्यत्वात्। सुरलोकविजयिनश्च ये राजानस्तेषां धर्मविजयो प्रधानम्। परे शत्रवस्त्रिविधाः-उच्छेदनीयोपपीडनीयकर्षणीयाः। तत्र ये उपपीडनीयकर्षणीयास्तान्परांस्तापयतीति परंतपः।'१९५४। द्विषत्परयोस्तापेः।३।२।३९।' इति खच्।'२९५५। खचि ह्रस्वः।६।४।९४।'।'२९४२। अरुर्द्विषदजन्तस्य-।६।३।६७।' इति मुम्। नृप इत्यनेन स्वमण्डले शास्तिराख्याता। परंतप इति परमण्डले। शृण्वन्त इति श्रुतानि वेदादीनि तैरन्वितः संबद्धः। ग्रन्थतोऽर्थतश्च गृहीतत्वात्। दशरथ इत्यनेन नाम्नोदाहृतो लोके गीतः॥ गुण्यन्तेऽभ्यस्यन्त इति गुणाः। '२०४०। गुण आमन्त्रणे।' इति चौरादिकोऽदन्तः। तस्मात् '३१८८। अकर्तरि च-।३।३।१९।' इत्यादिना घञ्। येषाम् 'एरजण्यन्तानाम्' इति दर्शनम्। येषां तन्नास्ति तेषामेरच्। स्वरं प्रति विवादो न रूपं प्रति। गुणैरभिरामत्वादिभिर्वरं श्रेष्ठं यं नृपं पितरमुपागमदिति संबन्धः। व्रियत इति वरः।

·३२३४। ग्रह- वृ-दृ–। ३। ३। ५८।' इत्यादिना क-र्मण्यप्। केन हेतुनोपगतवांस्तं पितरं सनातन इत्य-त आह–भुवनहितच्छलेनेति। भवन्त्युत्पद्यन्त इति भुवनानि। भूर्भुवःस्वरिति त्रयो लोकाः। 'रजःक्यु-न्' इत्यनुवर्तमाने 'भू-सू-धू-सर्जिभ्यश्छन्दसि' इत्यौ-णादिकः क्युन्बहुलवचनाद्भाषायामपि भवति। तेभ्यो हिता भुवनहिता विष्णोर्दशावतारा:। इह तु रामो द्रष्टव्यः। तच्छलेन व्याजेन भुवनहितच्छलेन। इदा-नीं रावणादिकण्टकोद्धरणात्। तथा चोक्तम्–'प-रित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसं-स्थापनार्थाय संभवामि युगे युगे॥' इति। सनेत्य-व्ययं सदार्थे वर्तते। सना भवतीति। '१३६१। सा-यं-चिरम्–। ४। ३। २३। इति ट्युट्युलौ तुट् च। स-नातनो विष्णुरूपागमदुपजगाम। लृदित्त्वादङ्। स-त्स्वन्येषु राजसु गुणैर्वरत्वाद्यं पितरं जनकमङ्गीकृत-वान्सोऽभूदिति योज्यम्। स्वयमित्यात्मना न कर्म-णान्येन वा प्रेरित इत्यर्थः॥

२–सोऽध्यैष्ट वेदांस्, त्रि–दशानयष्ट,[1][2]

१–'७। अमरा निर्जरा देवास् त्रि-दशा विबुधाः सुराः॥' इति ना० अ० 'तृतीया यौवनाख्या दशा सदा येषां ते त्रि-दशाः। त्रिशब्दस्य तृतीयार्थता त्रिभागवत्'। इति व्याख्यासुधायां (रामा-श्रम्यां) भानुदीक्षितः॥ २–'२९४। व्रश्च-भ्रस्ज-सृज-मृज-यज-राज-भ्राज-छ-शां षः। ८। २। ३६। व्रश्चादीनां सप्तानां छशान्तयोश्च षकारोऽन्तादेशःस्याज्झलि पदान्ते च।' इति वै० भ०॥

पितॄनपारीत्, समसंस्त बन्धून्, ॥
व्यजेष्ट षड्-वर्गमरंस्त नीतौ,
समूलघातं न्यवधीदरींश्च. ॥[२]

सोऽध्यैष्टेत्यादि-क्षत्रियस्य धर्मोऽध्ययनं यजनं दानम् । शस्त्राजीवो भूतरक्षणं चेत्युभयं नृप इत्यनेनोक्तम् । भूतरक्षणे शस्त्रमङ्गम् । स नृपो वेदानध्यैष्टाधीतवानिति स्वाध्याय उक्तः । वेदयन्ति ज्ञापयन्ति धर्माधर्माविति वेदाः सामादयः । '२८९६ । नन्दि-ग्रहि-पचादि-।३।१।१३४।' इत्यच् । इङोऽधिपूर्वस्य, २४६० । विभाषा लुङ्-लृङोः-।२।४।५०।' इति गाङ् । विभाषयेति गाङभावपक्षे रूपम् । अजादित्वादाट् । '२६९ । आटश्च ।६।१।९०।' इति वृद्धिः । ङित्त्वादात्मनेपदम् । '२१२ । आदेश-प्रत्यययोः-।८।३।५९।' इति षत्वं ष्टुत्वं च ॥ त्रिदशान्देवानयष्टाग्निष्टोमादिभिः पूजितवान् । यजनमुक्तम् । यजेः '२१५८ । स्वरित ञितः-।१।३।७२।' इति तङ् । अनिक्समीपत्वाद्धलः '२३०० । लिङ्सि-

---

१—कामक्रोधलोभमोहमदमत्सरेत्यन्तररीणां षड्वर्गमित्यनित्यसमासः । यथा—'४३ । तनुमुद्धूलयन् मर्त्यः शिवभागवतो यदि, । अरिषड्वर्गतस् तस्य भयं नाऽस्ति कदाचन॥' इति समासकुसुमाऽऽवल्यामनन्तशिष्यः ॥ २—पद्येऽस्मिन्वृत्तमुपजातिरापञ्चविंशति पद्येभ्यः । तल्लक्षणम्—'स्यादिन्द्रवज्रा यदि तौ जगौ ग, उपेन्द्रवज्रा जतजास्ततो गौ, । अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः (१४)॥' इति वृत्त० भट्ट० । उपजातयश्चतुर्दशविधाः सन्ति ।

चौ-१।२।११।' इति कित्त्वं न भवति । '२२४। व्रश्चभ्र-स्ज-।८।२।३६।' इत्यादिना षत्वम् । '२२८१। झलो झलि ।८।२।२६।' इति सिचो लोपः ॥ पितॄनपारीदा-प्यायितवान् । पितरमुद्दिश्य यजनम् '११६०। पॄ पा-लनपूरणयोः ।' इत्यस्मात्पूरणार्थाल्लुङि रूपम् । '२२-६७। सिचि वृद्धिः-।७।२।१।'।'२२६६। इट ईटि ।८।२।२-८।' इति सिचो लोपः । अथवा 'पितॄनतार्प्सीत्' इति पाठः । '१२७१। तृप प्रीणने ।' इत्यस्माल्लुङि 'स्पृशमृशकृषतृपदृपां च्लेः सिज्वक्तव्यः' इति च्लेः सिचि '२४०२। अनुदात्तस्य च-।६।१।५६।' इत्यादिना अम-भावपक्षे रूपम् । पितॄंस्तर्पितवानित्यर्थः ॥ सममंस्त बन्धून्मातृपित्रादिज्ञातीन्संमतवान् । सदा दानमा-नादिभिः पूजितवानित्यर्थः । मन्यतेरनुदात्तत्वात्तङ् इट्प्रतिषेधश्च । येषां सिच इकार उच्चारणार्थस्तेषाम् '२६६७। हनः सिच् ।१।२।१४।' इति कित्करणज्ञापका-न्नलोपाभावः । येषां तु इकार इत्तेषामिदित्त्वान्नका-रलोपाभावः ॥ आभ्यन्तरं शत्रुमजित्वा कथं परंतप इत्याह— व्यजेष्ट षड्वर्गमिति । कामक्रोधलोभमोह-मदमात्सर्याणां षण्णां वर्गः षड्वर्गः । तमभिभूत-वान् । विपूर्वस्य जयतेः '२६८५। विपराभ्यां जेः ।१।३। १९।' इति तङ् ॥ अरंस्त नीतौ सामादिषु संध्यादिषु च रतः । नीतिमानित्यर्थः ॥ समूलघातं न्यवधीत्स-मूलान्निःशेषानरीञ्शत्रून्निहतवान् । उच्छेदनीया ये शत्रवस्तेष्विदं विधानम् । समूलोपपदाद्धन्तेः '३३५७।

समूलाकृत-।३।४।३६।' इत्यादिना णमुल् । '३५८। हो हन्तेः-।७।३।५४।' इति घत्वम् । वृद्धिः । '२५७४। हनस्तः-।७।३।३२।' इति तत्वम् । '३३६७ कषादिषु यथा-।३।४।४६।' इत्यादिना यथाविध्यनुप्रयोगः । अनुप्रयोगे '२४३४। लुङि च-।२।३।४३।' इति वधादेशः । तस्याकारान्तत्वादुपदेशेऽनेकाच्त्वादिणिनषेधो न भवति । अतो लोपे कृते तस्य स्थानिवद्भावात् '२२८४। अतो हलादेः-।७।२।७।' इति विभाषावृद्धिर्न भवति ॥

३-वसूनि[1] तोयं घनवद् व्यकारीत्,

सहाऽऽसनं गोत्रभिदा[2]ऽध्यवात्सीत् ॥

न त्र्यम्बका[4]दन्यमुपास्थिताऽसौ,

१—'९७६। द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु । हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि ॥' इति ना० अ० ॥ २—'१७७८। तेन तुल्यं क्रिया चेद् वतिः (वत्) । ५।१।११५। ब्राह्मणेन तुल्यं ब्राह्मणवदधीते । क्रिया चेदिति किम् । गुणतुल्ये मा भूत् । पुत्रेण तुल्यः स्थूलः ।' इति वै० भ०॥ ३—'४९। सुत्रामा गोत्रभिद् वज्री वासवो वृत्रहा वृषा । वास्तोष्पतिः सुरपतिर् बलारातिः शचीपतिः ॥' इति० ना० अ० । 'गां पृथ्वीं त्रायन्ते पालयन्ति ते गोत्राः पर्वतास्तान् भिनत्ति विदारयतीति गोत्रभिद् (त)॥' इति व्या० भा० । '१०३४। त्रैङ् पालने ।' '१५२३। भिदिर् विदारणे ।' इति धातुपाठे पाणिनिः ।

४—'३८। हरः स्मरहरो भर्गस् त्र्यम्बकस् त्रिपुरान्तकः । गङ्गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः ॥' इति ना० अ० ।

यशांसि सर्वेषुभृता निरास्थत् ॥

वसूनीत्यादि-वसूनि द्रव्याणि बन्धुव्यतिरेकेण बालादिभ्यो व्यकारीद्दत्तवान् । विक्षिप्तवानिति वा । किरतेर्लुङि रूपम् । कः किमिवेत्यपेक्षायामाह—तोयं घनवदिति । तोयमुदकम् । घनो मेघः फलनिरपेक्ष्ततया यथा विकिरति तद्वत् ॥ एवं सम्यक्पालनादिन्द्रेण तुल्यत्वमाह—सहासनं गोत्रभिदाऽध्यवात्सीदिति । गोत्रभिदेन्द्रेण सहासनमध्यवात्सीदध्युषितवान् । अनेनात्यन्तधर्मविजयित्वस्य फलं दर्शयति । '१०७४ । वस निवासे ।' इत्यस्य रूपम् । वसिः संप्रसारणी' इति वचनादिडभावः । '२२२५ । अस्तिसिचः-। ७ । ३ । ९६ ।' इतीट् । '२२६७ । वदव्रज-। ७ । २ । ३ ।' इत्यादिना वृद्धिः । '२३४२ । सः स्यार्धधातुके । ७ । ४ ४९ ।' इति तत्वम् । आसनमिति '५४४। उपान्वध्याङ्वसः । १ । ४ । ४८ ।' इत्यधिकरणस्य कर्मसंज्ञा ॥ त्रीण्यम्बकान्यक्षीणि यस्येति त्र्यम्बको महादेवस्तस्मादन्यं नोपास्थित । न पूजितवानित्यर्थः। उपपूर्वात्तिष्ठतेः 'देवपूजासंगतिकरणमित्रकरणपथिषु-।' इति देवपूजायां तङ् । '२३८९ । स्थाघ्वोरिच्च । १ । २ । १७ ।' इत्यादिनेत्त्वं कित्वं च । '२३६९ । ह्रस्वादङ्गात् । ८ । २ । २७ । इति सिचो लोपः ॥ इषून्बिभ्रतीति '२९८० । अन्येभ्योऽपि दृश्यन्ते । ३।२।७५।'

'दैव-दीपस् तु लोचनम् । अम्बकं च—'इति त्रिकाण्डशेषे पुरुषोत्तमः ॥

इति क्विप् । इषुभृतो धनुर्धराः सर्वेषां तेषां यशांसि निरास्थत् । निरस्तवानित्यर्थः । एतेनास्यासाधारणीकृतास्त्रत्वं दर्शितम् । 'उपसर्गादस्यत्यूह्योर्वा वचनम्' इति वचनाद्यदा तङ् नास्ति तदा तिप् । '२४३८ । अस्यति-। ३ । १ । ५२ ।' इत्यादिना च्लेरङ् । '२५२० । अस्यतेस्थुक् । ७ । ४ । १७ ॥'

४-पुण्यो महाब्रह्मसमूहजुष्टः
संतर्पणो नाकसदां वरेण्यः ॥
जज्वाल लोकस्थितये स राजा
यथाऽध्वरे वह्निरभिप्रणीतः ॥

पुण्य इत्यादि-पुनातीति पुण्यः । 'पूञो यत् णुक् ह्रस्वश्च' इत्यौणादिको यत् । णुगागमश्च ह्रस्वश्च । अत्यन्तपुण्यकरणाद्राजापि पुण्य इत्युच्यते । तन्म-

---

१—'१३२२ । वेदस् तत्त्वं तपो ब्रह्म, ब्रह्मा विप्रः प्रजापतिः ।' इति ना० अ० । यथा-'ब्रह्माणौ ब्रह्मणो ब्रह्म ब्रह्मणा वेत्तुमर्हतः, । एतत्-पद्यार्ध-बाह्योऽर्थोऽपि न स्यात् कोशमन्तरा. ॥' इति कोशाऽवतंसः ॥ २—'२९७५ । सत-सू-द्विष-द्रुह-दुह-युज-विद-भिदच्-छिद जि-नी-राजामुपसर्गेऽपि क्विप् (०) । ३ । २ । ६१ । एभ्यः क्विप् स्यादुपसर्गे सत्यसति च सुप्युपपदे यथा--द्यु-सत् । उप-नि-षत् । अण्डसूः । प्रसूरित्या ।' इति वै० भ० ।

३— '२२८७ । उपसर्गाद-समासेऽपि णोपदेशस्य । ८ । ४ । १४ । उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः स्यात्समासेऽसमासेऽपि । प्रणदति । प्रणिनदति ॥

यस्माद्राजा । अग्निरपि पुण्यः पावनात्पुण्यः । यागादिः पुण्यस्तेन पुरुषः पूयते । महतां वेदविदां ब्रह्मणां ब्राह्मणानां समूहेन जुष्टः सेवितो राजाग्निश्च । ब्रह्मशब्दोऽत्र ब्राह्मणपर्यायः । नाके स्वर्गे सीदन्तीति '२९७५ । सत्सूद्विष-। ३ । २ । ६१ ।' इत्यादिना क्विप् । नाकसदो देवास्तेषां कर्मणि षष्ठी । संतर्पयति प्रीणयतीति संतर्पणः । संतर्पयतेः '२८४१ । कृत्यल्युटो बहुलम् । ३ । ३ । ११३ ।' इति कर्तरि ल्युट् । राजा यागादिना तर्पयति । अग्निरप्यग्निमुखत्वाद्देवानाम् । वरेण्यः श्रेष्ठो राजाग्निश्च 'वृङ एण्यः' । जज्वाल प्रदीप्तवान् । लोकस्थितये माभूल्लोकस्य स्थित्यतिक्रम इत्येवमर्थम् । अग्निरपि लोकस्य स्थितये ज्वलति । यथोक्तम्—'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥' इति । अभिप्रणीत इत्यग्निविशेषणम् । आभिमुख्येन प्रणीत इति प्रादिसमासः । '२२८७ । उपसर्गादसमासे-। ८ । ४ । १४ ।' इत्यादिना णत्वम् । मन्त्रेणाभिमुखीकृत इत्यर्थः । यथाध्वरे यागेऽभिप्रणीतो वह्निर्ज्वलति तथा राजापीत्यर्थः ॥

यत्रस्थो राज्यं चकार तां नगरीं दर्शयन्नाह—

५—स पुण्य-कीर्तिः शत-मन्यु-कल्पो
महेन्द्र-लोक-प्रतिमां समृद्ध्या ॥
अध्यास्त सर्वर्तु-सुखामयोध्यां[1]-

१—'५४२ अधिशीङ्-स्था-ऽऽसां कर्म । १ । ४ । ४६ । अधिपूर्वा-

मध्यासितां ब्रह्मभिरिद्ध-बोधैः ॥

स पुण्येत्यादि—स्वामिगुणपूर्वका हि निवासस्य गुणा भवन्तीति प्रदर्शनार्थं पश्चात्तदभिधानम्। तथा चोक्तम्—'स तु यच्छीलस्तच्छीला अस्य प्रकृतयो भवन्ति'। इति। स राजा पुण्यकीर्तिः पुण्याः पवित्राः कीर्तयो यस्य सः। शतमन्युकल्प इति प्रभावं दर्शयति। '२०२२। ईषदसमाप्तौ-।५।३।६७।' इति कल्पप्। शतमन्युरिन्द्रः। महेन्द्रलोकप्रतिमामयोध्यामिति योज्यम्। प्रतिमीयते तुल्यत इति प्रतिमा। '३२८३। आतश्चोपसर्गे-। ३। ३। १०६।' इत्यङ्। महेन्द्रलोकेन प्रतिमा तुल्या। '६९२। तृतीया—। २। १। ३०।' इति योगविभागात्समासः। अमरावतीमिवेत्यर्थः। कया। समृद्ध्या। सम्यगतिशयेनर्द्धिः समृद्धिः। '७६९१। कुगतिप्रा-।२।२।१८।' इति प्रादिसमासः। अध्यास्ताध्यासितवान्। भूतसामान्ये लङ्। आस्तेरनुदात्तेत्त्वात्तङ्। '५४२। अधिशीङ्-। १। ४। ४६।' इत्यादिनाधिकरणस्य कर्मसंज्ञा। सुखयतीति सुखा पचाद्यच्। सुखहेतुत्वाद्वा सुखा। सर्वेषु ऋतुषु सुखेति। '७१७। सप्तमी-। २। १। ४०।' इति योगविभागात्समासः। अध्यासितामध्युषिताम्। ब्रह्मभिर्ब्राह्मणैरिद्धबोधैः। सर्वशास्त्रपरिज्ञानात्पटुबुद्धिभिरित्यर्थः। इन्धेर्निष्ठायामनुनासिकलोपः॥

णामेषामाधारः कर्म स्यात्। यथा अधिशेते-अधितिष्ठति-अध्यास्ते वा वैकुण्ठं हरिः।' इति वै० भ०।

६-निर्माणदक्षस्य समीहितेषु
सीमेव पद्मासनकौशलस्य ॥
ऊर्ध्वस्फुरद्रत्नगभस्तिभिर्या-
स्थिताऽवहस्येव पुरं मघोनः ॥

निर्माणेत्यादि—पद्मासनो ब्रह्मा । पद्ममासनं यस्येति कृत्वा । तस्य कौशलं नैपुण्यमिति षष्ठीसमासः । तस्य '७०५ । पूरणगुण-।२।२।११' इत्यादिना न प्रतिषेधः । तत्र विशिष्टा एव गुणा रूपरसगन्धस्पर्शास्तद्विशेषाश्च शुक्लनीलादयः कटुकाम्लादयः सौरभ्यादयः शीतोष्णादयश्च गृहीताः । तत्ररूपादिभिः समासो भवत्येव । 'तत्स्थैश्च गुणैः षष्ठी समस्यते न तु तद्विशेषगुणैः।' इति वचनात् । अन्यैस्तु समासप्रतिषेधः । एवं च कृत्वा मुनित्रयवचनमर्थवद्भवति । तद्यथा '६१६। अधिकरणैतावत्वे च। २।४।१५'।'१२६५। तदशिष्यं संज्ञाप्रमाणत्वात् । १।२।५३। इति पाणिनेः, 'युगपद्देशपृथक्त्वदर्शनादिति रूपसामान्याद्वेति वचनप्रामाण्यादितिचेदलोपप्रतिषेधः' इति कात्यायनस्य, 'नकारग्रहणसामर्थ्याल्लोपो न भविष्यतीति किं पुनरत्रार्थसत्त्वम्' इति भाष्यकारस्येति । तस्य सीमेव मर्यादेवायोध्या । ततो न सृष्ट्यन्तरं शोभ-

१-'११८ । किरणोस्र-मयूखांऽशुगभस्ति-घृणि-रश्मयः ॥' २- '३२० । पूः स्त्री पुरी-नगर्यौ वा पत्तनं पुटभेदनम् ॥' ३-'४७। इन्द्रो मरुत्वान् मघवा बिडौजाः पाकशासनः॥' इति सर्वत्र ना०अ०

नमस्तीत्यर्थः । कीदृशस्य । निर्माणदक्षस्य । निर्मिति-र्निर्माणं सृष्टिस्तत्र दक्षस्य पटोः । क विषयेषु । समीहितेषु । स्रष्टुमीप्सितेष्वित्यर्थः । ऊर्ध्वमुपरिष्टात्स्फुरद्रत्नगभस्तिभिः स्फुरन्तो ये रत्नानां गभस्तयो रश्मयस्तैर्हासभूतैर्मघोन इन्द्रस्य पुरममरावतीमवहस्येव स्थिता या तामध्यास्त । 'मघवन् श्वन् उक्षन्' इत्यौणादिकः । '३६२ । श्वयुवमघोनाम्– । ६।४।१३३।' इति संप्रसारणम् ॥

७–सद्रत्नमुक्ताफलवज्रभाञ्जि
विचित्रधातूनि सकाननानि ॥
स्त्रीभिर् युतान्यप्सरसामिवौघैर्
मेरोः शिरांसीव गृहाणि यस्याम् ॥

सद्रत्नेत्यादि—सन्ति शोभनानि यानि रत्नादीनि तानि भजन्ते यानि गृहाणि तानि सद्रत्नमुक्ताफलवज्रभाञ्जि । मुक्ताफलवज्रयो रत्नान्तर्भावेऽपि प्राधान्यख्यापनार्थं वचनम् । गोबलीवर्दन्यायाद्वा । रत्नशब्देन मरकतपद्मरागवैदूर्यादयो गृह्यन्ते । सद्रत्नादि–'युञ्जि' इति पाठान्तरम् । ३७६ । युजेरसमासे ।७।१।७१ ।' इति प्रतिषेधो न भवति । अनपुंसकविषयत्वात् । नपुंसके तु तल्लक्षणस्य नुमो विधानात् । विचित्रधातूनि विचित्रा नानाप्रकारा धातवो मनःशिलादयो येषु गृहेषु तेषां विरचितचित्रकर्म-

१—'२४९ । अटव्यरण्यं विपिनं गहनं काननं वनम् ।' इति ना० अ० ।

त्वात् । सकाननानि सोद्यानानि । स्त्रीभिर्युतान्य-प्सरसामिवौघैस्तत्रत्याभिः स्त्रीभिरप्सरोभिरिवे-त्यर्थः । मेरोः शिरांसीव मेरोः शृङ्गाणीव एवंविधा-नि गृहाणि यस्यामयोध्यायां तामध्यास्त । गृह इति '२६०६ । गेहे कः । ३ । १ । १४४ ।' तत्र गृहशब्दो वे-श्मनि नपुंसकलिङ्गः । तत्स्थायिषु पुल्लिङ्गो नित्यं बहुवचनान्तश्च ॥

८-अन्तर्निविष्टोज्ज्वलरत्नभासो
गवाक्षजालैरभिनिष्पतन्त्यः ॥
हिमाऽद्रिटङ्कादिव भान्ति यस्यां
गङ्गाऽम्बुपातप्रतिमा गृहेभ्यः ॥

अन्तरित्यादि—अन्तर्गृहमध्ये निविष्टानि निहि-तान्युज्ज्वलरत्नानि यानि तेषां भासो रश्मयो गृहे-भ्यो गवाक्षजालैरभिनिष्पतन्त्यो निर्गच्छन्त्यो य-स्यां भान्ति तामध्यास्तेति योज्यम् । पर्वतस्योन्नत-प्रदेशष्टङ्क इत्युच्यते । तस्माद्धिमवत्पर्वतटङ्कादिव ग-ङ्गाम्बुपातप्रतिमा गङ्गाजलप्रवाहतुल्याः स्वच्छत्वात् ॥

९-धर्म्यासु कामाऽर्थ-यशस्-करीषु

१—'१६४४ । धर्मपथ्यर्थन्यायादनपेते ।४।४।९२। धर्मादन-पेतं धर्म्यम् । पथ्यम् । अर्थ्यम् । न्याय्यम् ।' इति वै० भ० । २— 'इच्छा काङ्क्षा स्पृहेहा तृड् वाञ्छा लिप्सा मनोरथः ॥२२८। का-

मतासु लोकेऽधिगतासु काले ॥
विद्यासु विद्वानिव सोऽभिरेमे
पत्नीषु राजा तिसृषूत्तमासु ॥[2]

धर्म्यास्वित्यादि-धर्मादनपेतासु । '१६४४ । धर्मपथ्यर्थ-। ४ । ४ । ९२ ।' इत्यादिना यत् । कामार्थयशांसि कर्तुं शीलं यासां तासु । '२९३४ । कृञोहेतु- । ३ । २ । २० ।' इत्यादिना ताच्छील्ये टः । '१६० । अतः कृकमि-। ८ । ३ । ४६ ।' इत्यादिना विसर्जनीयस्य सत्वम् । टित्त्वान्ङीप् । मतासु पूजितासु लोके तासां प्रतीतत्वात् । अधिगतासु काले विवाहयोग्ये काले परिणीतासु । सोऽभिरेमे स राजाभिरतवान् । पत्नीषु '४९०। पत्युर्नो यज्ञसंयोगे ।४।१।-३३।' इति नकारः । तिसृषु कौसल्याकैकेयीसुमित्रासूत्तमास्विति सञ्चारिगुणैः श्रेष्ठासु । विद्यास्विति विदन्त्याभिर्धर्माधर्माविति विद्याः '३२७६ । संज्ञायां समज-। ३।३।९९। इत्यादिना क्यप् । तिसृषु सामर्ग्यजुराख्यासु । धर्म्यास्वित्यादिकं तुल्यम् । विद्वानिव यथाधिगतविद्य इत्यर्थः । '३१०५ । विदेः शतुर्वसुः । ७।१।३६।' दीर्घ-हल्ङ्यादि-संयोगान्तलोपाः ॥

तस्य राज्ञः पत्नीभिस्ताभिः सह रममाणस्य सु-

मोऽभिलापस् तर्षश् च,-'इति ना० अ० ॥ १-अत्रोपमाऽलङ्कारः, तल्लक्षणं कुवलयानन्दकारिकायाम् । 'उपमा, यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः, । हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गाम (स्वर्ग गाम) अवगाहते. ॥' २-अत्रोपजातिच्छन्दः, तल्लक्षणं पूर्वो (१) क्तम् ।

ता नैवासन् । ऋष्यशृङ्गनामा मुनिः पुत्रीयं क्रतुं जानातीति पुरोधसो वशिष्ठादुपश्रुत्य राज्ञा वारविलासिनीभिरानायितो मुनिरित्येतत्कथयितुमाह—

१०–पुत्रीयता तेनवराऽङ्गनाभि-
रानायि विद्वान् क्रतुषु क्रियावान् ॥
विपक्त्रिमज्ञानगतिर् मनस्वी
मान्यो मुनिः स्वां पुरमृष्यशृङ्गः ॥

पुत्रीयतेत्यादि–पुत्रीयतात्मनः पुत्रमिच्छता इच्छायाम् '२६५७।सुप आत्मनः क्यच् ।३।१।८।' इति क्यच् । '२६५८। क्यचि च । ७।४।३३।' इतीत्वम् । तेन राज्ञा प्रयोजककर्त्रा वराङ्गनाभिर्वरस्त्रीभिः प्रयोज्यकर्त्रीभिरानायि स्वां पुरमितियोज्यम् । 'नीवह्योः, इत्यादेरपि '५३६ । अकथितं च । १।४।५१ ।, इति चकारेण संगृहीतत्वान्नयतिर्द्विकर्मकः । तत्र प्रधानकर्मणि लुङ् । चिण्णिलोपौ '२३२६ । चिणो लुक्- । ६४।१०४।' इति तशब्दस्य लुक् । गुणकर्मणि तु पुरमिति द्वितीया । '५४०। गति–बुद्धि–।१।४।५२। इत्यादिना प्रयोज्यकर्तरि द्वितीया न भवति । 'नी-वह्योः प्रतिषेधः, इति वचनात् । विद्वान्वेदार्थतत्त्ववित् । एवं च कृत्वा क्रतुषु क्रियावान्प्रशस्तक्रियः प्रशंसायां मतुप् । विपक्त्रिमज्ञानगतिरिति विपाकेन

१–'१०६३। क्रियावान् कर्मसूद्यतः ।' इति ना० अ० । 'भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने । संबन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः ॥' इति वै० भ० ।

निर्वृत्तम् । पचतेः क्त्रिः क्त्रेर्मप् । यत्पूर्वजन्मकृतम-निवर्तनीयं कर्म तस्योग्रतपःप्रत्ययाद्विनोपदेशाज्ज्ञानात्प्रवृत्तिर्भुज्ञावस्य जातेत्यर्थः । मनस्वी प्रशस्तमनाः । प्रशंसायाम् '१६२८ । अस्मायामेधा–५ । २ । १२१' इत्यादिना विनिः । मान्यो मानार्हः । '२८२२ । अर्हे कृत्यतृचश्च–३ । ३ । १६६ ।' इति ण्यत् । धर्मादिमननान्मुनिः । 'मनेरुच्चोपधायाः' इति इन् । उपधाया उकारः । ऋष्यस्य शृङ्गमृष्यशृङ्गं तच्छृङ्गमिव शृङ्गं यस्य स ऋष्यशृङ्गः । 'सप्तम्युपमान–' इत्यादिनोत्तरपदलोपी समासः ॥

११–ऐहिष्ट तं कारयितुं कृताऽऽत्मा
क्रतुं नृपः पुत्रफलं मुनीन्द्रम्, ॥
ज्ञाताऽऽशयस्तस्य ततो व्यतानीत्
स कर्मठः[२] कर्म सुताऽनुबन्धम्, ॥

ऐहिष्टेत्यादि–तं मुनीन्द्रं क्रतुं कारयितुं नृप ऐहिष्ट ईहितवान् । ईहतेरात्मनेपदिनो लुङि सेट्त्वादिटि च रूपम् । द्विकर्मकता तु' ५४१ । ह्रक्रोरन्यतरस्याम् १ । ४ । ५३ ।' इति । कृतात्मा वशीकृतात्मेति भावः । पुत्रफलं पुत्रः फलं कार्यं यस्य क्रतोः ॥ तत उत्तरकालम् । स मुनिः परचित्तज्ञत्वाज्ज्ञाताशयो ज्ञाताभिप्रायो राजाभिमतं कर्म । कारयितुं तस्य नृपस्य कर्म व्यता-

---

१—६७५ । ईह चेष्टायाम । इति धा० पा० । २—'१०६३ । कर्मशूरस्तु कर्मठः ।' इति ना० अ० ।

नीत्प्रारब्धवान् । तनोतेः '२२६८। नेटि–।७।२।४।' इति हलन्तलक्षणायां प्रतिषिद्धायाम् '२२८४। अतो हलादेः–।७।२।७।' इति विभाषावृद्धिः। कर्मठः कर्मणि घटते '१८३६। कर्मणि घटोठच्।५।२।३५।' यागक्रियानिष्पादक इत्यर्थः। सुतानुबन्धं सुताननुबध्नातीति कर्मण्यण्। 'सुतानुबन्धि' इति पाठान्तरम्। सुताननुबद्धुं शीलमस्येति। '२६८८। सुप्यजातौ णिनि:–।३।२।७८।' सुपीत्यनुवर्तमाने सुब्ग्रहणमुपसर्गनिवृत्त्यर्थमिति केवलस्योपसर्गस्य निवृत्त्यर्थं द्रष्टव्यम्। अन्यथा जाताविति किं ब्राह्मणानामन्त्रयितेति न युज्यते अङित्यस्योपसर्गत्वात् ॥

१२–रक्षांसि वेदीं परितो निरास्थ–
दङ्गान्ययाक्षीदभितः प्रधानम्, ॥
शेषाण्यहौषीत् सुत–संपदे च,
वरं वरेण्यो नृपतेरमार्गीत् ॥

रक्षांसीत्यादि–वेदीं परितो यजनवेद्याः समन्तात्। विघ्नायोपस्थितानि रक्षांसि। रक्ष्यते येभ्य इत्यसुन्। तानि रक्षोघ्नैर्मन्त्रैर्निरास्थन्निरस्तवान्। पर्यभिभ्यां सर्वोभयार्थे तसिल्। 'अभितः परितः–' इत्यादिना द्वितीया ॥ अङ्गान्ययाक्षीदभितः प्रधानमिति यद्देवतामयो यागः सा देवता तत्र प्रधानम्। पुत्रफलत्वाद्विष्णुः प्रधानम्। तमिष्ट्वा तस्योभयतः पार्श्वयोर्यान्यङ्गानि चक्षुरादीनि देवतान्तराणि तान्ययाक्षीत्। अ-

१–*अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि*।

आवाहुत्या पूजितवान् । कर्तुः क्रियाफलाभावात्तङ् न भवति । षत्वकत्वे ॥ शेषाण्यहौषीदिति स्वाङ्गं विष्णुमिष्ट्वा शेषाणि प्रतिकृतानि पिष्टकमयानि सुतानां संपदर्थमग्नौ हुतवान् । जुहोतेः सिचि वृद्धाविटि च रूपम् ॥ वरेण्यः श्रेष्ठः । वरं चामार्गीन्मार्गितवान् । ...मा अग्निप्रभृतयो नृपतेः सुता भूयासुरिति । '१६८१। मार्ग अन्वेषणे' । 'आ-धृषाद्वा' इति यदा णिच् नास्ति तदा चङभावात्सिजेव भवति ॥

१३-निष्ठां गते दत्त्रिम-सभ्य-तोषे
विहित्रिमे[1] कर्मणि राज-पत्न्यः ॥
प्राशुर् हुतोच्छिष्टमुदार-वंश्यास्
तिस्रः प्रसोतुं चतुरः सु-पुत्रान् ॥

निष्ठामित्यादि—निष्ठां समाप्तिं गते कर्मणि यागक्रियायां समाप्तायां राजपत्न्यो हुतोच्छिष्टं हुतावशेषं शिष्टचरुं प्राशुर्भक्षितवत्यः । अश्नातेर्लिटि उसि रूपम् । दत्त्रिमसभ्यतोषे दानेन निर्वृत्तो दत्त्रिमः सभ्यानां ब्राह्मणानां तोषो यत्र कर्मणि । विहित्रिमे विधानेन निर्वृत्ते कर्मणि दाञो धाञश्च '३२६६। ड्वितः क्त्रिः ।३।३।८८।' इति क्त्रौ विहिते प्रथमस्य '३०७७। दोदद्घोः ।७।४।४६।' इति ददादेशः । द्वितीयस्य '३०७६। दधातेर्हिः ।७।४।४२।' इति हिरादेशः ।

१-'१२४७ निष्ठानिष्पत्तिनाशाऽन्ताः ।' इति ना० अ० ।
२-११२३। डु-दा-ञ्-दाने । ३-११६७ । डु धा ञ् धारणपोषणयोः । दान इत्यप्येके। इति धा० पा० ॥

मप् । सभायां साधव इति सभ्याः । '१६५७ । सभाया यः– ४।४।१०५।' उदारवंश्या महावंशोद्भवाः । शेषे यत् । कौसल्या कैकेयी च क्षत्रिये, सुमित्रा तु वर्णसंकरजा । किमर्थं प्राशुः । प्रसोतुं सपुत्रान्विनीतान्प्रसवितुम् । तत्र कौसल्या केकयी चैकैकं पिण्डं प्राशितवत्यौ । ताभ्यां चावयोः परिचारिकेति पिण्डभागद्वयं दत्तं सुमित्रा प्राशितवती । ततश्च पुत्रद्वयं जनयिष्यति । एवंचाभिसंधाय चतुर इत्युक्तं न तु त्रीनिति । '११०४ । पूङ् प्राणिगर्भविमोचने ।' '२२७६ । स्वरति–। ७।२।४४। इत्यादिना विभाषितेट् ॥

१४--कौसल्ययाऽसावि सुखेन रामः
प्राक् केकयीतो भरतस् ततोऽभूत् ॥
प्रासोष्ट शत्रुघ्नमुदार-चेष्ट-
मेका सुमित्रा सह लक्ष्मणेन ॥

कौसल्ययेत्यादि— कोसलस्य राज्ञोऽपत्यमिति '११८६ । वृद्धेत्कोसलाजादाञ्ञ्यङ् ।४।१।१७१।' '५२८ । यङश्चाप् । ४ । १ । ७४ ।' कौसल्यया प्राक् प्रथमम् । असावि रामो जन्यते स्म । षूङः कर्मणि लुङि चिणि रूपम् । सुखेनेति प्रकृत्यादित्वात्तृतीया । महतां जन्मनि न काचिदपि पीडास्ति ॥ तदनन्तरं केकयीतो भरतोऽभूत् । केकयानाचष्टेति णिच् । सा हीदृशास्तादृशाः केकया इति कथयति । तदन्तात् 'अच इः' इति इकारप्रत्यय औणादिकः । णिलोपः । 'कृदिकारादक्तिनः' इति ङीष् । '२११२ ।

अपादाने चाहीयरुहोः । ५ । ४ । ४५ ।' इति तसिः । यदा च केकयस्यापत्यम् '११८६ । जनपदशब्दात्क्षत्रियादञ् । ४ । १ । १६८ ।' इत्यञ् '११४४ । केकयमित्रयुप्रलयानां यादेरियः । ७ । ३ । २ ।' इतीयादेशः । '४७० । टिड्ढाणञ् । ४ । १ । १५ ।' इति ङीप् । तदा कैकेयीति द्वितीयं रूपम् ॥ सुमित्रा शत्रुघ्नमुदारचेष्टम् । उदारा चेष्टा यस्येति । प्रासोष्ट प्रसूतवती । कर्तरि लुङ् । ङित्त्वात्तङ् । जातमात्रस्य हि तस्य किल महासत्त्वतया तादृश्येव चेष्टाऽभूदिति श्रूयते । एकेति । एकैवेति गम्यमानत्वादेवशब्दो न प्रयुक्तः । सह लक्ष्मणेन, लक्ष्मणेन सह ॥

१५–आर्चीद् द्विजातीन् परमाऽर्थ-विन्दा-
नुदेजयान् भूत-गणान् न्यषेधीत्, ॥
विद्वानुपानेष्ट च तान् स्व-काले
यतिर्[1] वशिष्ठो[2] यमिनां वरिष्ठः,[3] ॥

आर्चीदित्यादि–तेषु जातेषु द्विजातीन्द्वे जाती येषामिति तान्ब्रह्मणक्षत्रियवैश्यान्परमार्थविन्दान् । विन्दन्तीति विन्दाः । १५२६ विद्-लृँ लाभे' इत्यस्मात् '२९०० । अनुपसर्गात्–३।१।१३८।' इत्यादिना शः । मुचादित्वान्नुम् । परमार्थस्य विन्दाँल्लाभिन इति कर्मणि षष्ठी । तस्याः 'कृद्योगा च षष्ठी समस्यत इति व-

१---'७५१ । ये निर्जितेन्द्रिय-ग्रामा यतिनो यतयश् च ते ॥' इति ना० अ० । २---वश इन्द्रिय-निग्रहो येषां तेषु प्राधान्येन तिष्ठति यः स वशिष्ठः । ३---'यतिनां वरिष्ठः' इत्यपि क्वचित् पाठः ।

क्वरप्' इति समासः । तानार्चीत्स्रगादिभिः पूजितवान् । '२१३ अर्च पूजायाम्' इत्यस्माल्लुङि तिप् इट् सिचो लोपः ॥ भूतगणान्राक्षसादिगणान् । उदेजयानुत्कम्पान् । तस्मिन्नेव सूत्रे उत्पूर्वे एजिरण्यन्तो निर्दिष्टः । तस्मादुदेजयतीति शः । तान्न्यषेधीदुत्सादितवान् । षिधेः '२२६८। नेटि ।७।२।४।' इति हलन्तलक्षणायाः प्रतिषेधः ॥ विद्वान्पौरोहित्यकर्मणि कुशलः । उपानेष्ट च तान्रामादीन् । तेषामुपनयनादिक्रियां चकार । '२७०६। संमानन-।१।३।३६।' इत्यादिनाचार्यकरणे तङ् । स्वकाल इति 'गर्भादेकादशे वर्षे जातस्य गर्भैकादशे' इत्यादिना वचनेन उपनयनकाल उक्तः । यमनियमेषु यतत इति यतिः । 'सर्वधातुभ्य इन्' इति इन् । 'अहिंसा सत्यमस्तेयं ब्रह्मचर्यमकल्मषम् ॥ इति पञ्च यमा येषां सन्तीति यमिनः स्मृताः' । तेषां वरिष्ठ उत्तमः । '२०१६ । प्रियस्थिर-।६।४।१५७।' इत्यादिनोरुशब्दस्य वरादेशो महत्पर्यायस्य । वशिष्ठः ॥

१६–वेदोऽङ्गवांस्तैरखिलोऽध्यगायि,
शस्त्राण्युपायंसत जित्वराणि, ॥
ते भिन्नवृत्तीन्यपि मानसानि
समं जनानां गुणिनोऽध्यवात्सुः ॥

१–'३१४३। इण्नश्जिसर्तिभ्यः क्वरप्(वर)।३।२।१६३। इत्वरः। इत्वरी। नश्वरः। जित्वरः। सृत्वरः। 'इति वै० भ०। '८४२। जेता जिष्णुश् च जित्वरः॥' इति ना० अ० ॥

वेद इत्यादि—'शिक्षा कल्पो व्याकरणं छन्दोविचितिर्निरुक्तं ज्योतिषं चेति षडङ्गानि शास्त्राणि तानि विद्यन्ते यस्य वेदस्येत्यङ्गवान्। तैरुपनीतैरामादिभिः। अखिलो निःशेषो वेदोऽध्यगायि। अधीत इत्यर्थः। इङोऽधिपूर्वात्कर्मणि लुङि '२४६०। विभाषा लुङ्-लृङोः।२।४।५०।इति गाङादेशः। चिण् थुक् तलुक्॥ शस्त्राणि धनुरादीनि जित्वराणि जयशीलानि।'३१४३। इण्नश्जि–३।२।१६३।' इत्यादिना करप्। तैरुपायंसत स्वीकृतानि। उपपूर्वो यमिः स्वीकरणे वर्तते। तस्मात्कर्मणि लुङ्। '२२५८। आत्मनेपदेषु–।७।१।५।' इत्यादिना अदादेशः। '२६६७। हनः सिच्।१।२।१४।' इति ज्ञापकादनुनासिकलोपाभावः॥ ततस्ते रामादयो गुणिनो मानसानि मनांसि। प्रज्ञादित्वात्स्वार्थे णः। भिन्नवृत्तीनि नानाविधप्रवृत्तीनि विषयेषु तानि मानसान्यपि जनानां समं साधारणम्। क्रियाविशेषणम्। अध्यवात्सुरध्युषितवन्तः। अधिपूर्वाद्वसेः सिचि '२२६७। वदव्रज–।७।२।३।' इत्यादिना वृद्धिः। '२३४२। सः सि–७।४।४६।' इति तत्वम्। '२२२६। जिसभ्यस्त–३।४।१०६।' इति जुस्। '५४४। उपान्–१।४।४८।' इत्यादिनाऽऽधिकरणस्य कर्मसंज्ञा॥

१७–ततोऽभ्यगाद् गाधि-सुतः क्षितीन्द्रं

१—'७४३। अथ गाधेयो विश्वामित्रश् च कौशिकः॥' इति ना० अ०॥

रक्षोभिरभ्याहतकर्मवृत्तिः ॥
रामं वरीतुं परिरक्षणाऽर्थे,
राजाऽऽर्जिहत् तं मधुपर्कपाणिः ॥

तत इत्यादि—तेषु रामादिषु तथाभूतेषु । गाधिसुतो विश्वामित्रः । क्षितीन्द्रं राजानमभ्यगादभिगतवान् । इणो गादेशः । '२२२३ । गातिस्था २।४।७७।' इत्यादिना सिचो लुक् । रक्षोभिर्निशाचरैरभ्याहताभिभूता यागादेः कर्मणो वृत्तिः प्रवृत्तिर्यस्येति । रामं वरीतुं प्रार्थयितुम् । '२३६१। वृतो वा ।७।२।३८।' इति इटो दीर्घत्वम् । परिरक्षणार्थं विहन्यमानस्य कर्मण इत्यर्थः ॥ तं गाधिसुतम् । आर्जिहत् पूजितवान् । '१८६४ । अर्ह पूजायाम्' इति स्वार्थिकणयन्तश्चौरादिको गृह्यते न भौवादिकः । तस्माद्धेतुमण्णिचात्र न भवितव्यम् '२३१२। णिश्रि–।३।१।४८।' इत्यादिना चङ् । णिलोपः । '२२४३। द्विर्वचनेऽचि ।१।१।५९।' इति स्थानिवद्भावात् । '२१७६। अजादेर्द्वितीयस्य ।६।१।२।' इति हिशब्दो द्विरुच्यते । रेफस्य न । '२४४६। न न्द्राः–।६।१।३।' इति प्रतिषेधः । चुत्वम् । आट् । वृद्धिः । मधुपर्कपाणिः । दधिघृतमधून्येकीकृतानि मधुपर्क इत्युच्यते । तस्मिन् पात्रे स्थितः पाणिर्यस्येति विग्रहः । 'सप्तम्युपमाने–' इत्यादिना उत्तरपदलोपी समासः । पात्रादुद्धृत्य मधुपर्केण पूजितवानित्यर्थः ॥

१८–ऐषीः पुनर्जन्म-जयाय यत् त्वं,
रूपाऽऽदि-बोधान् न्यवृतच्च यत् ते, ॥

तत्त्वान्यबुद्धाः प्रतनूनि येन,
ध्यानं नृपस् तच्छिवमित्यवादीत् ॥

ऐषीरित्यादि—मुक्तिस्तत्त्वावबोधस्तस्या ध्यानं प्रयोजनं तत्र पुनर्जन्म भूयोजन्म तस्य जयाय यद्ध्यानं त्वमैषीः एषितवानसि । इषेर्लुङ् । मध्यमैकवचने २२६६ । इट ईटि । ८ । २ । २८ ।' इति सिचो लोपे रूपम् । रूपादिबोधान्न्यवृतच्च यत्ते--रूपादिषु शब्दस्पर्शरूपरसगन्धेषु चक्षुरादिद्वारेण यो बोधोऽध्यवसायलक्षणा बुद्धिः तस्माच्च यद्ध्यानं न्यवृतत् निवृत्तम् वृतेर्द्युतादित्वात् '२३४५ । द्युद्भ्यो लुङि १ । ३ । ९१ ।' इति तिप् । च्लेरङ् ॥ तत्त्वानि पञ्चविंशतिः । पुरुषप्रधानमहदहङ्कारादीनि । प्रतनूनि सूक्ष्माणि येन ध्यानेनाबुद्धाः ज्ञातवानसि बुधेरनुदात्तेतो लुङ् । थासः सिच् '२३०० । लिङ् सिचावात्मनेपदेषु । १ । २ । ११ । इति सिचः कित्त्वाद्गुणाभावः । झिज्लोपधत्वजशत्वादि ॥ तद्ध्यानं शिवं शोभनं कच्चिदिति नृपोऽवादीत् । न तस्य व्याघात इति । '२२६७ । वद-व्रज । ७ । २ । ३ ।, इत्यादिना वृद्धिः । '९७४ ध्यै चिन्तायाम्, भावे ल्युट् । ध्यानम् ॥

१६—आख्यन् मुनिस् तस्य शिवं समाधेर्,
विघ्नन्ति रक्षांसि वने क्रतूंश्च ॥
तानि द्विषद्-वीर्य-निराकरिष्णुस्

१--'१४७ । श्वः श्रेयसं शिवं भद्रं कल्याणं मंगलं शुभम् ।' इति ना० अ० ।

तृणेढु रामः सह लक्ष्मणेन ॥

आख्यदित्यादि—पृष्टो मुनिस्तस्य समाधेर्ध्यान-स्य शिवमनुपद्रवमाख्यत् कथितवान्। '२४३६। च-क्षिङः ख्याञ्। २। ४। ५४'। '१४३८। अस्यति-३। १। ५२।, इत्यादिना च्लेरङ्। आतो लोपः ॥ किन्त्वयं दोषः—विघ्नन्ति रक्षांसि वने क्रतून्। '२३६३। गम-हन-।६।४।६८।' इत्यादिना उपधा-लोपः। '३५८। हो हन्तेः-।७।३।५४। इति कुत्वम् ॥ किं क्रियतामिति चेदाह-तानि रक्षांसि। द्वि-षतां वीर्यं सामर्थ्यं। वीरेः स्वार्थिकण्यन्तात् '२८४२। अचो यत्। ३। १। ९७।' तस्य निराकरिष्णुः निरा-करणशीलः। '३११६। अलंकृञ्।३।२।१३६।' इ-त्यादिना इष्णुच्। तृणेढु हिनस्तु। तृहेर्विधौ लोट्। '२२९६। एरुः। ३। ४। ८६।' रुधादित्वात् श्नम्। '२५४५। तृणह इम्। ७। ३। ९२।' '३२४। हो ढः ।८।२।३१।' ष्टुत्वं। '२३३५। ढो ढे। ८। ३। १३। इति ढलोपः। सह लक्ष्मणेन, लक्ष्मणेन सह ॥

२०—स शुश्रुवांस्तद्-वचनं मुमोह
राजाऽसहिष्णुः सुत-विप्रयोगम्, ॥
अहंयुनाऽथ क्षिति-पः शुभंयु-
रूचे वचस् तापस-कुञ्जरेण ॥

१—'१०९५। अहङ्कारवानहंयुः, शुभंयुस् तु शुभाऽन्वितः।'

२—'स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुञ्जराः ॥ सिंहशार्दूलनागाऽऽद्याः पुंसि श्रेष्ठाऽर्थगोचराः।' इत्युभयत्र ना० अ०।

स इत्यादि—स राजा तस्य मुनेस्तद्वचनं शुश्रुवान् श्रुतवान् सन् सुतविप्रयोगमसहिष्णुरसहनशीलो मुमोह मोहमुपगतः । शृणोतेः '३०९७ । भाषायां सद-वस-श्रुवः ३ । २ । १०८ ।' इत्यनेन क्वसुः । सुतेन विप्रयोगमिति '६९४ । कर्तृकरणे कृता बहुलम् । २ । १ । ३२ ।' इति समासः । ६२७ । न लोकाव्यय-निष्ठा-- २ । ३ । ६९ ।' इति षष्ठ्याः प्रतिषेधः ॥ अथानन्तरम् । अहंयुना अहंकारवता । '१९४६ । अहं-शुभमोर्युस् । ५ । २ । १४० ।' तापसकुञ्जरेण '१९०९ । तपः-सहस्राभ्यां विनीनी । ५ । २ । १०२ ।' इत्यनुवर्तमाने 'अण् च' इति मत्वर्थेऽण् । तापसश्च स कुञ्जरश्चेति । ७४१ । वृन्दारक- । २ । १ । ६२ । इत्यादिना समासः । तेन क्षितिपो राजा । शुभंयुः कल्याणवान् । पूर्ववद्युस् । वचो वक्ष्यमाणसूचे उक्तः । कर्मणि लिट् । सम्प्रसारणम् । अहंयुनाथः इति विसर्गान्तं पाठान्तरम् । तत्र अहंयूनां क्षत्रियाणां नाथ इति योज्यम् ॥

२१—मया त्वमाप्थाः शरणं भयेषु,
वयं त्वयाऽप्याप्स्महि धर्म-वृद्धयै, ॥
क्षात्रं द्विज-त्वं च परस्परार्थं,
शङ्कां कृथा मा, प्रहिणु स्व-सूनुम् ॥

मयेत्यादि—भयेषु त्वं शरणम् आप्थाः प्राप्तोऽसि मया । आपेः कर्मणि लुङ् । सिज्लोपः ॥ त्वयापि धर्मवृद्धयै धर्मोपचयाय वयमाप्स्महि प्राप्ताः । पूर्ववल्लुङादि । उत्तमबहुवचनम् । सिचो लोपाभावः ।

मकारस्याझल्त्वात् ॥ तदित्थं चात्रं द्विजत्वं च धर्मवृद्धयै परस्परार्थं अन्योन्यप्रयोजनम् । 'कर्मव्यतिहारे सर्वनाम्नो द्वे भवतः'। 'समासवच्च बहुलम्' इति यदा न समासवत् तदायम् ॥ तस्मान्मा शङ्कां कृथाः मा-कार्षीः । कथमस्मिन् संकटे पुत्रं नियोजयामीति । '२२१९ । माङि लुङ् । ३ । ३ । १७५' । अडभावः । '२३६८ । उश्च । १ । २ । १२' इति कित्त्वाद् गुणाभावः । '२३६९ । ह्रस्वादङ्गात् । ८ । २ । २७ ।' इति सिचो लोपः ॥ प्रहिणु प्रेषय । स्वं पुत्रम् । हिनोतेः प्रार्थनायां लोट् । श्नुः । अपित्त्वात् ङित्त्वम् । गुणाभावः । '२३३४ । उतश्च प्रत्ययात् । ६ । ४ । १०६ ।' इति हेर्लुक् '२५३० । हिनु मीना । ८ । ४ । १५ ।' इति णत्वम् ॥

२२–घानिष्यते तेन महान् विपक्षः,
स्थायिष्यते येन रणे पुरस्तात्, ॥
मा मां महाऽऽत्मन् परिभूरयोग्ये
न मद्-विधो न्यस्यति भारमग्र्यम् ॥

घानीत्यादि—अनागतमर्थं ज्ञानेन समीक्ष्याह-महान्विपक्षो रावणः त्रैलोक्यविजयित्वात् । सोऽपि तेन रामेण घानिष्यते, किमुतेतरे राक्षसाः । हन्तेः कर्मणि लृट् । '१७५७ । स्य-सिच्–। ६ । ४ । ६२ ।' इत्यादिना चिण्वदिट् उपधावृद्धिः । '३५८ । हो हन्तेः–। ७ । ३ । ५४ ।' इति कुत्वम् ॥ पुरस्तादग्रतो यद्रणं युद्धं भावि परशुरामेण सार्द्धमिति भावः । तत्र येन

स्थायिष्यते तेन यानिष्यत इति योज्यम्। अत्र तिष्ठतेर्भावे लृट्। चिरवदिड्वा। '२७६१। आतो युक्। ७। ३। ३३।'॥ हे महात्मन्। महासत्व मा मां परिभूर्मावज्ञासीः। किमेवं वदसीति। परिपूर्वो भवतिर्निराकरणे वर्तते॥ मद्विध इति विधानं विधा प्रकारः '३२८३। आतश्चोपसर्गे। ३। ३। १०६।' इत्यङ्। विधा भेदः सादृश्यञ्च। इह सादृश्यं गृह्यते, मया विधा सादृश्यं यस्येति मद्विधः। '१३७३। प्रत्ययोत्तरपदयोश्च। ७। २। ९८।' इति मदादेशः। मद्विधो मत्सदृशोऽन्यो न भारमग्रयम् '३४९२। अग्रायत्। ४। ४। ११६।' अयोग्ये असमर्थे न्यस्यति निक्षिपति। किमहं येनालागतं समीचितामिति भावः। योगाय प्रभवति योग्यः '१७६६। योगाद्यत्। ५। १। १०२।'॥

२३–क्रुध्यन् कुलं धक्ष्यति विप्र-वह्निर्,
यास्यन् सुतस् तप्स्यति मां स-मन्युम्॥
इत्थं नृपः पूर्वमवालुलोचे,
ततोऽनुजज्ञे गमनं सुतस्य॥

क्रुध्यन्नित्यादि–यद्यहं भूतरक्षणेऽधिकृतोऽस्य वचनं न कुर्यां तदा क्रुध्यन्सन्। दिवादित्वात् श्यन्। विप्रो वह्निरिव। '७३५। उपमितम्–। २। १। ५६।' इति समासः। धक्ष्यति कुलं भस्मसात्करिष्यति। दहेर्लृट् '३२५। दादेः–। ८। २। ३२।' इति घः। भष्भावः। चर्त्वम्। घकारस्य ककारः। '२११ इण्कोः। ८। ३। ५७।' इति षत्वं॥ यास्यन्गमिष्यन्सुतो मां

समन्युं सशोकं तप्स्यति सन्तापयिष्यति । तपेर्लृट् ॥
इत्थमेवंप्रकारं नृपः पूर्वमादाववालुलोचेऽवलोचि-
तवान् । अवाङ्पूर्वाल्लोचेर्लिट् ॥ तत उत्तरकालं सु-
तस्य गमनमनुजज्ञे । अनुज्ञातं नृपेणेति विभक्तिवि-
परिणामेन तेनेति योज्यम् । कर्मणि लिट् । '१६०४
'ज्ञा अवबोधने' इति परस्मैपदित्वात् । नचानुपूर्वाद्-
स्मादात्मनेपदं विहितम् ॥

२४–आशीर्भिरभ्यर्च्य मुनिः क्षितीन्द्रं,
प्रीतः प्रतस्थे पुनराश्रमाय ॥
तं पृष्ठ-तः प्रेष्ठमियाय नम्रो,
हिंस्रेषु-दीप्ताऽऽप्त-धनुः कुमारः ॥

आशीर्भिरित्यादि—रामगमनस्यानुज्ञातत्वात्
प्रीतो मुनिः क्षितीन्द्रं राजानमाशीर्भिरभ्यर्च्य पूज-
यित्वा । आङः शासेः क्विप्युपसंख्यानात् उपधाया
इत्वम् । प्रतस्थे पुनराश्रमाय—आश्रमं पुनः प्रस्थित-
वान् । तिष्ठतेः '२६८६ । समव–। १ । ३ । २२ । इत्या-
दिना लिटि तङ् ॥ प्रेष्ठम् अग्रयायिनं तं '२६१७ । प्र-
ष्ठोऽग्रगामिनि । ८ । ३ । ९२ ।' इति षत्वम् । पृष्ठतः
पश्चात् इयाय कुमारः । इणो णलि वृद्धिरायादेशः
'२२४३ । द्विर्वचनेऽचि । १ । १ । ५९ ।' इति स्थानि-
वद्भावाद्द्विर्वचनमिकारस्य । '२२९० । अभ्यासस्याऽ-
सवर्णे । ६ । ४ । ७८ ।' इतीयङ् । नम्रोऽनुकूलः । हिं-

१—'८३७ । पुरोगाऽग्रेसरप्रष्ठाऽग्रतःसर-पुरःसराः ।' इति
ना० अ० ॥

सनशीला इषवः शराः हिंस्रेषवः । आप्तमविसंवादि यद्धनुस्तत् । हिंस्रेषु दीप्तमाप्तं धनुर्यस्य कुमारस्येति विग्रहः । अत्र '८७० । धनुषश्च । ५ । ४ । १३२ ।' इत्यनङ् न भवति "समासान्तविधिरनित्यः" इति । दीप्रास्त्रधनुरिति पाठान्तरम् । दीप्रमस्त्रं धृष्टतया यस्य धनुषस्तद्दीप्रास्त्रं धनुर्यस्येति सः । कस्मिन्विषये हिंस्रेषु नान्येषु । नम्रादयो '३१४७ । नमिकम्पि-। ३ । २ । १६७ ।' इत्यादिना रप्रत्ययान्ताः ॥

२५-प्रयास्यतः पुण्य-वनाय[1] जिष्णो-[2]
रामस्य रोचिष्णु[3]-मुखस्य धृष्णुः[4] ॥
त्रै-मातुरः कृत्स्न-जिताऽस्त्र-शास्त्रः
सध्र्यङ्[5] रतः श्रेयसि लक्ष्मणोऽभूत् ॥

प्रयास्यत इत्यादि—प्रयास्यतो गमिष्यतो रामस्य लक्ष्मणः सध्र्यङ् अभूत् सहायीभूतः । 'सहाञ्चति' इति क्विन् अनुषङ्गलोपः '३६१ । उगिदचाम्—७ ।

१—'५८५ । गत्यर्थ-कर्मणि द्वितीया-चतुर्थ्यौ चेष्टायामनध्वनि । २ । ३ । १२ । अध्वभिन्ने गत्यर्थानां कर्मण्येतेस्तश्चेष्टायाम् । ग्रामं ग्रामाय वा गच्छति ।' इति वै० भ० ॥

२—'८४२ । जेता जिष्णुश् च जित्वरः ।' ॥

३—'६६५ । विभ्राट् भ्राजिष्णु-रोचिष्णू', ॥

४—'१०७० । धृष्टे धृष्णग् (धृष्णुर्) वियातश्च,' ॥

५—'१०७९ । यः सहाऽञ्चति सध्र्यङ् सः ।' इति सर्वत्र ना० अ० ॥

१।७०।' इति नुम्। हल्ङ्यादि-संयोगान्तलोपौ '३७७। क्विन्प्रत्ययस्य-। ८। २। ६२।' इति कुत्वं नकारस्य ङकारः। '४२२। सहस्य सध्रिः। ६। ३। ६५।' इति सध्र्यादेशः। पुण्यवनाय पुण्यहेतुत्वात्पुण्यं वनम्। गत्यर्थात् कर्मणि चतुर्थी। जिष्णोर्जयशीलस्य '३११६। ग्ला-जि-स्थश्च-। ३। २। १३६।' इति ग्स्नुः। रोचिष्णु रोचनशीलं मुखं यस्य रामस्य पितुराज्ञया तुष्टत्वात्। '३११६। अलंकृञ्-३। २। १३६।' इत्यादिना इष्णुच्। धृष्णुः शत्रुविध्वंसने प्रगल्भः। '३१२०। त्रसि-गृधि-। ३। २। १४०।' इत्यादिना क्नुः। त्रैमातुरः तिसृणां मातॄणामपत्यमिति तद्धितार्थविषये समासः। पश्चात् '१११८। मातुरुत्सङ्ख्या-४। १। ११५।' इत्यादिना अण् उत्वञ्च। १०८०। द्विगोर्लुगनपत्ये। ४। १। ८८। इति लुक् न भवति। स हि पिण्डद्वयप्राशनात्ताभ्यां च जनितः। अस्त्रं च शस्त्रं चेति द्वन्द्वः। कृत्स्नं समग्रं जितमधिगतमस्त्रशस्त्रं येनेति विग्रहः। रतः श्रेयसि कल्याणे '२०१०। प्रकृत्यैकाच्। ६। ४। १६३।' '२००६। प्रशस्यस्य श्रः ५। ३। ६०।' लक्ष्मीरित्यौणादिकः। लक्षेर्मुट् ईप्रत्ययश्च। सा यस्य विद्यत इति लक्ष्मणः। लोमादिषु 'लक्ष्म्या अच्च' इति न-प्रत्ययः अत्त्वञ्च॥

२६—इषु-मति रघु-सिंहे दन्दशूकाञ् जिघांसौ
धनुररिभिर-सह्यं मुष्टि-पीडं दधाने॥
व्रजति, पुर-तरुण्यो बद्धचित्राऽङ्गुलित्रे

कथमपि गुरु-शोकान् मा रुदन् माङ्गलिक्यः॥[1]

इषुमतीत्यादि—रघुसिंहे रामे रघुषु रघुवंशभवेषु सिंह इव शौर्यादियोगात्। व्रजति सति। इषुमति सनिषङ्गे प्रशंसायां मतुप्। तदुक्तं कौमुद्यां 'भूम-निन्दा-प्रशंसासु नित्ययोगेऽतिशायने। संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः।' दन्दशूकान् हिंस्रान्, दंशेः '२६३५। लुप-सद-। ३। १। २४।' इत्यादिना यङ्। 'जप-जभ-' इत्यादिना अभ्यासस्य नुक्। तदन्तात् '३१४६। यज-जप-। ३। २। १६६।' इत्यादिना ऊकः। '२३०८। अतो लोपः। ६। ४। ४८।' '२६३१। यस्य हलः। ६। ४। ४६।' जिघांसौ हन्तुमिच्छौ। '२६१४। अज्झन-। ६। ४। १६।' इति दीर्घः। '२४३०। अभ्यासाच्च। ७। ३। ५५।' इति कुत्वम्। '३१४८। सनाशंस-। ३। २। १६८।' इति उः '६२७। न लोक-। २। ३। ६६।' इति षष्ठीप्रतिषेधात् द्वितीयैव। धनुर्दधाने बिभ्राणे। अरिभिरसह्यं सोढुमशक्यम्। '२८४७। शकि-सहोश्च। ३। १। ६६।' इति यत्। मुष्टिपीडं मुष्टिना पीडयित्वा मुष्टिशब्दे तृतीयान्ते उपपदे '३३७०। सप्तम्यां चोपपीड-३। ४। ४६।' इति णमुल्। तत्र चकारेण तृतीया-

---

१—पद्येऽस्मिन्वृत्तं मालिनी। तल्लक्षणम्—'न-न-म य-य-युतेयं मालिनी भोगि (८)-लोकैः (७)।' इति वृत्तरत्नाकरेऽतिशक्वर्यां जातौ (१५ अक्ष०) भट्ट-केदारः॥

नुकर्षणात् । बद्धं चित्रमङ्गुलित्रं येन । अङ्गुलिं त्रायत इति कः । पुरे तरुण्यः पुरतरुण्यः । 'नञ्स्नञीकक्ख्युं-स्तरुणतलुनानामुपसङ्ख्यानम्' इति ङीप् । यदि त-ह्वचोऽर्थवत् । नो चेद्गौरादिपाठात् ङीष् । रामो गत इति गुरुः शोको यासां ताः । कथमपि मा रुदन् न न रुदितवत्यः । रुदेः '२२६६ । इरितो वा । ३ । १ । ५७ ।' इति च्लेरङ् । यतो माङ्गलिक्यः मङ्गलप्रयो-जनाः । तदस्य '१७७२ । प्रयोजनम् । ५ । १ । १०६ ।' इति ठञ् । '४७० । टिड्ढाणञ्-। ४ । १ । १५ ।' इत्या-दिना ङीप् ॥

२७–अथ जगदुरनीचै राशिषस् तस्य विप्रास्,
तुमुल-कल-निनादं तूर्यमाजघ्नुरन्ये ॥
अभिमत-फल-शंसी चारु पुस्फोर बाहुस्,
तरुषु चुकुवुरुच्चैः पक्षिणश् चाऽनुकूलाः ॥[1]

अथेत्यादि–तस्य रामस्य व्रजतो विप्रा अनीचैर्म-हता ध्वनिनाशिष इष्टवचनानि जगदुर्गदितवन्तः । अन्ये वादकास्तूर्यं कांस्यतालपटहादिसमूहमाजघ्नु-स्ताडितवन्तः । '२६६५ । आङो यम-हनः । १ । ३ । २८ ।' इत्यात्मनेपदं न भवति । अकर्मकादित्यनुवर्तते । तुमुलो महान्कलो मधुरो निनादो ध्वनिर्यस्येति । अभिमतमिष्टं फलं शंसितुं शीलं यस्य बाहोः स चा-रु पुस्फोर सुतरां स्फुरितवान् । अत्र दक्षिणो बाहुः

१–पद्येऽस्मिन्वृत्तं पूर्वो (२६) क्तम् ॥

सामर्थ्याद्गम्यते स्वाङ्गत्वात् । अनेन सीताप्राप्तिबीजमुपन्यस्तम् । स्फुरतेरभ्यासस्य '२२५६ । शर्पूर्वाः खयः । ७ । ४ । ६१ ।' इति खयः शेषः । चर्त्वम् । पक्षिणश्च तरुषु स्थिता अनुकूलाः सन्त उच्चैः सुष्ठु चुकुवुः कूजितवन्तः । '१११५ । कु शब्दे' इत्यस्य लिटः कित्त्वादुवङादेशः ॥

इति श्रीजयमङ्गलाऽऽख्यया व्याख्यया समलंकृते
श्रीभट्टिकाव्ये-प्रथमे प्रकीर्णकाण्डे लक्षण-
रूपे प्रथमः परिच्छेदः (वर्गः), तथा ल-
क्ष्यरूपे कथानके श्रीरामसंभवो-
नाम प्रथमः सर्गः पर्यवसितः ॥

द्वितीयः सर्गः--

इदानीं विजिगीषूणां कण्टकान् समुद्धर्तुं शारत्काले समुद्योग इति तमेव वर्णयन्नाह—

२८-वनस्पतीनां सरसां नदीनां
तेजस्विनां कान्तिभृतां दिशां च ॥
निर्याय तस्याः स पुरः समन्ता-
च्छ्रियं दधानां शरदं ददर्श ॥ १ ॥

वनस्पतीनामित्यादि—स रामः। तस्याः पुरः अयोध्यायाः। निर्याय निर्गत्य। समन्तात् सर्वतः शरदं ददर्श दृष्टवान्। कालस्याप्रत्यक्षत्वात् कार्याणुदर्शनात्तद्दर्शनमिति मन्यते। श्रियं दधानां धारयन्तीं। केषां वनस्पतीनां। पारस्करादिदर्शनात् सुट्। अत्र लोकप्रतीत्या वृक्षा द्रष्टव्याः। न तु पारिभाषिकाः। तथा सरसां तडागानां नदीनां गङ्गादीनां तेजस्विनां चन्द्रतारादीनां कान्तिं नैर्मल्यं बिभ्रतां दिशां च। तदा हि निर्मला दिशो भवन्ति। वनस्पत्यादीनां श्रियं दधानां शरदं ददर्श ॥

१–'१०७१। पारस्कर-प्रभृतीनि च संज्ञायाम्। ६। १। १५७। पारस्करः, तस्करः, बृहस्पतिः, च वनस्पतिः।' इति वै० भ०। '३५४। वानस्पत्यः फलैः पुष्पात्, तैरपुष्पाद् वनस्पतिः।' इति ना० अ० ॥

तां रामव्यापारं विना सामान्येन वर्णयन्नाह—

२९–तरङ्गसङ्गाच् चपलैः पलाशैर्
ज्वालाश्रियं साऽतिशयां दधन्ति ॥
सधूमदीप्ताऽग्निरुचीनि रेजुस्
ताम्रोत्पलान्याकुलषट्पदानि ॥ २ ॥

तरङ्गेत्यादि–तरङ्गसङ्गात् सलिलोर्मिसम्पर्काच्चपलैः चञ्चलैः पलाशैः पत्रैः ज्वालाश्रियं सातिशयां दधन्ति। सधूमदीप्ताग्निरुचीनि सधूमदीप्ताग्नेरिव रुचिर्येषां रक्तोत्पलानां तानि रेजुः दीप्यन्ते स्म। राजेर्लिटि '२३५४। फणां च सप्तानाम्। ६। ४। १२५।' इति एत्वाभ्यासलोपौ। आकुलाः इतस्ततो यायिनः षट्पदा येष्विति। चलितपत्राणामग्निशिखातुल्यत्वात् षट्पदानां च धूमतुल्यत्वात् सधूमदीप्ताग्निरुचीनीत्युक्तम् ॥

३०–बिम्बाऽऽगतैस् तीरवनैः समृद्धिं
निजां विलोक्याऽपहृतां पयोभिः ॥
कूलानि साऽऽमर्षतयेव तेनुः
सरोजलक्ष्मीं स्थलपद्महासैः ॥ ३ ॥

बिम्बेत्यादि–बिम्बं प्रतिबिम्बं तेनागतैर्निपतितैरिति। तृतीयेति योगविभागात् समासः। तीरवनैः कुसुमितैरित्यर्थात् तैः करणभूतैः। पयोभिः कर्तृभिः समृद्धिं विभूतिम् निजामात्मीयां अपहृतां विलोक्य कूलानि कर्तृभूतानि सामर्षतयेव साक्षमतयेव सरो-

जलक्ष्मीं कमलशोभां पयःसम्बन्धिनीं तेनुः विस्तारितवन्ति। '२२६०। अत एकहल्मध्ये-।६।४।१२०।' इत्यादिना एत्वाभ्यासलोपौ। कूले सरोजासम्भव इति चेदाह—स्थलपद्महासैरिति स्थलकमलविकाशैरित्यर्थः॥

३१–निशातुषारैर् नयनाऽम्बुकल्पैः
पत्राऽन्तपर्यागलदच्छबिन्दुः॥
उपारुरोदेव नदत्पतङ्गः
कुमुद्वतीं तीरतरुर् दिनाऽऽदौ॥ ४॥

निशेत्यादि—निशायां तुषारैः हिमैः। नयनाम्बुकल्पैः अश्रुतुल्यैः। नयनानुकारिषु पत्रेषु स्थितत्वात्। तैर्हेतुभूतैः पत्रान्तपर्यागलदच्छबिन्दुः। पत्रान्तात्पर्यागलन्तः अच्छास्तुषारबिन्दवो यस्य तीरतरोः। स दिनादौ दिनारम्भे कुमुद्वतीमुपारुरोदेव आक्रन्दितवानिव भाति शशिवियोगादीदृशी त्वं भूतासीति। रोदनक्रियया आक्रन्दनविशिष्टया कुमुद्वत्या ईप्सिततमत्वात् रुदिः सकर्मकः। तदाक्रन्दनं योजयन्नाह—नदत्पतङ्ग इति कूजत्पक्षीत्यर्थः। 'पतेरङ्गच् पक्षिणि' इत्यौणादिकः। कुमुद्वती '१३०६। कुमुदनड-।४।२।८७।' इत्यादिना ड्मतुप्। '१८६८। झयः।८।२।१०।' इति वत्वम्। उगित्त्वात् ङीप्॥

३२–वनानि तोयानि च नेत्रकल्पैः
पुष्पैः सरोजैश्च् च निलीनभृङ्गैः॥

१–'१२२५। पतङ्गौ पक्षिसूर्यौ च,।' इति ना० अ०॥

परस्परां विस्मयवन्ति लक्ष्मी-
मालोकयाञ्चक्रुरिवाऽऽदरेण ॥ ५ ॥

वनानीत्यादि–वनानि पुष्पैर्निलीनभृङ्गैः स्थितभ्रमरैः । लीयतेः स्वादय–'३०१६। ओदितः ।८।२।४५।' इति निष्ठानत्वं । नेत्रकल्पैः नेत्रतुल्यैः । तोयानि च सरोजैः निलीनभृङ्गैर्नेत्रकल्पैः । विस्मयवन्ति जातविस्मयानि । परस्परामन्योन्यस्य लक्ष्मीं शोभाम् आलोकयाञ्चक्रुरिव । आदरेण तात्पर्य्येण ॥

३३–दत्ताऽवधानं मधुलेहिगीतौ
प्रशान्तचेष्टं हरिणं जिघांसुः ॥
आकर्णयन्नुत्सुक-हंस-नादान्
लक्ष्ये समाधिं न दधे मृगावित् ॥ ६ ॥

दत्तेत्यादि–मधुलेहिगीताविति मधु लेढुं शीलमेषामिति णिनिः । मधुलेहगीताविति पाठान्तरं तत्र लिहन्तीति लेहाः पचाद्यच् । मधुनो लेहा इति षष्ठीसमासः । मधु लिहन्तीति वा कर्मण्यण् । दत्तावधानं दत्तमानसं हरिणं प्रशान्तचेष्टं जिघांसुः हन्तुमिच्छुरपि मृगावित् व्याधः । मृगान्विध्यतीति क्विप् । '२४१२। ग्रहि ज्या-।६।१।१६।' इत्यादिना सम्प्रसारणम् । '१०३७ नहि वृति-।६।३।११६।' इत्यादिना दीर्घः । लक्ष्ये वेध्ये समाधिं चित्तैकाग्रतां न दधे न धारितवान् । ञित्त्वात्तङ् । लिटः क्त्वे आतो लोपः । उत्सुकानां हंसानां नादानाकर्णयन् शृण्वन् तत्राभिरतचित्तक-

त्वात् । वर्तमानकालो भूतेनाभिसम्बध्यमानः साधुः । '२८२४ । धातुसम्बन्धे प्रत्ययाः ।३।४।१। इति च । आकर्णयन्निति 'प्रातिपदिकाद्धात्वर्थे बहुलम्' इति णिच् ।'३१०३। लक्षणहेत्वोः-।३।२।१२६।' इति शतृप्रत्ययः॥

३४–गिरेर् नितम्बे मरुता विभिन्नं
तोयाऽवशेषेण हिमाऽऽभमभ्रम् ॥
सरिन्मुखाऽभ्युच्चयमादधानं
शैलाऽधिपस्याऽनुचकार लक्ष्मीम् ॥ ७ ॥

गिरेरित्यादि—गिरेः कस्यचित् नितम्बे मध्यभागे स्थितमभ्रं कर्तृ, मरुता विभिन्नं विह्वलीकृतं तोयावशेषेण पयसोऽवशिष्टतया हिमाभं हिमसदृशं सरिन्मुखानां गिरिनदीनिर्गमाणामभ्युच्चयं वृद्धिम् आदधानं कुर्वाणं शैलाधिपस्य हिमवतः लक्ष्मीं शोभामनुचकार अनुकृतवत् ॥

३५–गर्जन् हरिः साऽम्भसि शैल-कुञ्जे
प्रतिध्वनीनात्म-कृतान् निशम्य ॥
क्रमं बबन्ध क्रमितुं स-कोपः
प्रतर्कयन्नन्य-मृगेन्द्र-नादान् ॥ ८ ॥

गर्जन्नित्यादि–हरिः सिंहः गर्जन् शब्दं कुर्वन् । क शैलनिकुञ्जे गिरेर्गहने । साम्भसि ससलिले । ए-

१—'९४। अभ्रं मेघो वारिवाहस्तनयित्नुर् बलाहकः । धाराधरो जलधरस् तडित्वान् वारिदो ऽम्बुभृत् ॥' इति ना० अ० ।
२–'१३८३ । यमाऽनिलेन्द्रचन्द्राऽर्कविष्णुसिंहांऽशु-वाजिषु ।

वंविधे प्रदेशे प्रतिध्वनीन् प्रतिशब्दान् आत्मकृतान् निशम्य श्रुत्वा सरोषः सकोपः कर्म बबन्ध, क्रमितुमुत्पतितुं यत् सामर्थ्यं तच्चकारेत्यर्थः। अनेकार्थत्वाद्धातूनां बन्धिरत्र करणे वर्तते। किमिति प्रतर्कयन्नन्यमृगेन्द्रनादान् ॥

इदानीं रामं व्यापारेण वर्णयन्नाह—

३६–अदृक्षताऽम्भांसि नवोत्पलानि,
रुतानि चाऽश्रोषत षट्-पदानाम्, ॥
आघ्रायिवान् गन्ध-वहः सु-गन्धस्,
तेनाऽरविन्द-व्यतिषङ्ग-वांश्च ॥ ६ ॥

अदृक्षतेत्यादि–नवान्युत्पलानि येष्वम्भस्सु जलेषु तानि रामेणादृक्षत दृष्टानि। दृशेः कर्मणि लुङ्। '२३३६। शल इगुपधा-। ३। १। ४५।' इति प्राप्तस्य क्सादेशस्य '२४०७। न दृशः-। ३। १। ४७।' इति प्रतिषेधात् '२२६६। इरितो वा-। ३। १। ५७।' इति सिजेव भवति। तेन विकल्पेनाङो विधीयमानत्वात् '२३००। लिङ्सिचा—। १। २। ११।' इति कित्वे

शुकाऽहिकपिभेकेषु हरिर्ना, कपिले त्रिषु॥' १–'१९८ । कोलाहलः कलकलस्, तिरश्चां वाशितं रुतम्,॥' २–'५४९ । मधुव्रतो मधुकरो मधुलिण्-मधुपाऽलिनः । द्विरेफ-पुष्पलिट्-भृंग-षट्पद-भ्रमराऽलयः ॥' २–'६९ । श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः । पृषदश्वो गन्धवहो गन्धवाहाऽनिलाऽऽशुगाः ॥' इति सर्वत्र ना०अ० ।

गुणाभावः ॥ षट्पदानां रुतानि अश्रोषत श्रुतानि। शृणोतेः कर्मणि लुङ् ॥ वहतीति वहः पचाद्यच्। गन्धस्य वह इति कृद्योगे षष्ठी समस्यते । गन्धवहो वायुराघ्रायि आघ्रातः। कर्मणि लुङ्। अरविन्देन पद्मेन व्यतिषङ्गः संपर्कः सोऽस्ति यस्य वायोः सः। वातीति वान् वातेः शतृप्रत्ययः। सुगन्धः शोभनो गन्धो यस्य सः अरविन्दव्यतिषङ्गवत्त्वात्। '८७४। गन्धस्येदुत्-पूति-सु-सुरभि-भ्यः। ५। ४। १३५।' इतीकारः समासान्तो न भवति। गन्धस्येत्वे तदेकान्तग्रहणमिति वचनात् 'सुगन्ध आपणिक' इति यथा।

३७–लताऽलुपोलं कुसुमान्यगृह्णात्,
स, न्यवस्कन्दमुपास्पृशच्च च ॥
कुतूहलाच्, चारु-शिलोपवेशं
काकुत्स्थ ईषत् स्मयमान आस्त ॥ १० ॥

लतेत्यादि– '३३७८। विशि-पति-पदि-स्कन्दां व्याप्यमानासेव्यमानयोः। ३। ४। ५६।' इति द्वितीयान्त उपपदे णमुल्विधीयते। तत्र व्याप्यमाने द्रव्यवचनस्य आसेव्यमाने च क्रियावचनस्य '३१३७।

१–'अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वा (त्वा)।३।४।१८॥३३१६।
समान-कर्तृकयोः पूर्व-काले — ।३।४।२१॥३३२०।
आभीक्ष्ण्ये णमुल् (अम्) च — ।३।४।२२॥३३४३।
समासे ऽनञ्-पूर्वे क्त्वो ल्यप् (य) ।७।१।३७॥३३३२।'
इति सर्वत्राऽष्टाध्याय्यां पाणिनिः, वै० भ० च।

नित्यवीप्सयोः '। ८।१।४।' इति द्विर्वचनं विधीयते। अत्र तु समासेनैवोक्तत्वात् नोपयुज्यत इति स्थितम्। स काकुत्स्थो रामो गच्छन् लतां लतामनुपात्य कुसुमान्यगृह्णात् गृहीतवान्। लतामनुपात्यानुपात्य च। '७८४। तृतीयाप्रभृतीन्यन्यतरस्याम्। २। २। २१।' इति समासः। ग्रहेर्लङ्। श्नाप्रत्ययस्य, अपिदिति ङित्वे '२४१२। ग्रहि-ज्या-। ६। १। १६।' इत्यादिना सम्प्रसारणम्॥ नद्यवस्कन्दमिति नदीं नदीम् अवस्कन्द्य सर्वां नदीमवस्कन्द्य ढौकित्वा नदीं वा अवस्कन्द्यावस्कन्द्य, उपास्पृशत्, आचमनं कृतवान्। कुतूहलादिति सर्वत्र योज्यम्॥ चारुशिलोपवेशमिति चारुशिलाः चारुशिला उपविश्य, चारुशिला उपविश्योपविश्य वा आस्त आसितवान्। आसेर्लङि रूपम्। ईषत् स्मयमानः ईषद्धसन्॥

३८–तिग्मांशु-रश्मिच्छुरितान्यदूरात्
प्राञ्चि प्रभाते सलिलान्यपश्यत्॥
गभस्तिधाराभिरिव द्रुतानि
तेजांसि भानोर्भुवि संभृतानि॥ ११॥

तिग्मांश्वित्यादि–अदूरात्समीपे सलिलान्यपश्यत्। दृशोर्लङि '२३६०। पा-घ्रा। ७। ३। ७८।' इति पश्यादेशः। तिग्मांशोरादित्यस्य रश्मिभिः छुरितानि रञ्जितानि। तुक्। प्राञ्चि पूर्वस्यां दिशि अवस्थितानि। प्रपूर्वादञ्चतेः '३७३। ऋत्विग्-। ३। २। ५९।' इत्यादिना क्विप्। अनुषङ्गलोपः। शिः। नपुंसक-

स्य नुम् । भानोरिव तेजांसि भुवि संभृतानि पि-
ण्डीकृतानि । गभस्तिभिः रश्मिभिः धाराभिरिव
द्रुतानि गलितानि । धारा प्रपात इति भिदादिपाठा-
द्द्रष्टव्यम् ॥

३९–दिग्-व्यापिनीर्लोचन-लोभनीया,
मृजाऽन्वयाः स्नेहमिव स्रवन्तीः ॥
ऋज्वाऽयताः शस्यविशेष-पङ्क्तीस्
तुतोष पश्यन् वितृणाऽन्तरालाः ॥ १२ ॥

दिग्व्यापीत्यादि–शस्यविशेषाणां शाल्यादीनां
पङ्क्तीः पश्यंस्तुतोष तुष्टवान् । दिग्व्यापिनीः सर्व-
दिग्व्यापनशीलाः । लोभयन्तीति लोभनीयाः । बहु-
लवचनात्कर्तर्यनीयः । लोचनानां लोभनीया इति ष-
ष्ठीसमासः । मार्जनं मृजा शुद्धिः । '३२८१ । षिद्भि-
दादिभ्योऽङ् । ३ । ३ । १०४ ।' तया, अन्वयोऽनुगमो
यासां । शुद्ध्यनुगता इत्यर्थः । ततः स्नेहमिव स्रवन्तीः
ऋजवश्च ता आयताश्च । वितृणान्तरालाः । उत्पाटि-
तानि तृणानि अन्तराले मध्यभागे यासां ताः ॥

४०–वियोग-दुःखाऽनुभवाऽनभिज्ञैः
काले नृपांऽशं विहितं ददद्भिः ॥
आहार्य-शोभा-रहितैरमायै-
रैक्षिष्ट पुम्भिः प्रचितान् स गोष्ठान् ॥ १३ ॥

वियोगेत्यादि—पुम्भिः गोपैः प्रचितान् व्याप्तान्
गोष्ठान् गावस्तिष्ठन्ति येष्विति '२९१६ । सुपि स्थः

३।२।४।' इति कः। '२६१८। अम्बाम्ब। ८।३।६७।' इत्यादिना मूर्द्धन्यः। तान् स राम ऐक्षिष्ट दृष्टवान्। अनुदात्तत्वात्तङ्। इट्। वियोगदुःखस्य योऽनुभवः। योऽनुभवनं तस्यानभिज्ञैः तेषां पुत्रदारैः सहैव सर्वत्र गमनात्। एतावता कालेन एतावद्दयमिति विहितं कृतम्। दधाल्लेहिः। नृपांशं करं ददद्भिः। आहार्या कटकादिभिः आहरणीया या शोभा दीप्तिः तया रहितैः। अलायैः ऋजुभिः। आहार्येति '२८७२। ऋ-हलोर्ण्यत्। ३। १। १२४।' शोभतीति शोभा पचाद्यच्। '३२८४। ण्यासश्रन्थो युच्। ३। ३। १०७।' इति युच् न भवति तस्य स्त्रीलिङ्गे भावे अकर्त्तरि च कारके विधानात्। नन्द्यादिपाठात् ल्युर्न भवति तस्य '२८३० वाऽसरूपोऽस्त्रियाम्। ३। १। ९४।' इति विकल्पितत्वात्। अथवा शोभनं शोभा स्त्रीलिङ्गे भावे घञ्। '२८४१।' कृत्य-ल्युटो बहुलम्। ३। ३। ११३। इति बहुलवचनादन्येऽपि कृतः प्राप्तमपि स्वाभिधेयं व्यभिचरन्ति ॥

४१—विचित्रमुच्चैः प्लवमानमारात्,
कुतूहलं त्रस्नु ततान तस्य॥
मेधाऽत्ययोपात्त-वनोपशोभं
कदम्बकं वातमजं मृगाणाम् ॥ १४ ॥

विचित्रमित्यादि—मृगाणां कदम्बकं वृन्दं तस्य रामस्य कौतूहलं ततान विस्तृतवत्। विचित्रम् कृष्णश्वेतत्वात्। उच्चैः प्लवमानम् ऊर्ध्वं जिहानम्। आरात्

समीपे। त्रस्नु त्रसनशीलम्। '३१२०। त्रसि-गृधि।३।२।१४०।' इत्यादिना क्नुः। संघात्ययेन मेघापगमेन उपात्तवनोपशोभम्। उपात्तं गृहीतं वनम् उपशोभा च येनेति व्यधिकरणबहुव्रीहिः। वातमजति वातमजम्। वाताभिमुखं गच्छतीत्यर्थः। 'वात-शुनी तिल शर्धेषु—' इति खश्। '२९४२। अरुर्द्विष—।६।३।६७।' इति मुम्॥

४२—सिताऽरविन्दप्रचयेषु लीनाः
संसक्त-फेणेषु च सैकतेषु॥
कुन्दाऽवदाताः कलहंस-मालाः
प्रतीयिरे श्रोत्र-सुखैर् निनादैः॥ १५॥

सितेत्यादि—सितारविन्दानां प्रचयेषु समूहेषु '३२३१। एरच्। ३।३।५६।'। '३२१४। सङ्घे चानौत्तराधर्ये। ३।३।४२।' इति घञचौ न भवतः प्राणिषु सङ्घशब्दस्य रूढत्वात्। लीनाः कलहंसमालाः। तथा संसक्तफेणेषु च सैकतेषु पुलिनेषु लीनाः। सिकता येषु विद्यन्त इति। '१९१२। दृशे लुबिलचौ च।५।२।१०५।' इति चकारादण्। कुन्दावदाताः कुन्दमिवावदाताः शुक्लाः। '७३४। उपमानानि—।२।१।२२।' इत्यादिना समासः। प्रतीयिरे ज्ञाताः। तेन रामेणेति विभक्तिविपरिणामेन सम्बन्धः। कर्मणि लिट्। '२४५५। इणो यण्।६।४।८१।'। '२२४३। द्विर्वचनेऽचि।१।१।५९।' इति स्थानिवद्भावाद्द्विर्वचनम्। श्रोत्रसुखैर्म-

धुरैर्निनादैः करणभूतैः । '३२४१। नौ गद-।३।३।६४।' इत्यादिना घञ् ॥

शरद्वर्णनमुपसंहरन्नाह—

४३-न तज् जलं, यन् न सुचारुपङ्कजं;
न पङ्कजं तद्, यदलीनषट्पदम् ॥
न षट्पदोऽसौ न जुगुञ्ज यः कलं;
न गुञ्जितं तन्, न जहार यन् मनः ॥[1] १६ ॥

न तज्जलमित्यादि—किम्बहुनोक्तेन सर्वथा न तज्जलं यत् सुचारुपङ्कजं न बभूव। पङ्कजमपि यदलीनषट्पदं तदपि न । असौ षट्पदोऽपि तथाविधो ना-

---

१—पद्येऽस्मिन्नेकावल्यलङ्कारः। तल्लक्षणं काव्यप्रकाशे भट्टमम्मटः—'स्थाप्यतेऽपोह्यते वाऽपि यथापूर्वं परंपरम् ॥ विशेषणतया वस्तु यत्र, सैकावली द्विधा ॥' इति । स्थापने यथा—'स पण्डितो, यः स्वहिताऽर्थदर्शी; हितं च तद्, यत्र पराऽनपक्रिया; ॥ परे च ते, ये श्रितसाधुभावाः; सा साधुता, यत्र चकास्त्युमाधवः ॥' अपोहने यथा—'निरत्ययं साम न दानवर्जितं, न भूरि दानं विरहय्य सत्क्रियाम् ॥ प्रवर्तते तस्य विशेषशालिनी गुणाऽनुरोधेन विना न सत्क्रिया ॥' इति श्रीभारवि-किराताऽर्जुनीये-१।१२। किं वा—'नाऽऽर्यः स, यो न स्वहितं समीक्षते; न तद् हितं, यन् न पराऽनुतोषणम् ॥ न ते परे, यैर् नहि साधुताश्रिता; न साधुता सा, नहि यत्र माधवः ॥'

भूत्। यः फलं मधुरं न जुगुञ्ज न गुञ्जितवान्। '२१२। गुजिँ अव्यक्ते शब्दे।'। २२६२। इदितो नुम् धातोः।७।१।५८।' इति नुमि लिटि रूपम्। गुञ्जितमपि तत् नैवासीत्। यन्मनो न जहार न हृतवत् रामस्य लोकस्य वा॥

४४–तं यायजूकाः सह भिक्षुमुख्यैस्
तपःकृशाः शान्त्युदकुम्भहस्ताः, ॥
यायावराः पुष्पफलेन चाऽन्ये
प्राणर्चुरच्यां जगदर्चनीयम्॥ १७॥

तमित्यादि—यायजूकाः, अत्यर्थं यजनशीलाः। '३१४६। यजजपदशां यङः।३।२।१६६।'इत्यूकः।२३०८। अतो लोपः।६।४।४८।'। '२६३१। यस्य हलः।६।४।४६॥' ते तपोवनस्थितास्तं राममागच्छन्तमानर्चुः सुष्ठु पूजितवन्तः। अर्चेर्लिटि द्विर्वचनम्। '२२४८। अत आदेः।७।४।७०।' इति दीर्घत्वम्। '२२८८। तस्मान्नुड् द्विहलः।७।४।७१।' इति नुट्। सह भिक्षुमुख्यैः। भिक्षणशीला भिक्षवः परिव्राजकाः। '३१४८। सनाशंसभिक्ष उः।३।२।१६८।' तेषां ये प्रधानास्तैः सह। तपःकृशाः तपसा दुर्बलाः। शान्त्यर्थमुदकं तेन पूर्णः कुम्भः। '६६७। एकहलादौ–।६।३।५६।' इत्यादिना, उदकस्य उदभावः। स हस्ते येषामिति बहुव्रीहिः।

१—'७१४। इज्याशीलो यायजूकः।' २—'७४९। भिक्षुः परिव्राट् कर्मन्दी पाराशर्यपि मस्करी॥,

परनिपातश्चात्र वाहिताग्न्यादिदर्शनात् । प्रहरणार्थ-भ्य इति वा । शान्त्युदकुम्भस्त्वहितनिवारणसाध-र्म्यात् उपचारेण प्रहरणम् । ते शिरःसूदकदानेन प्रा-णर्चुः । अन्ये मुनयो यायावरा एकत्रानियतनिलयाः । यातेर्यङन्तात् । '३१५६। यश्च यङः ।३।२।१७६।' इति वरच् । अतोलोपादि । पुष्पफलेन प्राणर्चुः । पुष्पाणि च फलानि चेति '९१०। जातिरप्राणिनाम् ।२।४।६।' इत्येकवद्भावः । अर्च्या अर्चनार्हाः । '२८२२। अर्हे कृ-त्य-।३।३।१६९।' अर्चनीयमित्यत्रापि । जगतां जग-द्भिर्वा, अर्चनीयम् । '६२६। कृत्यानां कर्तरि वा ।२।३। ७१।' । इति पक्षे षष्ठी । नतु '६२३। कर्तृकर्मणोः कृति ।२।३।६५।' इति षष्ठी ॥

वि ४५–विद्याभथैनं विजयां जयां च
रक्षोगणं क्षिप्नुमविक्षताऽऽत्मा ॥
अध्यापिपद् गाधिसुतो यथावन्
निघातयिष्यन् युधि यातुधानान् ॥ १८ ॥

विद्यामित्यादि—तपोवनं प्राप्तः गाधिसुतः एनं रामं । '३५१। द्वितीयाटौ-। २ ।४। ३४।' इत्येनादेशः। विद्यां नाम्ना विजयां जयां च । यथावत् यथाविधि। अध्यापिपत् पाठितवान् । '२६०१। णौ च संश्चङोः ।६।१।३१।' इति गाङभावपक्षे रूपम् । अधिपूर्वादिङो हेतुमण्णिचि '२६००। क्रीङ्जीनां णौ ।६।१।४८।' इत्या-

---

१—'१०७५। निराकरिष्णुः क्षिप्नुः स्यात् ।'

त्वम् । पुगादिविग्रयः । रक्षोगणाम् । क्षिप्रं प्रेरयिता-रम् । '३१२०। त्रसिगृधि ।३।२।१४०।' इत्यादिना क्नुः । '६२७। न लोका-।२।३।६६।' इति षष्ठीप्रतिषेधात् द्वितीयैव । अविक्षतात्मा रागादिभिरनभिभूतचित्तवृत्तिः। तस्य हि विद्या अमोघा भवति । संग्रामे युधि । यातुधानान् रक्षांसि । निघातयिष्यन् मारयिष्यन् । हन्तेर्हेतुमरिगाच् । घत्वं । लृट् लृटः सदादेशः ॥

४६-आयोधने स्थायुकमस्त्रजात-
मनोघमभ्यर्णमहाऽऽहवाय ॥
ददौ वधाय क्षणदाचराणां
तस्मै मुनिः श्रेयसि जागरूकः ॥ १६ ॥

आयोधन इत्यादि—स मुनिः तस्मै रामायास्त्रजातम्, अस्त्रसमूहं ददौ दत्तवान् । ददातेर्लिट् । णल् । '२३७१। आत औ णलः ।७।१।३४।, आयुध्यन्ते अस्मिन्निति आयोधनं संग्रामः । अधिकरणे ल्युट् । तत्र स्थायुकं स्थितिकरणशीलम् जयावहत्वात् । '३१३४। लषपत-।३।२।१५४।' इत्यादिना उकञ् । आतो युक् । अत एवामोघम् अवन्ध्यम् । अवृथामोक्षत्वात् । अभ्यर्णो निकटो महाहवो यस्य तस्मै । अभिपूर्वादर्देर्निष्ठायाम्, '३०६५। अभेश्चाविदूर्ये ।७।२।२५।' इतीट्प्रतिषेधः । '३०१६। रदाभ्याम्-।८।२।४२।' इति नत्वम् । अभ्यर्णः । आहव इति आहूयन्ते अस्मिन्युद्धायेति ह्वयतेराङ्पूर्वात् '३२५०। आङि युद्धे । ३ । ३ । ७३ ।'

इति सम्प्रसारणम् । अप्प्रत्ययः । गुणावादेशौ । वधाय क्षणदाचराणामिति क्षणदा रात्रिः तत्र चरन्तीति '२६३०। चरेष्टः ।३।२।१६।' । तत्र हि महाहवे रामो राक्षसान् हनिष्यतीति । '३२५३। हनश्च वधः ।३।३।७६।' इति वधादेशः । कृत्प्रयोगे क्षणदाचराणामिति कर्मणि षष्ठी । असि जागरूकः तत्कल्याणे सावधानः जागर्त्तरूकः ॥

४७-तं विप्रदर्शं कृतघातयत्ना

यान्तं वने रात्रिचरी डुढौके, ॥

जिघांसुवेदं धृतभासुराऽस्त्रस्

तां ताडकाऽऽख्यां निजघान रामः ॥ २० ॥

तमित्यादि—विद्यामस्त्रजातं चादाय यज्ञकर्मणि विघ्नोपशमनार्थं वने यान्तं रामम् रात्रिचरी राक्षसी ताडकाभिधाना डुढौके ढौकते स्म । ढौकतेरात्मनेपदिनो लिटि रूपम् । तां च रामो निजघान निहतवान् । विप्रदर्शं कृतघातयत्ना विप्रान् ब्राह्मणान् दृष्ट्वा कृतमारणाभियोगा रात्रिचरी । रामोऽपि जिघांसुवेदं धृतभासुरास्त्रः । जिघांसुं विदित्वा धृतं भासुरं भासनशीलम् अस्त्रं येनेति बहुव्रीहिः । विप्रदर्शं जिघांसुवेदमिति '३३५०। कर्मणि दृशिविदोः साकल्ये ।३।४।२९।' इति णमुल् ॥

४८-अथाऽऽलुंलोके हुतधूमकेतु-

शिखाऽञ्जनस्निग्धसमृद्धशाखम् ॥

१—'१०१। ढौकृ गत्यर्थः ।' २—'७९। लोकृ दर्शने ।'

तपोवनं प्राध्ययनाऽभिभूत-
समुच्चरच्चारुपतत्रिशिञ्जम् ॥ २१ ॥

अथेत्यादि—अथासौ रामो राक्षसीं हत्वा तपोवनम् आलुलोके दृष्टवान् । कथम्भूतम् । हुतधूमकेतुशिखाञ्जनस्निग्धसमृद्धशाखम् । हुतश्चासौ धूमकेतुरग्निश्च हुतधूमकेतुः। तस्य शिखाञ्जनेन स्निग्धाः समृद्धाश्च फलादिना शाखा यस्य तपोवनस्य । प्राध्ययनेन वेदपाठेन अभिभूता तिरस्कृता समुच्चरन्ती चार्वी शोभना पतत्रिणां पक्षिणां शिञ्जा ध्वनिर्यत्र । '१०६८ शिजिँ अव्यक्ते शब्दे ।' शिञ्जनं शिञ्जा '३२८०। गुरोश्च हलः ।३।३।१०३।' इत्यकारप्रत्ययः । पतन्तं त्रायन्त इति पतत्राणि पक्षाः । '२६१५। आतोऽनुपसर्गे कः ।३।२।३।' । तानि येषां सन्तीति पतत्रिणः । पतङ्गशिञ्जामिति पाठान्तरम् ॥

४६—क्षुद्रान् न जक्षुर्हरिणान् मृगेन्द्रा,
विशश्वसे पक्षि-गणैः समन्तात्, ॥

नन्नम्यमानाः फल-दित्सयेव
चकाशिरे तत्र लता विलोलाः ॥ २२ ॥

क्षुद्रानित्यादि—तत्र तस्मिंस्तपोवने तपोधनानां मित्रभावात् क्षुद्रानितरानपि हरिणान्मृगेन्द्राः सिंहाः न जक्षुः न बाधितवन्तः । क्षुद्यन्त इति क्षुद्राः । स्फायितञ्चीत्यादिना औणादिको रक् । '२४२४।

१—'६९४ । काशृँ दीप्तौ ।'

लिट्यन्यतरस्याम् । २ । ४ । ४० ।' इति अदेर्घस्लृ । '२३६३ । गम-हन-। ६ । ४ । ९८ ।' इत्यादिनोपधालोपः '१२१ । खरि च । ८ । ४ । ५५ ।' इति चर्त्वम् । '२४१० । शासि-वसि-। ८ । ३ । ६० ।' इत्यादिना षत्वम् । पक्षिगणैः समन्तात्सर्वत्र विरुद्धैरपि काकोलूकादिभिः परस्परं विशश्वसे विश्वस्तम् । भावे लिट् । लताश्च विलोलाश्चपलाश्चकाशिरे शोभन्ते स्म । फलदित्सयेव मुनिभ्यः फलं दातुमिच्छयेव नन्नम्यमानाः अत्यर्थं नमन्त्यः । दातुमिच्छा दित्सा । ददातेः सन् । '२६५३ । सनि मी-मा-।७ । ४ । ५४ ।' इत्यादिना इस् '२६२० । अत्र लोपोऽभ्यासस्य । ७ । ४ । ५८ ।' इति अभ्यासलोपश्च । '२३४२ । सः सि ।७।४।४९।' इत्यादिना सकारस्य तकारः ।' ३२७६ । अ प्रत्ययात् । ३ । ३ । १०२ ।' इत्यकारप्रत्ययः फलानां दित्सेति कर्मणि षष्ठीं विधाय कृद्योगे समासः । नन्नम्यमाना इति नमेर्यङि '२६४३ । नुगतोऽनुनासिकः-। ७ । ४ । ८५ ।' इति नुक् । यङन्ताच्छानच् । आने मुक् ॥]

५०—अपूपुजन् विष्टर-पाद्य माल्यै-
रातिथ्य-निष्णा वनवासि-मुख्याः, ॥

१—'१२७८ विष्टरो विटपी दर्भ-मुष्टिः पीठाऽऽद्यमासनम् ।' २—'७२८ । पाद्यं पादाय वारिणि ।' ३—'६९९ । माल्यं माला- स्रजौ मूर्ध्नि ।'

प्रत्यग्रहीष्टां मधुपर्क-मिश्रं
तावासनाऽऽदि क्षिति-पाल-पुत्रौ ॥ २३ ॥

अपूपुजन्नित्यादि—वनवासिमुख्याः महर्षयो विष्टरादिभिः अपूपुजन् पूजितवन्तः। तौ क्षितिपालपुत्रावित्यार्थात द्वितीयान्तेन योज्यम्। वनवासीति '९७६। शय-वास-। ६। ३। १८।' इत्यादिना विकल्पेन सप्तम्या अलुक्। पूजेः स्वार्थिकण्यन्तस्य णौ चङि ह्रस्वः। '२३१८। 'दीर्घो लघोः। ७।४।९४।' इति अभ्यासस्य दीर्घः। विष्टरमासनम्। ३२३३। वृक्षासनयोर्विष्टरः। ८। ३। ९३।' इति निपातनात्। पाद्यं पादार्थमुदकम्। '२०५३। पादार्घाभ्यां च। ५। ४।२५।' इति यत्। तदर्थत्वात्पञ्चावाभावः। माल्यानि कुसुमानि। मालायां साधूनि। '१६५०। तत्र साधुः। ४। ४। ९८।' इति यत्। आतिथ्यनिष्णाः। आतिथ्यर्थम् आतिथ्यम्। '२०६४। अतिथेर्ञ्यः। ५। ४। २६।' तत्र निष्णाः कुशलाः। '३०८२। नि-नदी-भ्यां स्नातेः कौशले। ८। ३। ८९।' इति षत्वम्। तौ च क्षितिपालपुत्रौ रामलक्ष्मणौ तदासनादि प्रत्यग्रहीष्टां प्रतिगृहीतवन्तौ। प्रतिपूर्वात् ग्रहेर्लुङ्। तसस्ताम्। '२५६२। ग्रहोऽलिटि-। ७। २। ३७।' इति दीर्घः। षत्वष्टुत्वे। मधुपर्कमिश्रम् मधुपर्केण सहेत्यर्थः॥

५१—दैत्याऽभिभूतस्य युवामवोढं
मग्नस्य दोर्भिर्भुवनस्य भारम्, ॥

१—'६४४। भुज-बाहू प्रवेष्टो दोः॥'

हवींषि संप्रत्यपि रक्षतं, तौ
तपोधनैरित्थमभाषिषाताम् ॥ २४ ॥

दैत्येत्यादि—दितेरपत्यानि दैत्याः । '१०७७ । दित्यदित्या—। ४ । १ । ८५ ।' इत्यादिना ण्यः । तैरभिभूतस्य मग्नस्य शरणस्य भुवनस्य भारमितिकर्त्तव्यतालक्षणं दोर्भिर्भुजैः युवामवोढम् ऊढवन्तौ । नरनारायणौ युवामित्युक्तौ । त्वं च त्वं चेति एकशेषः । अवोढमिति वहेर्लुङ् । थसस्तम् । हलन्तलक्षणा वृद्धिः । सिज्लोपः । '२३५७ । सहि-वहोः । ६ । ३ । ११२ ।' इत्योत्वम् । ढत्वष्टुत्वढलोपाः । दोरिति दमेर्डोसित्यौणादिको डोस् । हवींषि होतव्यानि । सम्प्रत्यपि रक्षतम् । अर्चिरुचिहुसृपिच्छादिच्छर्दिभ्य इसिरित्यौणादिक इसिः । राक्षसैरुपहन्यमानानि रक्षतम् । प्रार्थनायां लोट् । शप् । थसस्तम् । इत्थमिति '१९६५ । इदमस्थमुः । ५ । ३ । २४ ।' अनेनोक्तप्रकारेण । तपोधनैस्तप एव धनं येषामिति । अभाषिषाताम् अभिहितौ । भाषतेः कर्मणि लुङ् । सिजिटौ ॥

५२—तान् प्रत्यवादीदथ राघवोऽपि—,
यथेप्सितं प्रस्तुत कर्म धर्म्यम् ॥
तपोमरुद्भिर् भवतां शराऽग्निः
संधुक्ष्यतां नोऽरिसमिन्धनेषु ॥[1] २५ ॥

१—पद्येऽस्मिन् रूपकाऽलङ्कारः । तल्लक्षणं का० प्र० भ० मम्मटः—'तद् रूपकमभेदो य उपमानोपमेययोः ॥' इति । यथा-

तानित्यादि—अथैतस्मिन् प्रस्तावे राघवोऽपि रघुसुतः तान्ब्रुवीत् प्रत्यवादीत्। '२२६७। वदव्रज- ।७।२।३।' इत्यादिना वृद्धिः॥ यथेप्सितं यथाभि- मतम्। आप्नोतेः '२६१९। आप्ज्ञप्यृधामीत्।७।४। ५५।' इतीत्वम् अभ्यासलोपश्च। सन्नन्तात्कर्मणि निष्ठा। धर्मादनपेतं धर्म्यम् यागादि कर्म। प्रस्तुत प्रा- रभध्वम्। प्रपूर्वः स्तौतिः प्रारम्भे वर्तते। तस्मान्निम- न्त्रणे नियोगकरणे लोट्। थस्य तः। शपो लुक्॥ त- पांसि मरुत इव तपोमरुद्भिः। भवतां तपोमरुद्भिर्नो- ऽस्माकम्। '४०५। बहुवचनस्य वस्नसौ।८।१।२१।' इति नसादेशः। शराग्निः शरोऽग्निरिव। संधु- क्ष्यतां दीप्यतां। '६४४। धुक्ष, धिक्ष सन्दीपनक्लेदन- जीवनेषु।' तस्मात्कर्मणि लोट्। अरिसमिन्धनेषु अ- रिकाष्ठेषु। समिध्यते एभिरिति समिन्धनानि। करणे ल्युट्। अरयः समिन्धनानीव॥

५३—प्रतुष्टुवुः कर्म ततः प्रक्लृप्तस्
ते यज्ञियैर् द्रव्यगणैर् यथावत्॥
दाक्षिण्ययादिष्टं कृतमार्त्विजीनैस्
तद् यातुधानैश् चिचिते प्रसर्पत्॥ २६॥

—'एष मनः-स्वैरपशुर् धावति परकनककामिनीनिकटम्॥ त- स्माद् विवेकपाशैः कण्ठे वैराग्यकाष्ठमावध्यम्॥' किं वा—दुष्य- न्तसद्मपद्मं सा स्त्रीश्रीः कण्वभानुशिष्यकरैः॥ नीता ससुतसुगन्धा सद्- धर्मनयाऽम्बुपूर्णपुरसरासि॥' इति स्वकृतसंस्कृतभाषान्तरपद्यमाला- याम्।

प्रतुष्टुवुरित्यादि--ततो रामवचनादनन्तरं तपोधनाः कर्म यागक्रियां प्रतुष्टुवुः । यथावत् यथाविधि प्रारब्धवन्तः । याज्ञियैः यज्ञकर्मार्हैः द्रव्यगणैः प्रक्लृप्तैः मिलितैः । '२३५० । कृपो रो लः । ८ । २ । १८ ।' दक्षिणामर्हन्तीति दक्षिणयाः महामुनयः । '१७३३ । कडङ्करदक्षिणाच्छ च । ५ । १ । ६९ ।' इति चकाराद्यत् । तैर्दिष्टमुक्तम् । कृतमार्त्विजीनैः । ऋत्विक्कर्मार्हैरनुष्ठितम् । ऋत्विजश्च ब्रह्मादयः षोडश पठिताः । तच्च कर्म प्रसर्पत् वृद्धिं गच्छत् । यातुधानैः राक्षसैः चिचिते ज्ञातम् । '३९ चिती संज्ञाने' इत्यस्मात् कर्मणि लिट् । यज्ञियैरार्त्विजीनैरिति '१७३५ । यज्ञर्त्विग्भ्यां घखञौ । ५ । १ । ७१ ।' इति तत्कर्मार्हतीति ॥

५४-आपिङ्गरूक्षोर्ध्वशिरस्यबालैः
शिरालजङ्घैर् गिरिकूटदघ्नैः ॥
ततः क्षपाऽटैः पृथुपिङ्गलाऽक्षैः
खं प्रावृषेण्यैरिव चाऽऽनशेऽब्दैः ॥ २७ ॥

आपिङ्गेत्यादि--ततः कर्मप्रवर्तनादनन्तरम् । क्षपाटैः निशाचरैः । अटन्तीत्यटाः । पचाद्यच् । क्षपायामटा इति । सप्तमीति योगविभागात् समासः । खमाकाशमानशे व्याप्तम् । अश्नोतेः कर्मणि लिट् । '२५३३ । अश्नोतेश्च । ७ । ४ । ७२ । इति नुट् ॥ शि-

१—'१४३४ । रूक्षस् त्वप्रेम्ण्य चिक्कणे ।' इति ना० अ० । '२०५६ । रूक्ष पारुष्ये ।' इति धा० पा० ।

रसि जाताः शिरस्याः । '१६६६ । शरीरावयवाद्यत् । ५ । १ । ६ ।' आपिङ्गा आ समन्तात् पिङ्गा विद्युदिव । रूक्षाः अस्निग्धाः ऊर्ध्वशिरस्या बाला येषां तैः । अन्योऽपि शिरस्यो भवति इति बालग्रहणम् । अमङ्गलबाला इत्यर्थः । शिराः सन्ति यासामिति '१६०३ । प्राणिस्थादातो लजन्यतरस्याम् । ५ । २ । ६६ ।' इति लच् । शिराला जङ्घा येषां तैः । गिरिकूटदघ्नैर्गिरिकूटप्रमाणैः । '१८३८ । प्रमाणे द्वयसच्- । ५ । २ । ३७ ।' इति दघ्नच् । पृथूनि विस्तीर्णानि पिङ्गलानि चाक्षीणि येषां तैः । '८५२ । बहुव्रीहौ सक्थ्यक्ष्णोः- । ५ । ४ । ११३ ।' इति षच् । प्रावृषेण्यैरिवेति '१३८८ । प्रावृष एण्यः । ४ । ३ । १७ ।' अब्दैर्मेघैः कृष्णसाधर्म्यात् । अपो ददतीति अब्दाः । चकारः पादपूरणार्थः ॥

५५—अधिज्यचापः स्थिरबाहुमुष्टि-
रुदञ्चिताऽक्षोऽञ्चितदक्षिणोरुः ॥
तान् लक्ष्मणः सन्नतवामजङ्घो
जघान शुद्धेषुरमन्दकर्षी ॥ २८ ॥

अधीत्यादि—तान् क्षपाटान् गगनस्थान् लक्ष्मणो जघान हतवान् । कीदृशः अधिज्यचापः । अध्यारूढा उत्कलिता ज्या गुणो यस्य चापस्य तदधिज्यम् । प्रादिभ्यो धातुजस्येति समासः । अधिज्यं चापं यस्य लक्ष्मणस्य । स्थिरो निश्चलो बाहुर्मुष्टिश्च यस्य । उदञ्चि-

ते उत्क्षिप्ते अक्षिणी येन स उदक्षिप्ताक्षः । आकाशस्थापितदृष्टिरित्यर्थः । आञ्चितः सङ्कोचितो दक्षिणोरुर्येन सोऽञ्चितदक्षिणोरुः । अञ्चेः पूजायामितीटोऽनुत्पन्नत्वात् गमनस्य रूपम् । नचात्र पूजा गम्यते किन्तु गतिविशेष एव । अनुषङ्गलोपोऽपि न भवति णिलोपस्य स्थानिवद्भावात् । समन्तात् नता वामजङ्घा यस्य स सन्नतवामजङ्घः । शुद्धेषुः निशितबाणः । अमन्दमत्यन्तं कर्तुं शीलमस्यासावमन्दकर्षी । कर्णान्ताकृष्टचाप इत्यर्थः ॥

५६-गाधेयदिष्टं विरसं रसन्तं
रामोऽपि मायाचणमस्त्रचुञ्चुः ॥
स्थास्नुं रणे स्मेर-मुखो जगाद
मारीचमुच्चैर्वचनं महाऽर्थम् ॥ २६ ॥

गाधेयेत्यादि--गाधेरपत्यं गाधेयो विश्वामित्रः । ढ्यच इत्यनुवर्तमाने '११२५ । इतश्चानिञः । ४ । १ । १२२ ।' इति ढक् । तेन दिष्टं कथितं मारीचं नाम राक्षसं रामो जगाद गदितवान् । रसन्तम् वदन्तम् । विरसमश्राव्यमिति क्रियाविशेषणम् । मायाचणं मायया वित्तम् । अस्त्रचुञ्चुः अस्त्रैः प्रतीतो रामः । '१८२७ । तेन वित्तश्चुञ्चुप्-चणपौ । ५ । २ । २६ ।' इति । स्थास्नुं रणे स्थितिशीलम् । तस्य सेनापतित्वात् । स्मेरमुखः चित्तस्याक्षोभादीषद्धसनशीलत्र-

---

१—'१११८। स्थास्नुः स्थिर-तरःस्थेयान् ।'

दनः । '३१४७। नमि-कम्पि । ३ । २ । १६७।' इत्यादिना रः। उच्चैस्तरां जगादेति क्रियाविशेषणम् । वचनं वक्ष्यमाणं सहार्थं प्रधानार्थम् । ब्रुविशासीत्यत्र ब्रुवीत्यर्थग्रहणाद् द्विकर्मकता । मारीचं वचनं च ॥

५७–आत्मम्-भरिस् त्वं पिशितैर्नराणां
फले-ग्रहीन् हंसि वनस्-पतीनाम्, ॥
शौवस्तिकत्वं विभवा न येषां
व्रजन्ति, तेषां दयसे न कस्मात् ॥ ३० ॥

आत्मेत्यादि—नराणां पिशितैर्मांसैः आत्मानं बिभर्षि पुष्णासि । नान्यदपि शरीरस्थितिहेतुर्भवतीति भावः । स त्वमात्मम्भरिः आत्मभरणाय फलानि गृह्णन्ति ये वनस्पतीनां तान् फलेग्रहीन् फलाशिनो मुनीन् हंसि मारयसि । शपो लुक् । '२९४०। फलेग्रहिरात्मम्भरिश्च । ३ । २ । २६।' इति निपातितौ। श्वो भवितारः शौवस्तिकाः । '१३८५ । श्वसस्तुट् च । ४ । ३ । १५ ।' इति ठञ् तुडागमश्च । द्वारादित्वादैजागमः । शौवस्तिकत्वं तद्येषां विभवा न व्रजन्ति तेषामश्वस्तनिकवृत्तीनां कस्मान्न दयसे न रक्षसि । '६१३ । अधीगर्थ-दयेशाम्–। २ । ३ । ५२ ।' इति कर्मणि षष्ठी ॥

१—'१०६६। उभौ त्वात्मम्-भरिः कुक्षिम्भरिः स्वोदर-पूरके ॥'
२—'३५४। वानस्पत्यः फलैः पुष्पात्, तैरपुष्पाद् वनस्पतिः, ॥ ओषध्यः फलपाकाऽन्ताः स्युरवन्ध्यःफलेग्रहिः ॥' इति सर्वत्र ना० अ० ॥

५८-अद्मो द्विजान्, देवयजीन् निहन्मः,
कुर्मः पुरं प्रेतनराऽधिवासम् ॥
धर्मो ह्ययं दाशरथे ! निजो नो,
नैवाऽध्यकारिष्महि वेदवृत्ते ॥ ३१ ॥

अद्म इत्यादि-राक्षसः प्राह । द्विजान् ब्राह्मण-क्षत्रियवैश्यान् अद्मो भक्षयामः । देवयजीन् देवान् यजन्ति आराधयन्ति ये तान्निहन्मः । 'अच इः' इत्यनुवर्तमाने खनीत्यादिषूच्यमानेष्वौणादिकेषु सूत्रेषु यद्यपि यजिर्न पठितस्तथापि यजेरिः 'प्रकृतेश्च तदूह्यम्' इति वचनात् । '६१७ । जासि निप्रहण-।२।३।५६।' इत्यत्र सङ्घातविगृहीतविपर्यस्तग्रहणात् षष्ठी प्राप्तापि न भवति । कर्मणः शेषत्वेनाविवक्षितत्वात् । पुरं नगरं प्रेतनराणां मृतनराणाम् । अधिवासमवस्थानं कुर्मः । नित्यहननेन श्मशानतुल्यमित्यर्थः । कस्मादेवमित्याह-धर्म इति । दशरथस्यापत्यं दाशरथिः । '१०९५' अत इञ् ।४।१।९५।' हे दाशरथे । हि यस्मादर्थे वर्तते । यस्मादयं धर्मः आचारः । निजो नित्यः । न इत्यस्माकम् । वेदविरुद्ध इति चेत्-नैवाध्यकारिष्महि वेदवृत्ते वेदविहितं वृत्तमिति मध्यमपदलोपी समासः । यद् ब्राह्मणानामुक्तमनुष्ठानं तत्र वयं नैवाधिकृता इत्यर्थः । अधिपूर्वात्करोतेः कर्मणि लुङ् । '२७५७ । स्यसिच्—६ । ४ । ६२ ।' इत्यादिना चिण्वदिट् ॥

१—१३४७ । धर्माः पुण्ययमन्यायस्वभावाऽऽचारसोमपाः ।' इति ना० अ० ।

५६–धर्मोऽस्ति सत्यं तव राक्षसाऽय-
मन्यो व्यतिस्ते तु ममाऽपि धर्मः, ॥
ब्रह्म-द्विषस् ते प्रणिहन्मि येन,
राजन्य-वृत्तिर्धृत-कार्मुकेषुः ॥ ३२ ॥

धर्म इत्यादि—रामः प्राह । हे राक्षस रक्ष एव राक्षसः । प्रज्ञादित्वादण् 'स्वार्थिका अतिवर्तन्ते' इति पुँल्लिङ्गता । तवायं पूर्वोक्तः पराभिद्रोहलक्षणो धर्मोऽस्तीति सत्यमेतत् । किन्तु ममापि रामस्य अन्यो धर्मोऽशिष्टनिग्रहलक्षणो व्यतिस्ते व्यतिभवते । इदमुक्तं भवति–यद्यप्येवंप्रकारस्त्वद्धर्मो भविष्यति तथापीदानीमेव या त्वद्धर्मेण विद्यमानतया निष्पाद्या सा अस्मद्धर्मेणैव निष्पादकत्वेन व्यतिस्ते । तत्रश्चान्यसम्बन्धिनीं क्रियामन्यः करोति इतरसम्बन्धिनीमितर इति धर्मव्यतिहारसम्भवात् । अस्तेः '२६८० । कर्म-व्यतिहारे । १ । ३ । १४ ।' तङ् । तथाहि यो यदवसरे यां कांचित् क्रियां करोति स तत्क्रियाकारीत्युपचाराल्लोक उच्यते । येन धर्मेण हेतुना ब्रह्मद्विषस्ते प्रणिहन्मि मारयामि स व्यतिस्ते इति योज्यम् । '२२८५ । नेर्गद-। ८ । ४ । १७ ।' इत्यादिना णत्वम् । ६१७ । जासि-नि-२ । ३ । ५६ ।' इत्यादिना कर्मणि षष्ठी । तथा कथं तव धर्म इति चेदाह–राजन्यवृत्तिरिति । क्षत्रियवृत्तिः । ततो राज्ञोऽपत्यम् ।

१—'१३४७ । धर्माः पुण्य-यम-न्याय-स्वभावाऽऽचार-सोमपाः ।' इति ना० अ० ॥

'११५३ । राजश्वशुराद्यत् । ४ । १ । १३७ ।' । '११५४ । ये च । ६ । ४ । १६८ ।' इति प्रकृतिभावः । धूतं कार्मुकम् इष्वस्त्रं च येन सः । यतः अहं राजन्यवृत्तिः ततोऽहं धूतकार्मुकेषुरिति । 'धृतकार्मुकेषु' इति पाठान्तरम् । क राजन्यवृत्तिः सायुधेष्वित्यर्थः ॥

९०–इत्थं प्रवादं युधि संप्रहारं
प्रचक्रतू राम-निशाविहारौ ॥
तृणाय मत्वा रघुनन्दनोऽथ
बाणेन रक्षः प्रधनान्निरास्थत् ॥ ३३ ॥

इत्थमित्यादि–इत्थम् अनेन प्रकारेण प्रवादः अन्योन्याभिघातो यत्र संप्रहारे तं संप्रहारं परस्पराभिभवलक्षणं प्रकृतवन्तौ । युधि रणभूमौ । युध्यन्ते अस्यामिति । सम्पदादित्वादधिकरणे क्विप् । रामनिशाविहारौ । रामो निशाविहारो निशाचरो मारीचश्चेत्यर्थः । निशायां विहारो यस्येति समासः । अथानन्तरं रघुनन्दनो रघुवंशस्य नन्दयिता रामो मारीचं बाणेन तत्सम्बन्धिनि सत्यपि तृणाय मत्वा तृणमिव अवमत्य । '५८४ । मन्यकर्मण्यनादरे । २ । ३ । १७ ।' इति चतुर्थी । तत्र प्रकृष्टकुत्सितग्रहणं कर्तव्यम् । इह मा भूत् । तृणं मत्वेति । प्रधनात् संग्रामात् निरास्थत् अपनीतवान् ॥

१—'८६९ । युद्धमायोधनं जन्यं प्रधनं प्रविदारणम् ॥ मृधमास्कन्दनं संख्यं समीकं साम्परायिकम् ॥' इति ना० अ० ।

६१–जग्मुः प्रसादं द्विज-मानसानि,
द्यौर्वर्षुका पुष्प-चयं बभूव ॥
निर्व्याजमिज्या ववृते वचश्च
भूयो बभाषे मुनिना कुमारः ॥ ३४ ॥

जग्मुरित्यादि—यागविघ्नकारिषु निरस्तेषु द्विजानां मानसानि मनांस्येव मानसानि '२१०६ । प्रज्ञादि–५ । ४ । ३८ ।' इत्यण् । प्रसादम् अव्याकुलत्वं जग्मुः गतानि । '२३६३ । गम-हन–६ । ४ । ९८ ।' इत्युपधालोपः । द्यौः पुष्पचयं वर्षुका वर्षणशीला बभूव भवति स्म । '३१३४ । लष-पत-पद–३ । २ । १५४ ।' इत्यादिना उकञ् । '६२७ । न लोका–२ । ३ । ६९ ।' इति षष्ठीप्रतिषेधः । निर्व्याजं निर्विघ्नम् । इज्या यागः । '३२७५ । व्रजयजोर्भावे–३ । ३ । ९८ ।' इति क्यप् । ववृते । वृतः लिट् ॥ भूयः पुनरपि मुनिना गाधेयेन । कुमारः रामः । अकृतदारकर्मत्वात् । वचो वक्ष्यमाणं बभाषे । कर्मणि लिट् । ब्रुवीत्यर्थग्रहणात् द्विकर्मकता वचः कुमारश्च ॥

६२–महीय्यमाना भवताऽतिमात्रं
सुराऽध्वरे घस्मर[2]-जित्वरेण[3] ॥
दिवोऽपि वज्राऽऽयुध-भूषणाया
ह्रीणीयते वीरवती न भूमिः ॥ ३५ ॥

१—'१२३६ । दन्तविप्राऽण्डजा द्विजाः ।' २—'१०६५ । भक्षको घस्मरोऽद्मरः ।' ३—'८४२ जेता जिष्णुश् च जित्वरः ।' इति सर्वत्र ना० अ० ॥

महीत्यादि–भवता भूमिः पृथिवी महीय्यमाना पूज्यमाना। अतिमात्रं सुष्ठु सम्यक् पालनाद्दिवोऽपि स्वर्गस्य न हृणीयते न लज्जते किंतु प्रतिस्पर्धत इति भावः। '२१३८। हृणी महीङ्' इति कण्ड्वादिपाठाद्यक्। ङित्वात्तङ्। अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवतीति महीयशब्दात्कर्मणि लकारः। शानच्। यक्। अतो लोपः। मुक्। महीय्यमानेति रूपम्। सुराध्वरे सुरानुद्दिश्य योऽध्वरो यज्ञः क्रियते तत्र। ये घस्मराः अदनशीला राक्षसाः। '३१४०। सृ-घस्यदः क्मरच्। ३। २। १६०।' तेषां जित्वरेण जयशीलेन भवता। '३१४३। इण्नशजि–३। २। १६३। इत्यादिना क्वरप्। वज्रायुधभूषणायाः। शक्र एवालङ्कारो यस्याः। दिवः। वीरवती त्वद्विधो वीरो यस्यां भूमाविति॥

संक्षेपेण स्तुतिमाह—

९३–बलिर् बबन्धे, जलधिर् ममन्थे,
जह्रेऽमृतं, दैत्यकुलं विजिग्ये,॥
कल्पाऽन्तदुःस्था वसुधा तथोहे
येनैष भारोऽतिगुरुर् न तस्य॥ ३६॥

बलिरित्यादि—येन भवता बलिर्बबन्धे बद्धः। जलधिर्ममन्थे मथितः। मन्दरं दोर्भिर्गृहीत्वा। '४३। मन्थ विलोडने।' इत्यस्य रूपम्। संयोगान्तत्वाल्लिटोऽकित्त्वे अनुनासिकलोपो न भवति। जह्रेऽमृतम्। स्त्रीरूपधारिणा। दैत्यकुलं विजिग्ये विजितमनेक-

धा । '२३३१ । सन्लिटोर्जेः ७ । ३ । ५७ ।' इति कुत्वम् । '२७२ । एरनेकाचः । ६ । ४ । ८२ ।' इति यणादेशः । तथा कल्पान्ते प्रलये दुःस्था दुःस्थिता वसुधा पृथिवी । ऊहे उद्धृता । वराहरूपिणा । वहेर्यजादित्वात् संप्रसारणम् । तस्य भवत एष भारो मुनिजनरक्षणम् अतिगुरुर्न भवति । सर्वत्र कर्मणि लिट् ॥

६४–इति ब्रुवाणो मधुरं हितं च
तमाञ्जिहन् मैथिलयज्ञभूमिम् ॥
रामं मुनिः प्रीतमना मखाऽन्ते
यशांसि राज्ञां निजिघृक्षयिष्यन् ॥ ३७ ॥

इतीत्यादि–इति यथोक्तप्रकारेण मधुरं श्रोत्रसुखं हितं च ब्रुवाणः अभिदधानः । '३१०३ । लक्षणहेत्वोः–। ३ । २ । १२६ ।' इति शानच् । मुनिः प्रीतमनाः मखान्ते यज्ञावसाने तं रामं मैथिलस्य यज्ञभूमिं आञ्जिहत् गमितवान् । मिथिलानां राजेति । '११८६ जनपदशब्दात् क्षत्रियादञ् । ४ । १ । १६८ ।' इत्यत्र तस्य राजन्यपत्यवदित्यतिदेशादञ् । '६७८ अहिँ गतौ ।' '२२६२ । इदितो नुम्–। ७ । १ । ५८ ।' प्रयोजकव्यापारे णिच् । लुङ् आट् चङि णिलोपः '२२४३ । द्विर्वचनेऽचि । १ । १ । ५९ ।' इति स्थानिवद्भावात् '२१७६ । अजादेर्द्वितीयस्य ६ । १ । २ ।' इति हिशब्दस्य द्विर्वचनम् । '२४४६ । न न्द्राः–। ६ । १ । ३ । इति नकारस्य प्रतिषेधः । अभ्यासकार्यम् । आञ्जिहदिति रूपम् । राज्ञां यशांसि निजिघृक्षयिष्यन्-

निग्रहीतुमभिभवितुमेषयिष्यन् । ग्रहेः सन् । '२६१० । सनि ग्रहगुहोश्च । ७ । २ । १२ ।' इति इट्प्रतिषेधः । द्विर्वचनादि । '२६०९ । रुदविद- १ । २ । ८ ।' इत्यादिना सनः कित्त्वम् । '२४१२ । ग्रहिज्या- । ६ । १ । १६ ।' इत्यादिना संप्रसारणम् । ढत्वभष्भावौ । गकारस्य घकारः । कत्वषत्वे । पश्चाण्णिच् । तदन्ताद्भविष्यत्सामान्यविवक्षायां लट् तेन भविष्यदनद्यतने लुट् न भवति ॥

९५–एतौ स्म मित्रावरुणौ किमेतौ,
किमश्विनौ सोमरसं पिपासू ॥
जनं समस्तं जनकाऽऽश्रमस्थं
रूपेण तावौजिहतां नृसिंहौ ॥ ३८ ॥

एतावित्यादि—एतौ तत्रागतौ नृसिंहौ नरौ सिंहाविव । जनकाश्रमस्थं जनं रूपेण स्वरूपतया औजिहतां वितर्कं कारितवन्तौ । सिंहाविव । '६९५ । ऊहँ वितर्के ।' इत्यस्माद्धातोः ण्यन्तात् कर्तुः क्रियाफलाविवक्षायां । '२५६४ । णिचश्च । १ । ३ । ७४ ।' इति तङ् न भवति । चङि णिलोपस्य स्थानिवद्भावात् । '२१७६ । अजादेर्द्वितीयस्य । ६ । १ । २ ।'

१—नृसिंहावित्युपमानपूर्वपदः कर्मधारयसमासस्तत्रोदाहरणं समासकुसुमावल्याम्—'रामोऽयं पुरुषव्याघ्रः संवृतः कपिकुञ्जरैः ॥ हनिष्यति बलाद् युद्धे रावणं राक्षसर्षभम् ॥ १७ ॥' 'स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः ॥ ११०५ । सिंहशार्दूलनागाऽऽद्याः पुंसि श्रेष्ठाऽर्थगोचराः ॥' इति ना. अ० ।

इति द्विर्वचनम् । ऊहमाह—मित्रावरुणौ आदित्य-वरुणौ । '६२२ । देवताद्वन्द्वे च । ६ । ३ । २६ ।' इत्या-नङ् । तयोर्महानुभावत्वात् सोमरसं पिपासू पातु-मिच्छू । '६२७ न लोका-। २ । ३ । ६६ ।' इति षष्ठी-प्रतिषेधः । एतावागतौ । आङ्पूर्वस्येणो निष्ठायां रू-पम् । किमश्विनौ अश्विनीकुमारौ सोमरसं पिपासू । एताविति । एवं जनम् औजिहताम् । सुशब्दपाठे एतौ सुमित्रेति पाठः । एतौ स्म मित्रेति स्मशब्दो निपातः पादपूरणार्थः ॥

६६–अजिग्रहत् तं जनको धनुस् तद्
येनाऽर्दिदद् दैत्यपुरं पिनाकी ॥
जिज्ञासमानो बलमस्य बाह्वोर्
हसन्नभाङ्क्षीद् रघुनन्दनस् तत् ॥ ३६ ॥

अजिग्रहदित्यादि–येन धनुषा दैत्यपुरं पिनाकी महादेव आर्दिदत् हिंसितवान् । अर्देः स्वार्थिकण्य-न्तात् चङि । '२१७६ । अजादेर्द्वितीयस्य । ६ । १ । २ ।' इति दिशब्दो द्विरुच्यते । रेफस्य प्रतिषेधः । तद्धनुः तं रामं जनकः अजिग्रहत् बोधितवान् । अनेन धनुषा त्रिपुरं दग्धमिति । ग्रहेर्हेतुमण्ण्यन्ताच्चङि णिलोपः । '२३१४ । णौ चङ् । ७ । ४ । १ ।' इति ह्रस्वः । सन्व-द्भावादित्वम् । ग्रहेश्च बुद्ध्यर्थत्वात् । '५४० । गतिबु-द्धि-। १ । ४ । ५२ ।' इत्यादिना रामस्य कर्मसंज्ञा । अस्य रामस्य बाह्वोर्भुजयोर्बलं जिज्ञासमानो जनकः ॥ एवंभूतं धनुः हसन् स्मयमानो रघुनन्दनो रामः अ-

भाङ्क्षीत् भग्नवान् । भञ्जेर्लुङि सिचि हलन्तलक्ष-
णा वृद्धिः । तत्र हि हल्ग्रहणं समुदायप्रतिपत्त्यर्थमि-
त्युक्तम् ॥

६७–ततो नदीष्णान् पथिकान् गिरिज्ञा-
नाह्वायकान् भूमि-पतेरयोध्याम् ॥
दित्सुः सुतां योधहरैस्तुरङ्गैर्
व्यसर्जयन् मैथिलमर्त्यमुख्यः ॥ ४० ॥

तत इत्यादि—धनुर्भङ्गादनन्तरं महानयमिति ज्ञात्वा जनकः सुतां दुहितरं दित्सुः दातुमिच्छुः । ददातेः । '२६२३ । सनि मी-मा–।७।४।५४।' इत्यादिना अच इस् । द्विर्वचनम् । '२६२० । अत्र लोप–।७।४।५८।' इत्यभ्यासलोपः । '२३२७ । सः सि–।७।४।७६।' इति तत्वम् । '३१४८ ।' सनाशंस-भिक्ष उः ।३।२।१६८।' भूमिपतेर्दशरथस्य आह्वायकान् आह्वयन्ति आकारयन्तीति कर्तरि ण्वुल् । '२७६१ । आतो युक्–।७।३।३३।' कृत्प्रयोगे भूमिपतेः कर्मणि षष्ठी । तान् अयोध्यां व्यसर्जयत् विसर्जितवान् । विपूर्वस्य सृजेर्हेतुमण्ण्यन्तस्य लङि रूपम् । गत्यर्थत्वात् द्विकर्मकता । नद्यां स्नान्तीति नदीष्णाः । '२९१६ । सुपि स्थः ।३।२।४।' इति योगविभागात्कः । '२३७२ । आतो लोपः–।६।४।६४।' । '३०८२ । नि-नदीभ्यां स्नातेः–।८।३।८९।' इति षत्वम् । नदीं तरितुं कुशलानित्यर्थः । पथिकान् पथि कुशलान् । '१८६३ । तत्र कुशलः पथः ।५।२।६३।' इति ठक् । गिरिज्ञान् । यथाप्रदेशं गिरिज्ञान् । '२८९७ ।

इगुपध-।३।१।१३५।' इत्यादिना कः। तुरङ्गैः अश्वैः करणभूतैः। युध्यन्त इति योधाः। पचाद्यच्। ताना-हर्तुं क्षमैः। '२६२४। वयसि च ।३।२।१०।' इत्यच्। 'ह-सिसृभ्रिण्वामिदमिलूपूधूर्विभ्यस्तन्' इत्यौणादिकस्तन्। म्रियन्ते प्राणिनोऽस्मिन्निति मर्त्यो भूर्लोकः। तत्र भवा मर्त्या मनुष्याः। दिगादेराकृतिगणत्वात् यत्। आकृतिगणत्वस्य लिङ्गं देवमनुष्यपुरुषपुरुमर्त्येभ्य इति निर्देशः। मुखमेव मुख्यः प्रधानम्। '२०५८। शाखा-दिभ्यो यत् ।५।३।१०३।' मर्त्यानां मुख्यो मर्त्यमुख्यः मैथिलश्चासौ मर्त्यमुख्यश्चेति विशेषणसमासः। जनक इत्यर्थः॥

६८-क्षिप्रं ततोऽध्वन्यतुरङ्गयायी
यविष्ठवद् वृद्धतमोऽपि राजा॥
आख्यायकेभ्यः श्रुतसूनुवृत्ति-
रग्लानयानो मिथिलामगच्छत्॥ ४१॥

क्षिप्रमित्यादि—आख्यान्ति कथयन्ति ये ते आ-ख्यायकास्तेभ्यः श्रुता सूनुवृत्तिर्येन स राजा दशरथः सूयत इति सूनुः पुत्रः। 'दाभाभ्यां नुः' इति वर्तमाने 'सुवः कित्' इत्यौणादिको नुप्रत्ययः। ततोऽनन्तरमेव क्षिप्रं शीघ्रम्। 'स्फायि-तञ्चि-' इत्यादिना रक्। क्रियाविशेषणं चैतत्। मिथिलामगच्छत्। भरतशत्रुघ्नाभ्यां सहेत्यर्थादनुषक्तव्यम्। गमेर्लङि'२४००। इषुगमियमां छः।७।३।७७।' अध्वानम् अलंगामिनो ये तुरङ्गा अश्वाः ते अध्वन्याः। अलंगामीत्यस्मि-

र्थे '१८१७। अध्वनो यत्-खौ। ५। २। १६।' इति यत्। '११५४। ये चाभावकर्मणोः। ६। ४। १६८।' इति प्रकृतिभावः। तैः साधु यातीति साधुकारिणि णिनिः। अध्वन्यतुरङ्गयायी। एवं च कृत्वा अग्लानयानः न विद्यते ग्लानं ग्लानिर्यस्मिन्याने तत् अग्लानं। अग्लानं यानं यस्य। तादृशैस्तुरङ्गैः सुखयानः। ग्लानेति भावे निष्ठा। ३०१७। संयोगादेरातः—। ८। २। ४३।' इति नत्वम्। वृद्धतमोऽपि यविष्ठवत्। युवशब्दस्येष्ठनि '२०१५। स्थूलदूर—। ६। ४। १५६।' इत्यादिना यणादिपरलोपः पूर्वस्य च गुणः। पश्चात् '१७७८। तेन तुल्यम्—।५। १। ११५।' इति वतिः॥

६६—वृन्दिष्ठमार्चीद् वसुधाऽधिपानां
तं प्रेष्ठमेतं गुरु-वद् गरिष्ठम्॥
सद्दङ् महान्तं सुकृताऽधिवासं
बंहिष्ठ-कीर्तिं यशसा वरिष्ठम्॥ ४२॥

वृन्दिष्ठमित्यादि—तं राजानमेतमायान्तं जनक आर्चीत् पूजितवान्। अर्चेर्लुङि रूपम्। वृन्दिष्ठं वृन्दारकतमम्। प्रशस्ततममित्यर्थः। केषां वसुधाधिपानां

१—'११५७। क्षेपिष्ठ-क्षोदिष्ठ-प्रेष्ठ-वरिष्ठ-स्थविष्ठ-बंहिष्ठाः॥ क्षिप्र-क्षुद्राऽभीप्सित-पृथु-पीवर-बहुल-प्रकर्षाऽर्थाः॥ ११५८ साधिष्ठ-द्राघिष्ठ-स्पेष्ठ-गरिष्ठ-ह्रसिष्ठ-वृन्दिष्ठाः॥ बाढ-व्यायत-बहु-गुरु-वामन-वृन्दारकाऽतिशये॥' इति ना० अ०।

पृथ्वीपतीनाम् । प्रेष्ठं प्रियतमम् । गुरुवत् गुरुणा तुल्यं वर्तमानं गारिष्ठम् गुरुतमम् । सदृक् समानान्ययोश्चेत्युपसंख्यानाद् दृशेः क्विप् । रूढिशब्दश्चायम् । नात्र दर्शनक्रिया विद्यते । अभिजनादिभिस्तुल्यो जनक इत्यर्थः । महान्तं महानुभावं सदृशां मध्ये महान्तम् । सुकृताधिवासं सुकृतनिलयम् । अधिवसन्त्यस्मिन्निति अधिकरणे घञ् । बंहिष्ठा बहुलतमा कीर्तिर्यस्य स बंहिष्ठकीर्त्तिः । यशसा वरिष्ठं गुरुतमम् । अत्र वृन्दारकप्रियगुरुबहुलोरूणामिष्ठनि यथासंख्यं '२०१६ । प्रियस्थिर-। ६ । ४ । १५७ ।' इत्यादिना वृन्दप्रगर्वंहवर इत्येते आदेशा भवन्ति ॥

७०-त्रिवर्ग-पारीणमसौ भवन्त-
मध्यासयन्नासनमेकमिन्द्रः ॥
विवेकदृश्वत्वमगात् सुराणां,
तं मैथिलो वाक्यमिदं बभाषे ॥ ४३ ॥

त्रिवर्गेत्यादि--तं दशरथं मैथिलो जनकः वाक्यमिदं बभाषे । ब्रुवीत्यर्थग्रहणात् द्विकर्मकता । किं तद्वाक्यमित्याह--असाविन्द्रो भवन्तम् एकासनमध्यासयन् आरोपयन् विवेकदृश्वत्वमगादिति संबन्धः । आसनस्य '५४२ । अधिशीङ्-। १ । ४ । ४६ ।' इत्यादिना अधिकरणे कर्मसंज्ञा । भवन्तमिति '५४० । गतिबुद्धि- । १ । ४ । ५२ ।' इत्यादिना अस्तेरण्य-

१—'त्रिवर्गो धर्मकामाऽर्थैश्, चतुर्वर्गः समोक्षकैः, ॥ ७६६ । सबलैस् तैश् चतुर्भद्रम् ।'

न्तावस्थायामकर्मकत्वात् । पारंगमीत्यस्मिन्वाव- '१८१२ । अवार-पार-५ । २ । ११ ।' इत्यादिना पार-शब्दात् खः । तत्र विगृहीतविपर्यस्तग्रहणात् । त्रि-वर्गस्य धर्मार्थकामस्य पारीणमिति षष्ठीसमासः । त्रिवर्गपारीणं भवन्तम् । सुराणां मध्ये स एवैको विवेकदृश्वत्वं विवेकज्ञतामगात् । '२४५८ । इणो गा लुङि । २ । ४ । ४५ ।' । '२२२३ । गाति-स्था-२ । ४ । ७७ ।' इत्यादिना सिचो लुक् । विवेकं दृष्टवानिति दृशेः क्वनिप् ॥

७१-हिरण्मयी साललतेव जङ्गमा
च्युता दिवः स्थास्नुरिवाऽचिरप्रभा ॥
शशाङ्ककान्तेरधिदेवताऽऽकृतिः
सुता ददे तस्य सुताय मैथिली ॥ ४४ ॥

हिरण्मयीत्यादि—तस्य दशरथस्य सुताय रामा-य । सूयत इति सुतः । '१००७ । 'षु प्रसवैश्वर्ययोः' इत्यस्मात् कर्मणि निष्ठा । सुता मैथिली सीता ददे जनकेनेत्यर्थात् । कर्मणि लिट् । मैथिलस्यापत्यं '१०९५ । अत इञ् । ४ । १ । ९५ ।' तदन्तात् '५२० । इतो मनुष्यजातेः । ४ । १ । ६५ ।' इति ङीष् । रामस्य ज्येष्ठत्वात्तस्यैव कविना परिणय उक्तः, न शेषा-णाम् । तेन अन्या अपि तदैव दुहितरो दत्ताः ।

१—'आत्मजस् तनयः सूनुः सुतः पुत्रस्, स्त्रियां त्वमी ॥ ५९१ । आहुर् दुहितरं सर्वेऽपत्यं तोकं तयोः समे ।' इति सर्वत्र ना० अ० ।

हिरण्मयी सुवर्णनिर्मितेव साललता। वृक्षलता सुवर्णच्छवित्वात् तस्याः। हिरण्यविकार इति मयटि '११४५। दाण्डिनायन। ६। ४। १७४।' इत्यादिना यलोपनिपातनम्। जंगमा संचारिणी नतु स्थावरा। अत्यर्थं गच्छतीति यङि '२६४३। नुगतः। ७। ८५।' इति नुक्। यङन्तात्पचाद्यचि '२६५०। यङोऽचि च। २। ४। ७४।' इति यङो लुक्। च्युता दिवः आकाशात्पतिता। अचिरप्रभेव विद्युदिव तेजस्वित्वात् तन्वीत्वाच्च। किन्तु स्थास्नुरचञ्चला। सा तु चञ्चलेति व्यतिरेकः। '५२१। ऊङुतः। ४। १। ६६।' इति ऊङ् न भवति क्रियाशब्दत्वात्। तत्र मनुष्यजातेरिति वर्तते। शशाङ्ककान्तेर्याधिदेवता अधिष्ठात्री देवता तस्या आकृतिर्यस्याः। सौम्यत्वात्। आक्रियते अनयेत्याकृतिः संस्थानम्। '३१८८। अकर्तरि च कारके-। ३। ३। १९।' इति स्त्रियां क्तिन्॥

७२-लब्धां ततो विश्वजनीनवृत्तिम्-
तामात्मनीनामुदवोढ रामः॥
सद्रत्नमुक्ताफलभर्मशोभां
संवर्द्धयन्तीं रघुवर्य्य-लक्ष्मीम्॥ ४५॥

लब्धामित्यादि-ततो दानानन्तरम् लब्धां तामात्मनीनाम् आत्मने हिताम्। '१६७०। आत्मन्विश्व-। ५। १। ९।' इति खः। रामः उदवोढ। वहेः

१—'९८०। स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम्। तपनीयं शातकुम्भं गांगेयं भर्म कर्बुरम्॥' इति ना० अ०।

स्वरितेत्त्वात्कर्तुः क्रियाफलविवक्षया तङ्। विश्वजनीना विश्वजनाय हिता वृत्तिः प्रवृत्तिर्यस्य रामस्य सः। पूर्ववत् खः। सती उत्कृष्टा रत्नादिशोभा यस्याः। तैरलंकृतत्वात्। तां सद्रत्नमुक्ताफलभर्मशोभाम्। भर्म स्वर्णम्। सर्वधातुभ्यो मनिन्। 'भर्मभूषाम्' इति पाठान्तरम्। सद्रत्नादिभूषा अलंकारो यस्या इति योज्यम्। '३२८०। गुरोश्च हलः। ३। ३। १०३।' इत्यकारः। संबंहयन्तीं संबहुलामतिस्थिरां कुर्वाणाम्। बहुलशब्दात् 'तत्करोति—'इति णिचि इष्ठवद्भावात् '२०१६। प्रिय-स्थिर। ६। ४। १५७। इत्यादिना बंहादेशः। पश्चात्तदन्तस्य संपूर्वस्य साधनेन योगः। कामित्याह—रघुवर्ग्यलक्ष्मीमिति। रघुवर्गे भवां विभूतिम्। '१४४२। वर्गान्ताच्च। ४। ३। ६३।' इत्यनुवृत्तौ '१४४३। अशब्दे यत्खावन्यतरस्याम्। ४। ३। ६४।' इति यत्॥

७३-सु-प्रातमासादित-संमदं तद्
वन्दारुभिः संस्तुतमभ्ययोध्यम्॥
आश्वीय-राजन्यक-हास्तिकाऽऽढ्य-

१—'मुत् प्रीतिः प्रमदो हर्षः प्रमोदाऽऽमोद-संमदाः १४७। स्यादानन्दथुरानन्दः शर्मशातसुखानि च।'

२—'८१२। वृन्दे त्वश्वीयमाश्ववत्॥

३—७६९। अथ राजकम्। राजन्यकं च नृपति-क्षत्रियाणां गणे क्रमात्॥'

४—'८०२। हास्तिकं गजता वृन्दे॥

मगात् सराजं बलमध्वनीनम् ॥ ४६ ॥

सुप्रातेति—विवाहं निर्वर्त्य प्रभाते अयोध्याभिमुखं तद्बलं दशरथस्यागात् गतवत्। सुप्रातं निरुपद्रवत्वात्। शोभनं प्रातर्दिनमुखं यस्य बलस्य। '८६०। सुप्रात-सुश्व-। ५। ४। १२०।' इत्यादिना समासान्तष्टिलोपश्च निपात्यते। आसादितसंमर्दं प्राप्तहर्षम्। '३२४५। प्रमद-संमदौ हर्षे। ३। ३। ६८।' इति निपातनम्। वन्दारुभिः संस्तुतं कृतस्तवम्। अभ्ययोध्यम् अयोध्याभिमुखम्। '६६८। लक्षणेनाऽभिप्रती आभिमुख्ये। २। १।१४।' इति अव्ययीभावः। अश्वानां समूहो अश्वीयम्। '१२५७। केशाश्वाभ्यां यञ्छौ-। ४। २।४८।' इति छः। राजन्यानां क्षत्रियाणां समूहो राजन्यकम्। '१२४६। गोत्रोक्ष-। ४। २। ३९।' इत्यादिना वुञ्। 'प्रकृत्याके राजन्यमनुष्ययुवानः' इति प्रकृतिभावादपत्ययकारलोपो न भवति। हस्तिनां समूहो हास्तिकम्। '१२५६। अचित्त-हस्ति-४। २। ४७।' इति ठक्। एषां सेनाङ्गत्वात् द्वन्द्व एकवद्भावः। तेनाढ्यमुपचितमिति तृतीयेति योगविभागात् समासः। सह राज्ञेति विगृह्य साकल्यवचने यौगपद्ये वाव्ययीभावः। '६६०। अव्ययीभावे चाकाले-। ६। ३। ८१।' इति स-भावः। '६७८। अनश्च। ५। ४। १०८।' इति टच् समासान्तः। अध्वनीनमध्वानमलंगामीति '१८१७। अध्वनो यत्-खौ। ५।

१—७८२। अध्वनीनोऽध्वगोऽध्वन्यः पान्थः पथिक इत्यपि ॥'

२ । १६ ।' । '१६७१ । आत्माध्वानौ खे । ६ । ४ । १६९ ।' इति प्रकृतिभावः ॥

७४–विशङ्कटो[1] वक्षसि बाण-पाणिः
संपन्न-ताल-द्वयसः पुरस्तात् ॥
भीष्मो धनुष्मा[2]नुपजान्वरत्नि-
रैति स्म रा[3]मः पथि जामदग्न्यः ॥ ४७ ॥

विशङ्कटेत्यादि—एवमस्य गच्छतः पथि मार्गे । सप्तम्यां '३६८ । भस्य टेर्लोपः । ७ । १ । ८८ ।' पुरस्तादग्रतः । '१९७६ । अस्ताति च । ५ । ३ । ४० ।' इति पूर्वस्य पुरादेशः । रामो जामदग्न्यः । जमदग्नेरपत्यं रामोऽयम् । गर्गादिपाठाद्यञ् । स ऐति स्म आगतवान् । आङ्पूर्वादिणो लट् । '७३ । एत्येधत्यूठ्सु । ६ । १ । ८९ ।' इति वृद्धिः । विशङ्कटो वक्षसि विशाल उरसि । '१८२९ । वेः शालच्छङ्कटचौ । ५ । २ । २८ ।' इति शङ्कटच् । बाणः पाणावस्येति बाणपाणिः । 'प्रहरणार्थेभ्य' इत्यादिना सप्तम्यन्तस्य परनिपातः । संपन्नो निष्पन्नो यस्तालवृक्षः स प्रमाणं यस्य स तथोक्तः । '१८३८ । प्रमाणे द्वयसज्- । ५ । २ । ३७ ।' भी-

---

१—'११०६ । विशंकटं पृथु बृहद् विशालं पृथुलं महत् ।' इति सर्वत्र ना अ० ।

२—'भूम-निन्दा-प्रशंसासु नित्ययोगेऽतिशायने ॥ संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः ॥ १ ॥ इति वै० भ० ।

३—'रामम्' इति वा क्वचित्पाठः ।

यते अस्मादिति भीष्मः । 'भियः षुग्वा' इति औणादिको मक्प्रत्ययः । वा षुगागमश्च । '३१७३ । भीमादयोऽपादाने । ३ । ४ । ७४ ।' इत्यपादाने साधुः । धनुष्मान् धनुषा युक्तः । संसर्गे मतुप् । जानुनोः समीपमुपजानु । सामीप्येऽव्ययीभावः । उपजानु अरत्निर्यस्य स तथोक्तः प्रलम्बबाहुरित्यर्थः ॥

७५—उच्चैरसौ राघवमाह्वतेदं
धनुः सबाणं कुरु, माऽतियासीः ॥
पराक्रमज्ञः प्रियसन्ततिस् तं
नम्रः क्षितीन्द्रोऽनुनिनीषुरूचे ॥ ४८ ॥

उच्चैरित्यादि—उच्चैर्महता ध्वनिना राघवं दाशरथिं एवं वक्ष्यमाणमाह्वत आहूतवान् । '२७०४ । स्पर्धायामाङः । १ । ३ । ३१ ।' इत्यात्मनेपदम् । '२६९० । आत्मनेपदेष्वन्यतरस्याम् । २ । ४ । ४४ ।' इति च्लेरङ् । धनुः सबाणं कुरु । धनुषि बाणमारोप्य युद्धाय सज्जीभवेत्यर्थः । मातियासीः मातिक्रम्य गमनं कार्षीः । यातेर्माङि लुङ् । अडभावः । २३७७ । यमरमनमातां सक् च । ७ । २ । ७३ ।' इति इट् । '२२६६ । इट ईटि । ८ । २ । २८ ।' इति सिचो लोपः । अथ क्षितीन्द्रो दशरथः तमूचे । '२४५३ । ब्रुवो वचिः । २ । ४ । ५३ ।' आदेशस्य स्थानिवद्भावेन कर्तुः क्रियाफलविवक्षायां तङ् न । वचेः परस्मैपदित्वात् । '२४०९ । वचि— । ६ । १ । १५ ।' इत्यादिना संप्रसारणम् । पराक्रमज्ञः यतस्तस्य पराक्रमं जानाति राजा । प्रियसन्ततिः प्रिया

सन्ततिर्यस्य । रामे व्यापादिते मा भूत्सन्तानविच्छेद इति नम्रः प्रणतो भूत्वा अनुनिनीषुः अनुनेतुमिच्छुः॥

तदनुनयमाह—

७६-अनेकशो निर्जितराजकस् त्वं,
पितॄनतार्प्सीर् नृपरक्ततोयैः॥
संक्षिप्य संरम्भमसद्विपक्षं,
काऽऽस्थाऽर्भकेऽस्मिंस्तव राम! रामे॥ ४६॥

अनेकश इत्यादि—संरम्भं क्रोधं संक्षिप्य उपसंहर। क्षिपेः लोटि मध्यमैकवचने रूपम्। श्यन्। एकमेकमिति विगृह्य '२११०। सङ्ख्यैकवचनाच्च—। ५।४। ४३।' इति शस्। पश्चान्नञ्समासः। अनेकशोऽनेकया कारमिति क्रियाविशेषणमेतत्। निर्जितं पराजितं राजकं राज्ञां समूहो येन स निर्जितराजकः। '१२४६। गोत्रोक्ष—। ४। २। ३९।' इत्यादिना वुञ्। त्वं पुनः पितॄनतार्प्सीः प्रीणितवानसि। कैः-नृपरक्ततोयैः। '१२७१। तृप प्रीणने।' इत्यस्माल्लुङ्। सिच्। हलन्तलक्षणा वृद्धिः। असद्विपक्षम्। असन्नविद्यमानो विपक्षो यस्मिन् संरम्भे। निर्जितराजकत्वात्। रामो विपक्ष इति चेदाह-कास्थार्भकेऽस्मिंस्तव राम रामे। हे परशुराम अर्भके बालके रामे तव का आस्था, क आदरोऽस्ति नैवेत्यभिप्रायः॥

१—वामभागीयैकोनपञ्चाशत्तमाऽङ्क (४९)-पद्यगतराजन्यकशब्दोपरितनं टीकनं प्रेक्ष्यताम्।

७७-अजीगणद् दाशरथं न वाक्यं
यदा स दर्पेण, तदा कुमारः ॥
धनुर् व्यकार्क्षीद् गुरुबाणगर्भं,
लोकानलावीद् विजितांश्च तस्य ॥ ५० ॥

अजीगेत्यादि—दाशरथं दशरथस्येदं दाशरथम् । '१५०० । तस्येदम् । ४ । ३ । १२० ।' इत्यण् । वाक्यं वचनम् । यदा दर्पेण मदेन हेतुना स जामदग्न्यः नाजीगणत् । न गणितवान् । '१६६६ । गण संख्याने ।' इत्यस्यादन्तत्वान्न वृद्धिः । '२३१५ । चङि । ६ । १ । ११ ।' इति द्विर्वचनम् । '२५७३ । ई च गणः । ७ । ४ । ९७ ।' इति अभ्यासस्येकारः । तदा कुमारो राम धनुर्व्यकार्क्षीत् आकृष्टवान् । '१०५६ । कृष आकर्षणे ।' स्पृशमृशेत्यादिनोपसंख्यानेन सिचि पक्षे रूपम् । हलन्तलक्षणा वृद्धिः । '२६५ । षढोः कः सि । ८ । २ । ४१ ।' इति कत्वम् । कृतदारकर्मापि पुत्रः पितरि जीवति कुमार इति व्यपदिश्यते । गर्भयतीति गर्भः । गुरुर्बाणो गर्भो यस्य धनुषः । लोकांश्च स्वप्रभावाद्विजितान् । तस्य परशुरामस्य । अलावीत् छिन्नवान् । लुनातेर्लुङि सिचि वृद्धौ रूपम् । समुच्छिद्यन्तामस्य लोका इति अमोघमस्त्रं मुक्तवानित्यर्थः । ततःप्रभृति तस्य सर्वं तेजोऽपहृतम् ॥

७८-जिते नृपाऽरौ, सुमनीभवन्ति
शब्दायमानान्यशनैरशङ्कम् ॥

वृद्धस्य राज्ञोऽनुमते बलानि
जगाहिरेऽनेकमुखानि मार्गान् ॥ ५१ ॥

जित इत्यादि–जिते नृपारौ । परशुरामे बलानि सैन्यानि मार्गान् पथः । जगाहिरे अवष्टम्भयन्ति । वृद्धस्य राज्ञो दशरथस्यानुमते सति गच्छन्तीति । जामदग्न्यसंरम्भादसुमनांसि सुमनांसि सन्ति सुमनाभवन्ति बलानि । '२१६१ । अरुर्मन–। ५ । ४ । ५१ ।' इत्यादिना च्वायन्त्यस्य लोपे '२११८ । अस्य च्वौ । ७ । ४ । ३२ ।' इतीत्वे रूपम् । शब्दायमानानि । अशनैः सुष्ठु शब्दं कुर्वाणानि । एवं जितस्तथा जितो नृपारिरिति । '२६७३ । शब्दवैर–। ३ । १ । १७ ।' इत्यादिना क्यङ् । अशङ्कं निर्भयं जगाहिर इतिक्रियाविशेषणम् । अनेकमुखानि पृथग्भूतानि पूर्वं भयेन घट्टुलीभूतत्वादनीकानां बहुवचनमिति ॥

७६–अथ पुरुजवयोगान् नेदयद् दूरसंस्थं
दवयदतिरयेण प्राप्तमुर्वीविभागम् ॥
कलमरहितमचेतन् नीरजीकारितक्ष्मां
बलमुपहितशोभां तूर्णमायादयोध्याम् ॥५२॥

१—प्रभूतं प्रचुरं माज्यमदभ्रं बहुलं बहु ॥ ११०९ । पुरुहूः पुरु भूयिष्ठं स्फारं भूयश् च भूरि च ।' २–'ऽथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम् ॥ ७३ । सत्वरं चपलं तूर्णमविलम्बितमाशु च. ॥' ३–पद्येऽस्मिन्वृत्तं मालिनी । तल्लक्षणम्–वामभागीयषड्विंशतितमाङ्क (२६) पद्यटीकनान्तर्द्रष्टव्यम् ।

अथेत्यादि—अथेत्यानन्तर्ये । बलं दाशरथम् । तूर्णं शीघ्रम् । '३०६९ । रुष्यमत्वर-। ७ । २ । २८ ।' इत्यादिना पक्षे इडभावः । '२०५४ । ज्वर त्वर-। ६ । ४ । २० ।' इति वकारोपधयोरूठ् । '३०१६ । रदाभ्याम् । ८ । २ । ४२ ।' इति नत्वम् । अयोध्यामायात् । आगतम् । आङ्पूर्वाद्यातेर्लङि रूपम् । पुरुसंहान् वेगो जवः तेन योगात् । पूर्यते वर्धते इति पुरुः । 'कुर्श्च' इत्यधिकृत्य 'पृ भिदि-व्यधि-' इत्यादिना कुप्रत्ययः । दूरसंस्थं दूरे सन्तिष्ठत इति कः । उर्वीविभागम् । नेदयत् अन्तिकं कुर्वत् । अन्तिकशब्दात् समीपवाचिनः तत्करोतीति णिच् । इष्ठवद्भावात् '२०१४ । अन्तिक-बाढयोर्नेदसाधौ । ५ । ३ । ६३ ।' इति नेदादेशः पश्चाल्लट् । शतरि शप् अयादेशः । प्राप्तं विषयीकृतं चोर्वीविभागं भूविभागम् । अतिरयेण अतिवेगेन । दवयत् दूरीकुर्वत् पश्चाद्भागेन । दूरशब्दात् पूर्ववण्णिचि इष्ठवद्भावे च '२०१५ । स्थूलदूर-।६।४।१५६।' इत्यादिना यणादिपरलोपः पूर्वस्य च गुणः । पश्चात्तथा एव लडादयः । क्लमरहितम् । अपगतश्रमम् अचेतत् कियद्दूरमागतमहमित्यबुध्यमानम् । '३९ । चिती संज्ञाने ।' इत्येतस्य शतरि रूपम् । अनीरजा नीरजाः कारितेति '२१२१ । अरुर्मन-। ५ । ४ । ५१ ।' इत्यादिना च्वावन्त्यलोपः । '२११८ । अस्य च्वौ । ७ । ४ । ३२ ।' इतीत्वम् । नीरजीकारिता क्ष्मा भूमिर्यस्यामयोध्यायां ताम् । सिक्तसंमृष्टभूत-

लामित्यर्थः। उपहितशोभाम् छत्रध्वजपताकाभिरा-
रोपितशोभाम् ॥

इति श्रीजयमङ्गलाऽऽख्यया व्याख्यया समलंकृते
श्रीभट्टिकाव्ये प्रथमे प्रकीर्णकाण्डे लक्षणरूपे
द्वितीयः परिच्छेदः (वर्गः), तथा ल-
क्ष्यरूपे कथानके श्रीसीता-परिण-
यो नाम द्वितीयः सर्गः प-
र्यवसितः ॥

तृतीयः सर्गः—

८०-वधेन संख्ये पिशिताऽशनानां
क्षत्राऽन्तकस्याऽभिभवेन चैव ॥
आढ्यंभविष्णुर्यशसा कुमारः
प्रियंभविष्णुर्न स यस्य नाऽऽसीत् ॥ १ ॥

वधेनेत्यादि——संख्ये संग्रामे पिशिताशनानां राक्षसानाम्। पिशितं मांसम् अशनं येषामिति। तेषां वधेन हननेन। '३२५३। हनश्च वधः। ३। ३। ७६।' इति अप्प्रत्यये वधादेशः। कृत्प्रयोगे कर्मणि षष्ठी। क्षत्रान्तकस्य परशुरामस्य। अभिभवेन पराजयेन च '३२३२। ऋदोरप्। ३। ३। ५७।' चैवशब्दो निपात-समुदायः समुच्चये। तेन हेतुभूतेन। यशसा आढ्यं-भविष्णुः। अनाढ्य आढ्यो भूतः। '२९७४। कर्तरि

भुवः-३।२।५७।' इति खिष्णुच्। २६४२। अरु-र्द्विषत्-।६।३।६७।' इति मुम्। कुमारो यस्य न प्रियंभविष्णुः। यस्यापि प्राक् प्रियो न जातः पश्चा-दपि तथैव न प्रियो भूतः स नासीत् न बभूव॥

८१-ततः सुचेतीकृतपौरभृत्यो
राज्ये ऽभिषेक्ष्ये सुतमित्यनीचैः॥
आघोषयन् भूमिपतिः समस्तं
भूयो ऽपि लोकं सुमनीचकार॥ २॥

तत इत्यादि—ततः प्रियंभविष्णुतायाः अनन्तरं भूमिपतिर्दशरथो लोकं सुमनीचकार। किमयं सम्य-क् पालयिष्यति न वेति असुचेतसः पौरा भृत्याश्च जाताः ते सम्यक्पालनात् सुचेतसः कृता येन स सु-चेतीकृतपौरभृत्यः। भूयोऽपि पुनरपि लोकं समस्तं सुमनीचकार। कथमित्याह—राज्ये राजकर्मणि पा-लनलक्षणे सुतं रामं अभिषेक्ष्ये तदभिषेकं करिष्या-मीति। सिचेरुभयपदित्वाल्लृट्। अनीचैर्महता ध्व-निना। आघोषयन् घोषणां कारयन्। सुचेतीसुमनी-शब्दौ '२१२१। अरुर्मन-।५।४।५१।' इत्यादिना साधू॥

८२-आदित्सदादीप्त-कृशानु-कल्पं
सिंहासनं तस्य सपादपीठम्॥
सन्तप्तचामीकरवल्गुवज्र-
विभागविन्यस्तमहार्घरत्नम्॥ ३॥

आदिक्षदित्यादि—तस्य रामस्य सिंहासनमादिक्षत् आदिष्टवान् एवंविधं कारयेति । दिशः स्वरितेतो लुङि '२३३६ । शल इगुपधात्—। ३ । १ । ४५ ।' इत्यादिना च्लेः क्सः । अकर्तृगामिक्रियाफलत्वात्तिप् । चादीप्तकृशानुकल्पं ज्वलिताग्नितुल्यं । तस्य कारणमाह—सन्तप्तचामीकरवर्णानि उत्तप्तसुवर्णवर्णानि वस्त्राणि यस्मिन् । तथा विभागेषु विन्यस्तानि अतिमहार्घाणि रत्नानि पद्मरागादीनि यत्र । सपादपीठं सह पादपीठेन ॥

८३-प्रास्थापयत् पूगकृतान् स्वपोषं
पुष्टान् प्रयत्नाद् दृढगात्रबन्धान् ॥
सभर्मकुम्भान् पुरुषान् समन्तात्
पत्काषिणस् तीर्थजलाऽर्थमाशु ॥ ४ ॥

प्रास्थेत्यादि—तीर्थजलार्थं पुरुषान् प्रयत्नात् आदरेण । समन्तात् सर्वासु दिक्षु । आशु शीघ्रं प्रास्थापयत् प्राहिणोत् । प्रपूर्वस्तिष्ठतिर्गमने वर्तते तस्य हेतुमण्ण्यन्तस्य लङि रूपम् । पूगकृतान् अपूगाः पूगाः कृता इति । 'श्रेण्यादिषु च्व्यर्थवचनम्' इति समासः । सङ्घीकृतानित्यर्थः । स्वपोषंपुष्टान् । '३३६१। स्वे पुषः । ३ । ४ । ४० ' इति णमुल् । '७८३ । अमैवाऽव्ययेन । २ । २ । २० ।' इति समासः । यथाविध्यनुप्रयोगश्च । दृढो गात्रबन्धो येषां तान् । संयतकायान् । महाभारोद्वहनक्षमत्वात् । सभर्मकुम्भान् । ससुवर्णकलशान् । पत्काषिणः । पादौ कषितुं हिं-

सितुं शीलं येषामिति । '२६८८ । सुप्यजातौ णिनि:-। ३ । ३ । ७८ ।' । '६६२ । हिमकाषिहतिषु च । ६ । ३ । ५४ ।' इति पदादेशः। पदातीनित्यर्थः । आश्विति 'कृवापाजि-' इत्यादिना उण् ॥

८४-उच्चान् प्रचक्रुर्, नगरस्य मार्गान्,
ध्वजान् बबन्धुर्, मुमुचुः स्वधूपान् ॥
दिशश्च पुष्पैश्चकरुर् विचित्रै-
रर्थेषु राज्ञा निपुणा नियुक्ताः ॥ ५ ॥

उच्चानित्यादि—ये निपुणा अर्थेषु कार्येषु राज्ञा दशरथेन नियुक्ताः अधिकृतास्ते नगरस्य मार्गान् पथः । उच्चान् सेकवतः प्रचक्रुः । उच्चणमुच्चा । '३२८० । गुरोश्च हलः । ३ । ३ । १०३ ।' इत्यकारः, सा विद्यते येषामिति '१९३३ । अर्शआदिभ्योऽच् । ५ । २ । १२७ ।' । '२२३७ । इजादेश्च गुरुमतः-। ३।१।३६।' इत्यादिना आम्प्रत्यये प्रचक्रुरित्यनुप्रयोगो न घटते '२२३९ । कृञ्चानुप्रयुज्यते-। ३ । १ । ४० ।' इत्यनुशब्दस्य व्यवहितनिवृत्त्यर्थत्वात् । ध्वजान् बबन्धुः उच्छ्रायितवन्तः । मुमुचुः स्वधूपान् आकाशे घटिकादिभिर्धूपान्मुमुचुः प्रमुक्तवन्तः । दिशश्च पुष्पैश्चकरुः छादितवन्तः '१५०३ । कॄ विक्षेपे ।' इत्यस्य लिटि '२३८३ । ऋच्छत्यॄताम् । ७ । ४ । ११ ।' इति गुणः । विचित्रैः नानाप्रकारैः ॥

८५-मातामहाऽऽवासमुपेयिवांसं
मोहादपृष्ट्वा भरतं तदानीम् ॥

तत् केकयी सोढुमशक्नुवाना
ववार रामस्य वनप्रयाणम् ॥ ६ ॥

मातेत्यादि—तत्पूर्वोक्तमभिषेकसंविधानं सोढुमशक्नुवाना असहमाना केकयी रामस्य वनप्रयाणं ववार प्रार्थितवती राज्ञ इत्यर्थात्। सहेः शक्नोतावुपपदे '३१७७। शकधृष-। ३। ४। ६५।' इत्यादिना तुमुन्। तत्र नञा शक्त्यर्थस्य प्रतिषेधेऽपि न दोषः प्रतिषेधस्य बहिरङ्गत्वात्। शक्नोतेः परस्मैपदित्वात् शानज् नास्ति। '३१०६। ताच्छील्यवयोवचन-। ३। २। १२६।' इत्यादिना चानश्। स्वादित्वाच्छ्नुः। '२७१। अचि श्नुधातु-। ६। ४। ७७।' इत्यादिना उवङ्। किं कृत्वेत्याह—तदानीं प्रार्थनाकाले देशान्तरावस्थितत्वात् किमेवं क्रियते न वेति न भरतं पृष्टवती। देशान्तरावस्थितिं दर्शयन्नाह—मातामहावासमिति। मातुः पिता मातामहः। '१२४२। पितृव्यमातुल—। ४। २। ३६।' इत्यादिना निपातनात् डामहच्। आवासः निलयम्। आवसत्यस्मिन्निति अधिकरणे घञ्। उपेयिवांसम्। '३०६८। उपेयिवाननाश्वाननूचानश्च। ३। २। १०६।' इत्यादिना निपातितः। मोहादज्ञानात्। दूतप्रेषणेनापृष्ट्वा। रामस्येति कर्तरि षष्ठी। वनाय प्रयाणं गमनमिति। चतुर्थीति योगविभागात् समासः। '५८५। गत्यर्थकर्मणि-। २। ३। १२।' इत्यादिना चतुर्थी। परत्वात्कृल्लक्षणया षष्ठ्या भवितव्यमिति चेत् न। पुनर्द्वितीयाग्रहणात्परामपि षष्ठीं

बाधित्वा द्वितीयैव यथा स्यादिति यद्येवं द्वितीयैव स्यात् न चतुर्थी । नैष दोषः । द्वितीयाग्रहणस्योपलक्षणार्थत्वात् । तथा च वृत्तावुभयमुक्तं--ग्रामं गन्ता ग्रामाय गन्तेति ॥

८६–कर्णेजपैराहितराज्यलोभा
स्त्रैणेन नीता विकृतिं लघिम्ना ॥
रामप्रवासे व्यमृशन्न दोषं
जनाऽपवादं सनरेन्द्रमृत्युम् ॥ ७ ॥

कर्ण इत्यादि--कर्णे जपन्ति कर्णेजपाः सूचकाः मन्थरादयः । '२६२७ । स्तम्बकर्णयोः–। ३ । २ । १३ ।' इत्यच् । '६७२ । तत्पुरुषे कृति बहुलम् । ६ । ३ । १४ ।' इति सप्तम्या अलुक् । तैराहितः आनायितो राज्यलोभो यस्याः सैवम् । स्त्रैणेन स्त्रिया अयम् । '१०७६ । स्त्रीपुंसाभ्यां नञ्स्नञौ–। ४ । १ । ८७ ।' इति नञ् । लघोर्भावो लघिमा । '१७८४ पृथ्वादि–। ५ । १ । १२२ ।' इत्यादिना इमनिच् । टिलोपः । तेन विकृतिमन्यथात्वं नीता केकयी रामप्रवासे सति दोषं न व्यमृशत् नालोचितवती । '१५१६ । मृशँ आमर्शने ।' इति तौदादिकस्य लङि रूपम् । किंस्वरूपं दोषम्--जनापवादं लोकवैमुख्यम् । राज्यार्हो ज्येष्ठः पुत्रोऽनया प्रव्राजित इति । नरेन्द्रस्य दशरथस्य मृत्युना सह वर्तमानम् ॥

८७–वस्त्रूनि देशांश्च निवर्तयिष्यन्
रामं नृपः संगिरमाण एव ॥

तयाऽवजज्ञे, भरताऽभिषेको
विषादशङ्कुश्च मतौ निचख्ने ॥ ८ ॥

वसूनीत्यादि–रामं निवर्तयिष्यन् रामं निवर्तयितुं वसूनि द्रव्याणि देशांश्च सङ्गिरमाण एव प्रतिजानान एव दास्यामीति नृपो राजा कैकेय्या तदनङ्गीकरणादवजज्ञे अवज्ञातः। ज्ञा इत्ययं धातुरवपूर्वोऽवज्ञाने वर्तते। तस्मात्कर्मणि लिट् ।'२३६३। गमहन-।६।४।६८।' इत्युपधालोपः। तत्र वृतेर्हेतुमरायन्तात् क्रियार्थोपपदे लृट् । सङ्गिरणं च क्रिया । गिरेस्तौदादिकात् '२७२४। अवाद्ग्रः।१।३।५१।' इति अधिकृत्य '२७२५। समः प्रतिज्ञाने । १ । ३ । ५२ ।' इति तङ् । शानच् ।'२३६०। ऋत इत् । ७ । १ । १०० ।' ।'३१०१ । आने मुक् । ७ । २ । ८२ ।' इदं चापरमनुष्ठितं तया भरतो राज्येऽभिषिच्यतामिति भरताभिषेको मतौ मनसि निचख्ने निखातः । कर्मणि लिट् । '२३६३ । गमहन–। ६ । ४ । ६८ ।' इत्यादिना उपधालोपः । तथा विषादः शङ्कुरिव शल्यमिव निचख्ने। अज्येष्ठत्वात् नायं समभिषिच्यत इति विषादः । संग्रामात्किल परिश्रान्तमागतं दशरथं केकयी परिचचार तेन परितुष्टेनोक्तं किं ते दास्यामीति सा प्राह यदार्थयिष्यते तदा यूयं दास्यथेति सा तदवसरं बुद्ध्वा वरद्वयं प्रार्थितवती । एको रामस्य वनगमनं द्वितीयो राज्ये भरतोऽभिषिच्यतामिति ॥

८८-ततः प्रविव्राजयिषुः कुमार-

माऽदिक्षदस्याऽभिगमं वनाय ॥
सौमित्रिसीताऽनुचरस्य राजा
सुमन्त्रनेत्रेण रथेन शोचन् ॥ ६ ॥

तत इत्यादि—कैकयीप्रार्थनानन्तरं राजा कुमारं रामं प्रविव्राजयिषुः प्रव्रजन्तमेनं प्रव्राजयितुमिच्छुः। व्रजेर्हेतुमण्ण्यन्तात्सन्। अस्य कुमारस्य। रथेन वनाभिगमम्भिगमनम्। ३२३४। ग्रहवृदनिश्चिगमश्च। ३।३।५८।' इत्यप्। आदिक्षत् आदिष्टवान्। अस्येति कर्तरि षष्ठी। वनायेति। '५८५। गत्यर्थकर्मणि—। २। ३। १२।' इति चतुर्थी। सौमित्रिसीतानुचरस्य लक्ष्मणसीतासहायस्य। सुमित्राया अपत्यम्। बाह्वादित्वादिञ्। सहचरत्वेनाभ्यर्हितत्वात् पूर्वनिपातः। अनु पश्चाच्चरतीति अनुचरः। '२९३१। भिक्षासेनादायेषु च। ३। २। १७।, इति चकारस्यानुक्तसमुच्चयार्थत्वात् टः। अनुचरश्चानुचरी च। '९३३। पुमान् स्त्रिया। १। २। ६७।, तावनुचरौ सौमित्रिसीते अनुचरौ सहायौ यस्य। कालापिकास्ततोऽन्यत्रापि पठन्ति अनधिकरणोपपदे चरेष्टः इत्यर्थः। नीयतेऽनेनेति नेत्रं लोचनम्। '३१६२। दाम्नी—। ३। २। १८२।' इत्यादिना ष्ट्रन्। सुमन्त्रनामा रथवाहको नेत्रमिव यस्य रथस्य तद्वशात्तस्य प्रवृत्तेः। शोचन् परिदेवयमानो राजा ॥

८९–केचिन् निनिन्दुर्नृपमप्रशान्तं,
विचुक्रुशुः केचन साऽस्रमुच्चैः ॥

ऊचुस् तथाऽन्ये भरतस्य मायां,
धिक् केकयीमित्यपरो जगाद ॥ १० ॥

केचिदित्यादि—राज्ञा वनगमने समादिष्टे सति केचिज्जना नृपं निनिन्दुः कुत्सितवन्तः। '६८। णिदि कुत्सायाम्।' अप्रशान्तं वृद्धभावेऽपि स्त्रीवशम्। केचन केचित्सास्रं सबाष्पमुच्चैः सुष्ठु विचुक्रुशुः सुतरामाक्रन्दितवन्तः। तथान्ये भरतस्य मायां शाठ्यमूचुः उक्तवन्तः। तत्कृतोऽयं प्रयोगो येनात्मरक्षणार्थं मातामहनिवासे स्थित इति। अपरो धिक्केकयीं ययैवमनुष्ठितमिति जगाद गदितवान्। 'धिगुपर्यादिषु त्रिषु' इति धिग्योगे द्वितीया ॥

९०–'गतो वनं श्वो भवितेति रामः,'
शोकेन देहे जनताऽतिमात्रम्, ॥
धीरास् तु तत्र च्युतमन्यवोऽन्ये
दधुः कुमाराऽनुगमे मनांसि ॥ ११ ॥

गत इत्यादि—श्व आगामिनि दिवसे वनं गतो रामो भवितेति तास्। जनता जनसमूहः '१२५१। ग्रामजनबन्धु-। ४। २। ४३।' इत्यादिना तल्। देहे दग्धा। कर्मणि लिट्। २२६०। अत एकहल्-। ६। ४। १२०।' इत्येत्वाभ्यासलोपौ। गत इति भूतकालः श्वोभवितेति भविष्यत्कालेन सम्बध्यमानः साधुः। '२८२४। धातुसम्बन्धे प्रत्ययाः। ३। ४। १।' इति। ये तु तत्र धीराः ते च्युतमन्यवो विगतशोकाः सन्तः

कुमारानुगमे कुमारस्य पश्चाद्गमननिमित्तं मनांसि दधुः कृतवन्तः। राममनुव्रजाम इति। निमित्तात्कर्म-संयोगे सप्तमीति। मनांसीति कर्मणा योगात्॥

९१-प्रस्थास्यमानावुपसेदुषस् तौ
शोशुच्यमानानिदमूचतुस् तान्,॥
'किं शोचतेहाऽभ्युदये बताऽस्मान्
नियोग-लाभेन पितुः कृताऽर्थान्'॥ १२॥

प्रस्थेत्यादि—तौ रामलक्ष्मणौ प्रस्थास्यमानौ गमिष्यन्तौ। '२६८६। समवप्रविभ्यः स्थः।१।३।२२। इति तङ्। जनान् इदं वक्ष्यमाणमूचतुः उक्तवन्तौ। ब्रुवीत्यर्थग्रहणात् वचेर्द्विकर्मकता। उपसेदुषस्तौ ढौ-कितवतः जनान्। '३०९७। भाषायां सद-वस— ३।२।१०८। इत्यादिना क्वसुः। शोशुच्यमानान् अत्यर्थं शोकं कुर्वतः। भृशार्थे यङ्। किमूचतुरित्याह-किं शोचतेति। हे जनाः! कस्मादस्मान् शोचत परिदे-वयध्वम्। विधावपूर्वार्थप्रकाशने लोट्। इहाभ्युदये बतशब्दो विस्मये। तस्मिन् आश्चर्यभूते अभ्युदये वृद्धौ सत्याम्। कुत इत्याह-पितुर्नियोगलाभेन वन-गमनाज्ञालाभेन कृतार्थान् लब्धप्रयोजनान्। कृतार्थ-त्वादशोच्या वयमित्यर्थः॥

९२-असृष्ट यो, यश्च भयेष्वरक्षीद्,
यः सर्वदाऽस्मानपुषत् स्व-पोषम्॥
महोपकारस्य किमस्ति तस्य
तुच्छेन यानेन वनस्य मोक्षः॥ १३॥

अस्रष्टेत्यादि—अस्रष्ट जनितवान् । सृजेर्दैवादिकस्यात्मनेपदित्वात् लुङि रूपम् । न तौदादिकस्य परस्मैपदित्वात् '२४०५। सृजि-दृशोः-।६।१।५८।' इत्यम्। यश्च भयेषु सत्सु अरक्षीत् पालितवान् । '७०६। रक्षँ पालने।' इत्यस्य लुङि रूपम् । यः सर्वदा सर्वकालम्। '१९६४। सर्वैकान्य-।५।३।१५।' इत्यादिना दाप्रत्ययः। यश्चापुषत् पुष्टवान् । स्वपोषं धनेनास्मानपुषत् । पुषेर्लुङि रूपम् । '२३४३ । पुषादि-।३।१।५५।' इत्यङ् । '३३६१। स्वे पुषः ।३।४।४०,' इति णमुल् , '७८३, अमैवाव्ययेन '२२२० ।' इति समासः । '२८२७, यथाविध्यनुप्रयोगश्च, '३।४।४।' तस्य पितुः संबन्धिनो महोपकारस्य किमस्ति मोक्षः प्रत्युपकारो नैवेति भावः। केनेत्याह—तुच्छेन असारेण वनस्य यानेन । यातेर्भावे ल्युट्। वनस्येति शेषसामान्ये षष्ठी। कृल्लक्षणायास्तु षष्ठ्या गत्यर्थकर्मणि चतुर्थ्या बाध्यमानत्वात् ॥

९३—विद्युत्-प्रणाशं स वरं प्रनष्टो,
यद्वोर्ध्व-शोषं तृणवद् विशुष्कः ॥
अर्थे दुरापे किमुत प्रवासे
न शासनेऽवास्थित यो गुरूणाम् ॥ १४ ॥

विद्युदित्यादि—अर्थे कार्यविशेषे दुरापेऽपि कृच्छ्रप्राप्येऽपि । '३३०५। ईषद्दुःसुषु । ३।३।१२६।' इत्यादिना खल् । गुरूणां यच्छासनमादेशः तस्मिन् यो नावास्थित नावस्थितवान् । अवपूर्वात्तिष्ठतेर्लुङ् । २६८६। समव-।१।३।२२।' इत्यादिना तङ् । २३८९।

स्थाघ्वोरिच्च ।१।२।१७।' इति किच्चमित्वं च । '२३६९ । ह्रस्वादङ्गात् । ८ । २ । २७ ।' इति सिचो लोपः । स वरं विद्युत्प्रणाशं प्रनष्टः । विद्युद्विद्योतपत्त्यनन्तरमेव विनाशं गतः । '३३६६ । उपमाने कर्मणि च । ३।४।४५ ।' इति चकारात् '३३६४। कर्त्रोर्जीव-पुरुषयोः ।३।४।४३।' इत्यतः कर्तृग्रहणानुवृत्तौ कर्तृवाचिनि विद्युच्छब्द उपपदे णमुल् । '२२८७ । उपसर्गादसमासे-८।४।१४।' इत्यादिना णत्वम् । यद्वेत्यथवा । स ऊर्ध्वशोषं तृणवच्छिशुष्कः । '३३६५। ऊर्ध्वेशुषी । ३।४।४४।' इत्यादिना णमुल् । उभयत्रामैवेत्यादिना समासः । '२८२७ । यथाविध्यनुप्रयोगश्च । ३।४।४। किमु प्रवासे किम्पुनः प्रवासविषये यच्छासनं तत्र तावदनवस्थितस्य सुतरामेव पूर्वोक्तं प्रयुज्यते ॥

९४–पौरा ! निवर्त्तध्वमिति न्यगादीत्,
तातस्य शोकाऽपनुदा भवेत ॥
मा दर्शताऽन्यं भरतं च मत्तो,
निवर्तयेत्याह रथं स्म सूतम् ॥ १५ ॥

पौरा इत्यादिना—हे पौराः ! यथागतं निवर्त्तध्वम् । विधौ लोट् । इति तान् न्यगादीत् उक्तवान् रामः । गदेः '२२८४ । अतो हलादेः । ७ । २ । ७।' इति वृद्धिः । '२२६६ । इट ईटि । ८ । २ । २८ ।' इति सिचो लोपः । तातस्य पितुः शोकापनुदाः शोकस्यापहर्तारो भवेत । तुन्दशोकयोरित्यादिना कः । भवतेर्विधौ प्रार्थनायां वा लिङ् । मध्यमपुरुषबहुवचनम् ।

भरतं च मत्तो मत्तः सकाशात्। अस्मदः '१६५३। पञ्चम्यास्तसिल्। ५। ३। ७।' '१३७३। प्रत्ययोत्तरपदयोश्च। ७। २। ६८। इति मदादेशः। अन्यं भरतं मा दर्शत मा द्रष्टारः स्थ। अपि तु योऽहं स एव भरतः स च प्रतिष्ठितः राज्यं पालयिष्यतीत्येव न्यगादीत्। दृशेर्माङि लुङ्। '२२६६। इरितो वा। ३। १। ५७।' इत्यङ्। '२४०६। ऋदृशोऽङि गुणः। ७। ४। १६।' निवर्तय रथमिति सूतं च सुमन्त्रमाह स्म। '२७७८। लट् स्मे। ३। २। ११८।' इति लट्। '२४५०। ब्रुवः पञ्चानाम्-। ३। ४। ८४।' इत्याहादेशः, तिपो णल्॥

६५-ज्ञात्वेङ्गितैर्गत्वरतां जनाना-
मेकां शयित्वा रजनीं सपौरः॥
रक्षन् वनेवासकृताद् भयात् तान्
प्रातश् छलेनाऽपजगाम रामः॥ १६॥

ज्ञात्वेत्यादि—निवर्तध्वमित्युक्ते ये तत्रानिवृत्ताः तेषां जनानां रामो गत्वरतां गमनशीलतां ज्ञात्वा। '३१४४। गत्वरश्च। ३। २। १६४।' इति निपातितः। तैरिङ्गितैरभिप्रायसूचकैश्चेष्टितैः। इङ्गतेर्भावे निष्ठा। वनेवास इति सप्तमीति योगविभागात् समासः। '६७६। शयवासवासिषु। ६। ३। १८।' इति विभाषासप्तम्या अलुक्। तेन कृतात्सिंहादिभयात् रक्षन्

(१) इङ्गितं हृद्गतोभावः।

पालयन् तान् पौरान् सपौरः पौरैः सह एकां रजनीं शयित्वा । '५५८ । कालाध्वनोः—२ । ३ । ५' । इति द्वितीया । शयित्वेति '३३२२ । न क्त्वा सेट् । १ । २ । १८ ।' इति । किस्वप्रतिषेधात् गुणो भवति । प्रातः प्रातःकाले । छलेन सन्ध्यावन्दनादिव्याजेन अपजगाम गतवान् ॥

६६-अस्राचुरस्रं करुणं रुवन्तो,
मुहुर्मुहुर्न्यश्वसिषुः कवोष्णम्, ॥
हा राम ! हा कष्टमिति ब्रुवन्तः
पराङ्मुखैस् ते न्यवृतन् मनोभिः ॥ १७ ॥

अस्राचुरित्यादि—ते पौरा राममपश्यन्तः । करुणं रुवन्तो विलपन्तः । '११०७ रु शब्दे ।' इत्यस्य शतरि रूपम् । अस्रम् अश्रु अस्राक्षुः । मुक्तवन्तः । सृजेस्तौदादिकस्य परस्मैपदिनः लिङि '२४०५ सृजिदृशोः—। ६ । १ । ५८ ।' इत्यम् । हलन्तलक्षणा वृद्धिः। '३२८ । चोः कुः । ८ । २ । ३० ।' । '१३१ । खरि च । ८ । ४ । ५५ ।' इति चर्त्वम् । मुहुर्मुहुः भूयोभूयः कवोष्णमीषदुष्णमन्तः सन्तापात् । '१०३३ । कवं चोष्णे । ६ । ३ । १०७ ।' इति कोः कवादेशः । न्यश्वसिषुः । श्वसेर्लुङ् । '२२६६ । ह्म्यन्त—। ७ । २ । ५ ।' इत्यादिना श्वसेर्वृद्धिप्रतिषेधः । '२२८४ । अतो हलादेर्लघोः । ७ । २ । ७ ।' इति विकल्पस्य प्राप्तत्वात् । हा राम हाकष्टं कृच्छ्रमिति ब्रुवन्तः पराङ्मुखैः येन गतो रामस्तेन गतैर्मनोभिरित्थंभूतैः । न्यवृतन् निवृत्तव-

न्तः । '२३४५ । द्युद्भ्यो लुङि । १ । ३ । ९१ ।' इति परस्मैपदविकल्पात् । द्युतादित्वादङ् ॥

९७-सूतोऽपि गङ्गासलिलैः पवित्वा
सहाऽश्वमात्मानमनल्पमन्युः ॥
ससीतयो राघवयोरधीयन्
श्वसन् कदुष्णं पुरमाविवेश ॥ १८ ॥

सूत इत्यादि-सूतोऽपि सुमन्त्रः सहाश्वमश्वैः सह । अनल्पमन्युः प्रवृद्धशोकः। राघवयोः रामलक्ष्मणयोः । '१८८ । सरूपाणां -। १ । २ । ६४ ।' इत्येकशेषः । ससीतयोः सीतासहितयोः । अधीयन् स्मरन् । '११२० । इक् स्मरणे ।' इत्यस्य शतरि रूपम् । यणादेशः । '६१३ । अधीगर्थ-। २ । ३ । ५२ ।' इति कर्मणि षष्ठी । श्वसन् । कदुष्णं ईषदुष्णम् । '१०३३ । कवं चोष्णे । ६ । ३ । १०७ ।' इति चकारात् कदादेशः । गङ्गातटात्प्रतिनिवृत्य पुरमयोध्यामाजगाम आगतवान् । गङ्गासलिलैः आत्मानं बाह्यमाभ्यन्तरं च पवित्रीकृत्य । '३०५० । पूङश्च । ७ । २ । ५१ ।' इति विकल्पेनेट् । '३०५१ । पूङः क्त्वा च । १ । २ । २२ ।' इति कित्त्वप्रतिषेधात् गुणः ॥

९८-प्रतीय सा पूर्ददृशे जनेन
द्यौर्भानुशीतांशुनिराकृतेव ॥

---

१ मन्युर्दैन्ये क्रतौ क्रुधि ॥

राजन्यनक्षत्रसमन्वितापि
शोकाऽन्धकारक्षतसर्वचेष्टा ॥ १६ ॥

प्रतीयेत्यादि–जनेन रामानुयायिना प्रतीय प्रतिनिवृत्य । पूरयोध्या ददृशे दृष्टा । कर्मणि लिट् । प्रतीय इति इङ् गताविस्यस्य रूपं न पुनरिणः । तस्य हि तुकि प्रतीत्येति स्यात् । '३३३३ । षत्वतुकोरसिद्धः । ६ । १ । ८६ ।' इत्येकादेशस्यासिद्धत्वात् । प्रतीयुषा सा ददृशे इति पाठान्तरम् । प्रतिनिवृत्तेन सा पूर्ददृशे दृष्टेत्यर्थः । अस्मिन् पाठे तु '३०९८ । उपेयिवान्–। ३ । २ । १०६ ।' इत्यादिना इणः क्वसौ रूपं द्रष्टव्यमत्रोपसर्गस्यातन्त्रत्वात् । शोकोऽन्धकार इव शोकान्धकारः । तेन क्षता नीतानुष्ठेयकर्माणि चेष्टा परिस्पन्दो यस्यां पुरि सा तथोक्ता । राज्ञोऽपत्यानि । '११५३ । राजश्वशुराद्यत् । ४ । १ । १३७ ।' राजन्याः क्षत्रियाः । '११५४ । ये चाभावकर्मणोः । ६ । ४ । १६८ ।' इति प्रकृतिभावः । राजन्या नक्षत्राणीव तैः समन्वितापि द्यौः भानुशीतांशुविनाकृतेव द्यौराकाशः यथा नक्षत्रसमन्वितापि रात्रौ भानुचन्द्राभ्यां विनाकृता रहिता अन्धकारच्युतसर्वचेष्टा तथा सापि भानुचन्द्रस्थानीययोः राघवयोर्विरहात् ॥

६६–विलोक्य रामेण विना सुमन्त्र-
मभ्योष्ट सत्वान् नृपतिश् च्युताऽऽशः ॥
मधूनि नैषीद् व्यलिपन् न गन्धैर्,
मनोरमे न व्यवसिष्ट वस्त्रे ॥ २० ॥

विलोकयेत्यादि—रामेण विना सुमन्त्रं विलोक्य दृष्ट्वा नृपतिर्दशरथः सत्वात् स्वभावादच्योष्ट च्युतः। च्यवतेरकर्मकाल्लुङ् । गतोऽपि मद्वचनमतिक्रम्य आगच्छेद्राम इति अस्य या आशा सा च्युता यस्य स च्युताशः । सत्वात् च्युतश्च मधूनि पातुं नैषीत् नेष्टवान् । '२२६८ । नेटि ।७।२।४।' इति सिचि वृद्धिप्रतिषेधः । गन्धैश्चन्दनादिभिर्नालिपत् । लिपेः '२४१८। लिपिसिचि ह्वश्च ।३।१।५३।' इत्यङ् । मनोरमे चेतोहारिणि वस्त्रे न व्यवसिष्ट न परिहितवान्। '१०९२। वसँ आच्छादने ।' इत्यस्मात् लुङ् । अनुदात्तेत्वात्तङ् ॥

१००—आसिष्ट नैकत्र शुचा, व्यरंसीत्
कृताऽकृतेभ्यः क्षितिपालभाग्भ्यः, ॥
स चन्दनोशीरमृणालदिग्धः
शोकाऽग्निना ऽगाद् द्युनिवासभूयम् ॥२१॥

आसिष्टेत्यादि—एकत्र स्थाने शुचा शोकेन नासिष्ट नोपविष्टः । आसेरात्मनेपदिनो लुङ् । कृतानि चाकृतानि चेति । '७३९ । क्तेन नञ्विशिष्टेनानञ् । २ । १ । ६० ।' इति समासः । असमापितेभ्य इत्यर्थः । क्षितिपालं भजन्ते यानि । दूतप्रेषणादीनि तेभ्यः क्षितिपालभाग्भ्यः । व्यरंसीत् विरतः । विमुखोऽभूदित्यर्थः । जुगुप्साविरामप्रमादार्थानामुपसंख्यानमिति अपादानसंज्ञा । रमेर्लुङ् । '२७४९ । व्याङ्परिभ्यो रमः । १ । ३ । ८३ ।' इति तिप् । '२३७७ । यमरम- । ७ । २ । ७३ । इत्यादिना सगिटौ । स ए-

वज्रभूतो राजा चन्दनोशीरमृणालैः शोकाग्निप्रतीकारभूतैर्दिग्ध उपलिप्तोऽपि उद्वेगाग्निनैव द्युनिवासभूयं देवत्वमगात् गतवान् । दिहेर्निष्ठायां '३२५ । दादेर्धातोर्घः । ८ । २ । ३२ ।' इति घः । '२२८० । झषस्तथोर्धोधः । ८ । २ । ४० ।' । '५२ । झलां जश् झशि । ८ । ४ । ५३ । इति जश्त्वम् । दिवि निवासो येषां ते द्युनिवासाः देवाः तेषां भाव इति । '२८५५ । भुवो भावे ३ । १ । १०७ ।' इति क्यप् ॥

१०१-विचुक्रुशुर् भूमिपतेर् महिष्यः,
केशाँल् लुलुञ्चुः, स्ववपूंषि जघ्नुः, ॥
विभूषणान्युन्मुमुचुः, क्षमायां
पेतुर्, बभञ्जुर् वलयानि चैव ॥२२ ॥

विचुक्रुशुरित्यादि—भूमिपते राज्ञो महिष्यः पत्न्यः । अविमह्योष्टिषच् इत्यौणादिकष्टिषच् । विचुक्रुशुः रुदितवत्य इत्यर्थः । ङी स्वामिन्निति । तथा केशान् लुलुञ्चुः । उत्पाटितवत्यः । स्ववपूंषि स्वशरीराणि जघ्नुस्ताडितवत्यः । विभूषणानि हारादीनि उन्मुमुचुर्मुक्तवत्यः । क्षमायां भुवि पेतुः । वलयानि अवैधव्यचिह्नानि बभञ्जुः । चूर्णितवत्यः । एते लिङन्ताः । पतेरेत्वाभ्यासलोपौ ॥

१०२-ताः सान्त्वयन्ती भरतप्रतीक्षा
तं बन्धुता न्यक्षिपदाशु तैले, ॥
दूतांश्च राजाऽऽत्मजमानिनीषून्
प्रास्थापयन् मन्त्रिमतेन यूनः ॥ २३ ॥

ता इत्यादि—बन्धुता बन्धुसमूहः। '१२५१। ग्रामजनबन्धुभ्यस्तल् । ४ । २ । ४३ ।' ता महिषीः सान्त्वयन्ती संस्थापयन्ती। सान्त्वं करोतीति णिच् । तं दशरथं मृतं तैले न्यक्षिपत् निक्षिप्तवती । आशु शीघ्रं। मा भूत्पूतिरिति । क्षिपेर्लुङ्। '२३४३। पुषादि- । ३ । १ । ५५ ।' इत्यङ्। कस्मात्तमक्षिपदित्याह—भरतप्रतीक्षा तेन संस्कारः कर्त्तव्य इति सा भरतं प्रतीक्षते। 'ईक्षि क्षमिभ्यां च ।' इत्युपसंख्यानाएणः। दूतान् प्रास्थापयत् प्रहितवती । राजात्मजं भरतमानिनीषून् आनेतुमिच्छून्। अन्यथा कैकयीवैमुख्याद्भरतेऽपि वैमुख्याद्दूता अपि नानेतुमिच्छन्ति । तत्रापि मन्त्रिमतेन न स्वमतेन। यूनः तेषां गन्तुं समर्थत्वात् ॥

१०३—'सुप्तो नभस्तः पतितं निरीक्षां-
चक्रे विवस्वन्तमधः स्फुरन्तम्', ॥
आख्यद् वसन् मातृकुले सखिभ्यः
पश्यन् प्रमादं भरतोऽपि राज्ञः ॥ २४ ॥

सुप्त इत्यादि—भरतोऽपि मातृकुले वसन् सखिभ्यो मित्रेभ्यः आख्यत् कथितवान्। ख्यातेर्लुङ्। '२४३८। अस्यतिवक्ति- । ३ । १ । ५२ ।' इत्यादिना अङ्। क्रियाग्रहणं कर्तव्यमिति संप्रदानसंज्ञायां चतुर्थी। किमाख्यदित्याह—अहं सुप्तः सन् नभस्तो नभस्तलात् आकाशात्पतितं विवस्वन्तमादित्यं स्फुरन्तं चलन्तं निरीक्षांचक्रे निरीक्षितवान्। ईक्षेः '२२३७।

इजादेः-।३।१।३६।' इत्याम्। उत्तमाविषये सुप्तप्रमत्ताव-स्थाया चित्तव्याक्षेपात् परोक्षे लिट्। पश्यन् विलोकयन्। राज्ञो दशरथस्य। प्रमादमनिष्टम्॥

१०४-अशिश्रवन्नात्ययिकं तमेत्य
दूता यदाऽर्थं प्रयियासयन्तः, ॥
आंहिष्ट जाताऽञ्जिजहिषस्तदाऽसा-
वुत्कण्ठमानो भरतो गुरूणाम्॥ २५॥

अशीत्यादि-दूता एत्य आगत्य भरतमातृकुलमित्यर्थः। आङ्पूर्वादिणः क्त्वाप्रत्ययस्यय ल्यपि तुकि च रूपम्। यदा तं भरतमर्थं वचनमशिश्रवन् आवितवन्तः। अर्थयतेऽनेनेति णिच् घञ्। शृणोतेर्ण्यन्तात्लुङि '२३१५। चङि।६।१।११।' इति द्विर्वचनम्। '२५७८। स्रवति-शृणोति-।७।४।८१।' इत्यभ्यासस्येत्वम्। आत्ययिकम् अत्ययो विनाशः स प्रयोजनमस्येति तदस्य प्रयोजनमिति ठञ्। पिता ते ग्लानस्त्वां द्रष्टुमिच्छतीति आत्ययिकं वचनम्। तमिति '५४०। गति-बुद्धि-।१।४।५२।' इत्यादिना कर्मसंज्ञा। शृणोतेः शब्दकर्मत्वात् अर्थमिति। '५३[illegible] कर्तुरीप्सिततमं-।१।४।४६।' इत्यनेन। प्रयियास[illegible]यन्तः प्रयातुमिच्छन्तं भरतं प्रयोजितवन्तः। स[illegible]न्त[illegible]ण्यन्तोऽयम्। तदा असौ भरतो जाताञ्जिजहिषः। जाता अञ्जिजहिषा गमनेच्छा यस्य सः। '१६३३। अहि गतौ।'। '२२६२ इदितो नुम्-।७।१।५८।' तस्मादंहितुमिच्छतीति सन्। इट्। '२१७६। अजा-

देर्द्वितीयस्य । ६ । १ । २ ।' इति हिशब्दो द्विरुच्यते नकारस्य '६२४६ । न न्द्राः-। ६ । १ । ३ ।' इति प्रतिषेधः । अभ्यासकार्यम् । अनुस्वारपरसवर्णौ । '३२७ अः प्रत्ययात् । ३ । ३ । १०२ ।' इत्यकारप्रत्ययः टाप् । आंहिष्ट गतवान् । तस्मादेवात्मनेपदिनो लुङ् उत्कण्ठमानः स्मरन् । '२७२ । मठिँ, २७२ । कठि शोके ।' इत्यस्मादात्मनेपदिनो रूपम् । अनेकार्थत्वाद्धा तूनाम् । गुरूणां पितामहादीनाम् । '६१३ । अधीगर्थ- २ । ३ । ५२ ।' इति कर्मणि षष्ठी ॥

१०५-बन्धूनशङ्किष्ट समाकुलत्वा-
दासेदुषः स्नेहवशादपायम्, ॥
गोमायुसारङ्गगणाश् च सम्यङ्
नाऽयासिषुर्, भीममरासिषुश्च ॥ २६ ॥

बन्धूनित्यादि—दुःस्वप्नदर्शनेन अकस्माच्च पितृदूतागमनेन स्नेहवशात् चेतसि समाकुलत्वाद्भरतो बन्धूनशङ्किष्ट शङ्कितवान् उत्प्रेक्षितवानित्यर्थः । शङ्केरात्मनेपदिनो लुङि रूपम् । कीदृशान् आसेदुषः अपायं विनाशं गतवनः । '३०९७ । भाषायां सदवस । ३ । २ । १०८ ।' इत्यादिना क्वसुः । '२२६० । अत एकहल्-। ६ । ४ । । १२० ।' इत्येत्वाभ्यासलोपौ । अस्मद्बन्धुः कश्चित् व्यसनमापन्नोऽभूदिति । गच्छतस्तस्य गोमायुसारङ्गगणाः शृगालमृगगणाश्च सम्यगनुकूलं नायासिषुः नागताः । यातेर्लुङि '२३७७ । यमरम-। ७ । २ । ७३ ।' इति सगिटौ । शृगालाः प्र-

्त्तिणं गताः, मृगाश्च सव्यमित्यर्थः । भीमसुद्वेगक-
मरासिषुः रासिताः । रसेः परस्मैपदिनो लुङ् ।
२२८४ । अतो हलादेः-। ७।२।७।' इति वृद्धौ रूपम् ।
न रासेः तस्यात्मनेपदित्वात् ॥

१०६–स प्रोषिवानेत्य पुरं प्रवेक्ष्यन्
शुश्राव घोषं न जनौघजन्यम्, ॥
आकर्णयामास न वेदनादान्,
न चोपलेभे वणिजां पणाऽयान् ॥ २७ ॥

स इत्यादि—स भरतः प्रोषिवान् मातामहकुलात् प्रोषितः सन् । '३०६७ । भाषायां-। ३ । २ । १०८।' इत्यादिना क्वसुः । यजादित्वात् सम्प्रसारणं द्विर्वचनम् । '३०६६ । वस्वेकाजाद्घसां । ७। २। ६७।' इति इट् । पुरमयोध्यामेत्य आगत्य प्रवेक्ष्यन् गृहमित्यर्थात् पुरं प्रविष्टः । घोषं शब्दं न शुश्राव न श्रुतवान् । जनौघजन्यं जनसमूहेन जन्यमुत्पाद्यम् ।' शाकिशसिचतियति-।' इति जनेर्यत् । तथा वेदध्वनीन्नाकर्णयामास न श्रुतवान् । प्रातिपदिकाद्धात्वर्थ इति णिच् । तदन्तात् लिट्यामि । '२३११ । अयामन्त-। ६। ४ । ५५ ।' इत्ययादेशः । न चोपलेभे नोपलब्धवान् । वणिजां पण्यजीविनाम् । पणायान् पणलाभान् । क्रयविक्रयरूपव्यवहारस्योच्छिन्नत्वात् । पणन्ते इति वणिजः पणेरिजादेश्च व इत्यौणादिकः । पण्यन्त इति पणाः । '३२४३ । नित्यं पणः परिमाणे । ३ । ३ । ६६।' इत्यप् । व्यवहर्तव्याः । ईर्यन्ते प्राप्यन्ते वणिग्भिर-

त्यया: लाभा: । '३२३१ । एरच् । ३ । ३ । ५६ ।' इ-ति इण: कर्मणि अच् । पणानामया: पणाया: तान् । पणायामिति पाठान्तरम् । वणिजां स्तुतिं संव्यवहारविषयां नोपलेभे । संव्यवहारकुशला: साधव इति शुपादिषु स्तुत्यर्थपणिना साहचर्यात् पणेरपि तदर्थादेवायप्रत्यय: । '३२७६ । अ प्रत्ययात् । ३ । ३ । १०२ ।' इत्यकार: । टाप् । वणिजां प्रलापानिति तृतीय: पाठ: । वणिक्प्रसारकलहानित्यर्थ: ॥

१०७—चक्रन्दुरुच्चैर्नृपतिं समेत्य
तं मातरो ऽभ्यर्णमुपागताऽस्रा: ॥
पुरोहिताऽमात्यमुखाश् च योधा
विवृद्धमन्युप्रतिपूर्णमन्या: ॥ २८ ॥

चक्रन्दुरित्यादि—तं भरतं गृहगतमभ्यर्णं समीपीभूतं समेत्य ढौकित्वा मातर: कौशल्याद्या: नृपतिमुच्चैरत्यर्थं चक्रन्दु: क्रन्दितवत्य: । हा स्वामिन् ! हा राजन् ! क्व गतोऽसीति । उपागतं प्राप्तमस्रमश्रुजलं यासां ता: । एवंविधा: । युध्यन्त इति योधा: पचादित्वादच् । ते च तं समेत्य नृपतिं चक्रन्दु: । पुरोधीयत इति पुरोहित: । '८९९ । निष्ठा । २ । २ । ३६ ।' '३०७६ । दधातेर्हि: । ७ । ४।४२ ।' अमाशब्द: सहार्थे । सह राज्ञा कार्येषु भवतीत्यमात्य: । अमेहकतसित्रेभ्य: इति निपातात् । पुरोहितामात्यौ मुखं प्रधानं येषां योधानां ते पुरोहितामात्यमुखा: । अमात्यस्या-

ाधदन्तत्वेऽपि पुरोहितस्याभ्यर्हितत्वात् पूर्वनिपा-
: । विवृद्धमन्युना शोकेन प्रतिपूर्णं मन्ये गलशिरे
वाभिति ॥

१०८—दिदृक्षमाणः परितः ससीतं
रामं यदा नैक्षत लक्ष्मणं च, ॥
रोरूयमानः स तदाऽभ्यपृच्छद्,
यथावदाख्यन्नथ वृत्तमस्मै ॥ २९ ॥

दिदृक्षमाण इत्यादि—स भरतो यदा ससीतं
ामं लक्ष्मणं च परितः सर्वतो दिदृक्षमाणः द्रष्टुमि-
च्छन् । '२७३१ । ज्ञा-श्रु-स्मृ-दृशां सनः १ । ३ । ५७ ।'
इति तङ् । '२६१३ । हलन्ताच्च । १ । २ । १० ।' इति
सनः कित्वे '२४०५ । सृजि-दृशोः—। ६ । १ । ५८ ।'
इत्यम् न भवति । नैक्षत न दृष्टवान् । तदा रोरूयमा-
नः अत्यर्थं रुदन् । यङि रूपम् । अभ्यपृच्छत् पृष्टवान् ।
ऐक्षताभ्यपृच्छदिति भूतसामान्यविवक्षया लङ् ।
अन्यथा कवेः परोक्षत्वात् लिट् स्यात् । अथैतस्मिन्
प्रस्तावे यथावत् यादृशं वृत्तं भूतं तथावत् आख्यन्
कथितवन्तः पुरोहितामात्यमुख्या अस्मै भरताय ।
ख्यातेः '२४३८ । अस्यति—। ३ । १ । ५२ ।' इत्यादि-
ना च्लेरङ् । आतो लोपः ॥

१०९—आबद्ध-भीम-भ्रुकुटी-विभङ्गः
शेश्वीयमानाऽरुण-रौद्र-नेत्रः ॥
उच्चैरुपालभ्य स केकयीं च,
शोके मुहुश् चाऽविरतं न्यमाङ्क्षीत् ॥३०॥

आबद्धेत्यादि—स भरत उच्चैर्महता ध्वनिना कैकेयीं च मुहुर्मुहुर्भूयो भूय उपालब्ध उपालब्धवान्। उपाङ्पूर्वो लभिरुपालम्भे वर्तते। तस्मादात्मनेपदिनो '२२८१। झलो झलि ८। २। २६।' इति सिज्लोपे धत्वजश्त्वे रूपम्। शोके च मन्यौ अविरतम्जस्रं न्यमाङ्क्षील् निमग्नः। मस्जेर्लुङि '२५१७। मस्जिनशोर्झलि। ७। १। ६०।' इति नुम्। तत्रापि मस्जेरन्त्यादिन्नियमात् नुम्। संयोगादिलोपः। हलन्तलक्षणा वृद्धिः। हल्ग्रहणं समुदायप्रतिपत्त्यर्थमित्युक्तम्। कीदृशः आबद्धभीमभ्रुकुटीविभङ्गः। भ्रमेश्च डुरित्यौणादिको डुः। कुटे स्त्रीलिङ्गे भावे कृशादिभ्य इतीः। तदन्तात् कृदिकारादिति ङीष्। भ्रुवोः कुटी कौटिल्यं भ्रुकुटी। '६६६। इको ह्रस्वोऽङ्यो गालवस्य ।६।३।६१।' इति ह्रस्वः। तस्या विभङ्गो विरचनम्। आबद्धः कृतः प्रयत्नेनायासवृत्तेन भीमो भयानको भ्रुकुटीविभङ्गो येन यस्य वेति। शेश्वीयमाने अत्यर्थं शूयमाने अरुणे लोहिते रौद्रे भयानके नेत्रे यस्य सः। श्वयतेर्यङि '२४२०। विभाषा श्वेः ।६।१।३०।' इति वा सम्प्रसारणम्॥

तमुपालम्भमाह—

११०–नृपाऽऽत्मजौ चिक्लिशतुः स-सीतौ,
ममार राजा, विधवा भवत्यः, ॥
शोच्या वयं, भूर-नृपा, लघुत्वं

केकय्युपज्ञं बत बह्वनर्थम् ॥ ३१ ॥

नृपेत्यादि—नृपात्मजौ रामलक्ष्मणौ ससीतौ सीतया सह चिक्लिशतुः क्लिष्टौ । ममार मृतो राजा । '२५३८ । म्रियतेर्लुङ्-लिङोश्च । १।३।६१।' इति नियमात्तङोऽभावः । विधवाः धवो भर्ता तेन विना भवत्यो जाताः । शोच्याः शोचनीया वयम् अयशोभाजनत्वात् । '२८७२ । ऋ-हलोर्ण्यत् ।३।१।१२४।' शङ्क्या इति पाठान्तरम् । शङ्कनीया वयम् । एतत्कुतोऽयं प्रयोग इति । भूश्चानृपा । न विद्यते नृपो यस्यामिति । नञोऽस्त्यर्थानामिति बहुव्रीहिः । लघुत्वं राज्यप्रार्थनालक्षणं । केकय्युपज्ञम् । केकय्याः प्रथमतो ज्ञातं नान्यस्य कस्यचित्पूर्वं ज्ञातम् । उपज्ञायत इत्युपज्ञम् । '२८९८। आतश्चोपसर्गे ।३।१।१३६।' इति स्त्रियामङ् । कृल्लक्षणा षष्ठी । केकय्या उपज्ञेति समासः । '८२४ । उपज्ञोपक्रमं-।२।४।२१।' इति नपुंसकता । बत कष्टम् । बह्वनर्थं बहुदोषम् । क्लेशमरणाद्यनिष्टानां सम्भवात् ॥

भरतकृत एवायं प्रयोग इत्येतत्परिहरन्नाह—

१११—'नैतन् मतं मत्कमिति ब्रुवाणः
सहस्रशोऽसौ शपथानशप्यत् ॥
उद्धाश्यमानः पितरं सरामं
लुठयन् सशोको भुवि रोरुदावान् ॥ ३२ ॥

(१) उपज्ञा ज्ञानमाद्यं स्यात् ।

नैतदित्यादि–यदेतत्कैकय्यनुष्ठितं मतमभिप्राय:। न मत्कृतं तत्। नाहमस्य ग्रामणीर्न प्रभुरिति। अस्मच्छब्दात् '१८७८। स एषां ग्रामणी: ।५।२।७८'। इति कन्। '१३७३। प्रत्ययोत्तरपदयोश्च ।७।२।९८।' इति मपर्यन्तस्य मादेश:। नास्मन्मतादनुष्ठितमनयेत्यर्थ:। इत्येवं ब्रुवाण: सहस्रशो बहुवारानसौ भरत: शपथान् सम्प्रत्ययकारणवचनानि अशप्यत् कृतवान्। अनेकार्थत्वाद्धातूनां शपेर्दैवादिकस्य उभयपदिनो लङि रूपम्। उच्चारयमाण: आह्वयन्। '१२३८। वाशृँ शब्दे।' दैवादिक:। अनुदात्तेत्। पितरं सरामं हा तात! हा रामेति। लुठयन् भुवि लुठन्। '१३०१। लुठँ विलोडने।' दैवादिक: परस्मैपदी। सशोक इति शाठ्यपरिहारार्थम्। रोरुदावान् अत्यर्थं रोदनं कुर्वन्। यङन्तात् '३२७६। अ प्रत्यय: ।३।३।१०२। इत्यकार:। '२३०८। अतो लोप: ।६।४।४८।'। '२६३१। यस्य हल: ।६।४।४९।' स्त्रियामतष्टाप्। सा विद्यते यस्येति मतुप्॥

११२–तं सुस्थयन्त: सचिवा नरेन्द्रं
दिधक्षयन्त: समुदूहुरारात्॥
अन्त्याऽऽहुतिं हावयितुं सविप्राञ्-
चिकीर्षयन्तोऽध्वरपात्रजातम्॥ ३३॥

तमित्यादि––सचिवा अमात्या:। कार्येषु सचन्ते समवयन्तीति सचेरिवन्नित्यौणादिक इवन्। तं भरतं सुस्थयन्त: सुस्थं कुर्वाणा:। तत्करोतीति णि-

च् । नरेन्द्रं दशरथं । समुदूहुः उद्वाहितवन्तः । शिबिकायामारोप्य । बहिरन्तर्भावितण्यर्थोऽत्र द्रष्टव्यः । यजादित्वात्सम्प्रसारणम् । आरात् नातिदूरे । दिधक्षयन्तः । दग्धुमिच्छन्तं भरतं प्रयोजितवन्तः । दहेः सनि '३२५ । दादेर्धातोर्घः । ८ । २ । ३२ ।' । भष्भावचर्त्वे । प्रयोजकव्यापारे चिण् । अन्ते विनाशे भवा या आहुतिः । '१४२६ । दिगादि- । ४ । ३ । ५४ ।' इति यत् । तामन्त्याहुतिं । हावयितुमग्नौ प्रक्षेपयितुं । सविप्राः ब्राह्मणैः सहिताः सचिवाश्चिचीषयन्तः । चेतुं निधातुमिच्छन्तं प्रयोजितवन्तः । किं तत् अध्वरपात्रजातं यज्ञोपयोगिपात्राणां स्रुवादीनां समूहम् ॥

११३-उदक्षिपन् पट्टदुकूलकेतू-
नवादयन् वेणुमृदङ्गकांस्यम् ॥
कस्तूरिं च तारानधमन् समन्तात्
तथाऽऽनयन् कुङ्कुमचन्दनानि ॥ ३४ ॥

उदेत्यादि--पट्टदुकूलविरचितान् केतून् ध्वजानुदक्षिपन् उच्छ्रितवन्तः ये नियुक्ताः । क्षिपेस्तौदादिकस्य ग्रहणम् । वेणुमृदङ्गकांस्यं वंशमुरजकांस्यतालमवादयन् वादितवन्तः । वदेर्ण्यन्तस्यैव प्रयोगः । '६१० । जातिरप्राणिनाम् । २ । ४ । ६ ।' इत्येकवद्भावः । न पुनस्तूर्याङ्गत्वात् । तत्र हि प्राणिनां तूर्याङ्गाणां द्वन्द्वैकवद्भावः । यथा मार्दङ्गिकपाणविकमिति । 'वृतृवदिहनिकमिकषिभ्यः सः ।' इत्यौणादिकः कंस-

शब्दः । तदर्थाय हितं कंसीयम् । त्रपुणा दृढद्रव्यम् । प्रकृतिविकारभावे छः । तस्य विकार इति । '१५४७। कंसीयपरशव्ययोर्यञञौ लुक् च । ४ । ३ । १६८ ।' इति छस्य लुक् यञ् च प्रत्ययः । कम्बून् शङ्खान् । तारान् उच्चैस्तरध्वनीन् । अधमन् शब्दितवन्तः । '२३६० । पाघ्रा-। ७ । ३ । ७८ ।' इत्यादिना धमादेशः। तथा कुङ्कुमचन्दनानि आनयन् आनीतवन्तः। सर्वत्र लङि रूपम् ॥

अन्त्येष्टिं दर्शयन्नाह--

११४-ओत्राऽच्चिनासावदनं सरुक्मं
कृत्वाऽजिने प्राक्शिरसं निधाय ॥
सञ्चित्य पात्राणि यथाविधान-
मृत्विग् जुहाव ज्वलितं चिताऽग्निम् ॥३५॥

ओत्रेत्यादि--अजिने कृष्णसारचर्मणि प्राक् पूर्वं शिरो मूर्द्धा यस्येति तं प्राक्शिरसं शवं निधाय स्थापयित्वा पश्चात् ओत्राच्चिनासावदनम् । प्राण्यङ्गत्वादेकवद्भावः । वृतॄवदीत्यादिसूत्रस्यानन्तरं नयतेरा चेति प्रकृतेराकारे नासेत्यौणादिकं रूपम् । सरुक्मं ससुवर्णं कृत्वा। सञ्चित्य विन्यस्य अङ्गप्रत्यङ्गेषु । पात्राणि स्रुगादीनि । यथाविधानं यादृशं विधानमुक्तं गृह्यशास्त्रे । ऋत्विग्याजकः । ऋतौ यजतीति । '३७३। ऋत्विग्दधृग्-। ३ । २ । ५९ ।' इत्यादिना निपातितः । ज्वलितं चिताग्निम् । ज्वलनं चितं तदर्थमग्निं जुहाव जुहोति स्म ॥

११५–कृतेषु पिण्डोदकसञ्चयेषु,
हित्वाऽभिषेकं प्रकृतं प्रजाभिः ॥
प्रत्यानिनीषुर् विनयेन रामं
प्रायादरण्यं भरतः सपौरः ॥ ३६ ॥

कृतेष्वित्यादि—पिण्डोदकदानास्थिसञ्चयेष्वनुष्ठितेषु प्रजाभिः प्रकृतं प्रस्तुतमभिषेकमादिकर्मणि क्तः। हित्वा त्यक्त्वा। '३३३१। जहातेश्च क्त्वि।७।४।४३।' इति हिरादेशः। रामं प्रत्यानिनीषुः प्रत्यानेतुमिच्छुः। विनयेन प्रसादनया न भयादरण्यं वनं प्रायात् गतवान्। भरतः सह पौरैः। अयोध्याभवैर्जनैर्मयैकेन प्रसाद्यमानः कदाचिन्नागमिष्यतीति॥

११६–शीघ्रायमाणैः ककुभोऽश्नुवानैर्
जनैरपन्थानमुपेत्य सृप्तैः ॥
शोकाद्-भूषैरपि भूश्चकासा-
ञ्चकार नागेन्द्र-रथाऽश्व-मिश्रैः ॥ ३७ ॥

शीघ्रेत्यादि—जनैर्हेतुभूतैर्भूश्चकासाञ्चकार शोभते स्म। कर्तुः क्रियाफलयोगेऽपि नात्मनेपदम्। आम्प्रत्ययवदित्यत्र पूर्वग्रहणानुवृत्तेः। चकासेश्च परस्मैपदित्वादिति विधिनियमौ स्थितौ। शीघ्रायमाणैः, अशीघ्रैः शीघ्रैर्भवद्भिर्झटिति गच्छद्भिरित्यर्थः। '२६६७। भृशादि-।३।१।१२।' इति क्यङ्। ङित्त्वात्तङ्। ककुभोऽश्नुवानैः दिशो व्याप्नुवद्भिः। अश्नोतेः सौवादिकस्य आत्मनेपदिनो रूपम्। अपन्थानमुपेत्य

सृप्तैः बहुत्वादमार्गमपि गत्वा गतैः। '६४०। ऋक्पू-।५।४।७४ ।इत्यादिना समासान्तः प्राप्तो '६५६। नञस्तत्पुरुषात्।५।४।७१ ।' इति प्रतिषिद्धः सन् '६५७। पथो विभाषा।५।४।७२।' इति विकल्पितः। शोकाद्धेतोरभूषैरनलङ्कारैरपि चकासाञ्चकार भूः भूमिः। भूषेति '३२८० । गुरोश्च हलः।३।३।१०३।' इत्यकारप्रत्ययः। '११४८। चकासृ दीप्तौ' इत्यस्मात् कास्यनेकाज्ग्रहणं चुलुम्पाद्यर्थमित्याम्। नागेन्द्ररथाश्वमिति द्वन्द्वे एकवद्भावः। अल्पाच्तरस्य न पूर्वनिपातः। 'बहुष्वनियमः' इति वचनात्। तेन सेनाङ्गत्वात् कृतैकवद्भावेन मिश्रैर्युक्तैः। '६९३। पूर्वसदृश-।२।१।३१।' इत्यादिना तृतीयासमासः॥

११७-उच्चिक्यिरे पुष्पफलं वनानि,
सस्नुः, पितॄन् पिप्रियुरापगासु॥
आरेटुरित्वा पुलिनान्यशङ्कं,
छायां समाश्रित्य विशश्रमुश्च॥३८॥

उच्चीत्यादि-ते जनाः गच्छन्तः पुष्पफलं पुष्पाणि फलानि चेति '६१०। जातिरप्राणिनाम्।२।४।६। इत्येकवद्भावः। उच्चिक्यिरे उचितवन्तः। ञित्वात्तङ् कर्तुः क्रियाफलयोगात्। '२५२५। विभाषा चेः।७।३। ५८।' इति धातोः कुत्वम्। '२७२। एरनेकाचः।६।४। ८२।' इति यणादेशः। उच्चिच्यिर इति पाठान्तरं युक्तम्। वनानीति हेतुत्वेन '५३९। अकथितं-।१।४। ५१। कर्म। वनानि विघट्टयन्तः फलानि जगृहुरित्य-

र्थः । ततः सस्नुः स्नातवन्तः । स्नातेर्लिटि '२२१४ । उस्यपदान्तात् । ६ । १ । ९६ ।' इति पररूपम् । पितॄन् पिप्रियुः उदकाञ्जलिना तर्पितवन्तः । प्रीणातेर्लिटि इयणादेशः । आपगासु नदीषु । एतत् कृत्वा पुलिनानि सैकतानि इत्वा आरेमुः आरमिताः । आरेमुरिति पाठान्तरम् । शोकापनोदनार्थं कियन्तमपि कालमारमन्ति स्म । '२७४९ । व्याङ्परिभ्यो रमः । १ । ३ । ८३ ।' इति परस्मैपदम् । अशङ्कं विस्रब्धम् । छायां समाश्रित्य विशश्रमुः विश्रान्ताः ॥

११८–संप्राप्य तीरं तमसाऽऽपगाया
गङ्गाऽम्बुसम्पर्कविशुद्धिभाजः ॥
विगाहितुं यामुनमम्बु पुण्यं
ययुर् निरुद्धश्रमवृत्तयस् ते ॥ ३९ ॥

संप्राप्येत्यादि—तमसापगायाः तमसाख्यायाः आपगाया नद्याः । अत्यविचमितमिनमिरभिलभितपिपतिजनिपणिगहिभ्योऽसच् । यस्याः स्मरणात्पापं ताम्यति सा तमसा । तरसा इति पाठान्तरम् । तत्र तरसा वेगेन आपगाया अर्थात्तमसाया नद्या गङ्गाम्बुसम्पर्कात् विशुद्धिं पवित्रतां भजते या तस्यास्तीरं कूलं सम्प्राप्य गत्वा ते जना निरुद्धश्रमवृत्तयः ययुः गताः । गङ्गेति गन् गम्यद्योरित्यौणादिको गन् । विगाहितुं विगाहिष्यामह इति कृत्वा । यामुनमम्बु यमुनाया इदं यमुनासम्बन्धि जलम् । पुण्यं पुण्यहेतुत्वात् पुण्ययुक्तत्वाद्वा ॥

११९-ईयुर् भरद्वाजमुनेर्निकेतं,
यस्मिन् विशश्राम समेत्य रामः ॥
च्युताऽशनायः फलवद्विभूत्या
व्यस्यन्नुदन्यां शिशिरैः पयोभिः ॥ ४० ॥

ईयुरित्यादि—भरद्वाजमुनेर्निकेतं आश्रममीयुः गताः । '२४५५ । इणो यण् । ६ । ४ । ८१ ।' इति यत्वम् । अभ्यासस्य '२४५६ । दीर्घ इणः किति । ७ । ४ । ६९ ।' इति दीर्घत्वम् । यस्मिन्निकेते रामो विशश्राम विश्रान्तः । समेत्य मिलित्वा । तमीयुर्जना इति योज्यम् । फलवद्विभूत्या फलवतां वृक्षाणां समृद्ध्या हेतुभूतया च्युताशनायोऽपगतबुभुक्षः । '२६६१ । अशनायो- । ७ । ४ । ३४ ।' इत्यादिना निपातितः । व्यस्यन् उदन्यां वारयन् । असेर्दिवादिकस्य रूपम् । उदन्यां पिपासां शिशिरैः शीतलैः पयोभिः ॥

१२०-वाचंयमान् स्थण्डिलशायिनश्च
युयुक्षमाणाननिशं मुमुक्षून् ॥
अध्यापयन्तं विनयात् प्रणेमुः
पद्गा भरद्वाजमुनिं सशिष्यम् ॥ ४१ ॥

वाचमित्यादि—ते भरद्वाजमुनिं सशिष्यं शिष्यैः सह वर्तमानं प्रणेमुः प्रणमन्ति स्म । विनयात् विनयेन । अत एव पद्गाः पदातयः पादाभ्यां गच्छन्तीति । '२०११ । अन्येष्वपि दृश्यते । ३ । २ । १०१ ।' इति डः । '९९२ । हिमकाषिहतिषु च । ६ । ३ । ५४ ।'

इति चकारस्य अनुक्तसमुच्चयार्थत्वात् गमोत्तरपदे पदादेशः। पदिति योगविभागाद्वा। कीदृशम्। अध्यापयन्तं पाठयन्तम्। कान् वाचंयमान् मौनव्रतान्। '२६५६। वाचि यमो व्रते। ३। २। ४०।' इति खच्। '२६५७। वाचंयमपुरंदरौ च। ६। ३। ६६।' इति निपातनात् पूर्वपदस्य अमन्तता। स्थण्डिलशायिनः भूशायिनः। '१२१६। स्थण्डिलाच्छयितरि व्रते। ४। २। १५।' इति णिनिः। युयुक्षमाणान् योक्तुमिच्छतः। योगाभ्यासनिष्ठानित्यर्थः। अनिशमविच्छेदेन मुमुक्षून्मोक्षाभिलाषिण इत्यर्थः। अत एव योगाभ्यासमिच्छून् ॥

१२१—आतिथ्यमेभ्यः परिनिर्विवप्सोः
कल्पद्रुमा योगबलेन फेलुः ॥
धामप्रथिम्नो भ्रदिमाऽन्वितानि
वासांसि च भ्राधिमवन्त्युदूहुः ॥ ४२ ॥

आतिथ्यमित्यादि—अतिथ्यर्थमातिथ्यमन्नपानादि। '२०६४। अतिथेर्ञ्यः। ५। ४। २६।' एभ्यो भरतादिजनेभ्यः इति संप्रदाने चतुर्थी। परिनिर्विवप्सोः निर्वप्तुमिच्छोर्दातुमिच्छोरित्यर्थः। निपूर्वो वपिर्दाने वर्तते। धामप्रथिम्नः। धाम्ना तेजसा प्रथिमा पृथुत्वं यस्य। तेजसो बहिर्निर्गतत्वात् शरीरस्य पृथुत्वं जायते। तस्य भरद्वाजमुनेर्योगबलेन समाधिबलेन। '१२५३। युजँ समाधौ।' इत्यस्य रूपम्। कल्पद्रुमाः फेलुः फलिताः। भक्ष्यान्नपानादिकमित्यर्थः।

'२३०१ । नृफलभजत्रपश्च । ६ । ४ । १२२ ।' इत्येत्व-अभ्यासलोपश्च । वासांसि च वस्त्राणि उदूहुः उदूहन्ति स्म । यजादित्वात् संप्रसारणम् । अदिमान्वितानि मृदुत्वमुपगतानि । द्राघिमवन्ति दैर्घ्ययुक्तानि । पृथुमृदुदीर्घशब्देभ्यस्तस्य भाव इत्यर्थे '१७८४ । पृथ्वादिभ्य इमनिच्-। ५ । १ । १२२ ।' पृथुमृदुशब्दयोः '१७८५ । र ऋतो हलादेः । ६ । ४ । १६१ । इति रादेशः । दीर्घशब्दस्य '२०१६ प्रियस्थिर-। ६ । ४।१५७' इत्यादिना द्राघादेशः पश्चान्मतुप् ॥

१२२–वस्त्राऽन्नपानं शयनं च नाना
कृत्वाऽवकाशे रुचिसंप्रक्लृप्तम् ॥
तान् प्रीतिमानाह मुनिस् ततः स्म–
'निवध्वमाध्वं पिबताऽत्त शेध्वम्' ॥ ४३ ॥

वस्त्रेत्यादि—ततो वनितोपस्थानानन्तरमवकाशे प्रदेशे यथाभिमते वस्त्रान्नपानम् । सर्वो द्वन्द्वो विभाषैकवद्भवतीत्येकवद्भावः । शयनमित्यधिकरणे ल्युट् । नाना कृत्वा पृथक् कृत्वा । रुचिसंप्रक्लृप्तम् । यस्य यावदभिरुचितं तत्तथैव संपादितम् । '२३५० । कृपो रो लः । ८ । २ । १८ ।' प्रीतिमान्मुनिस्तान् भरतादीनाह स्म उक्तवान् । किमाह—निवध्वं परिधत्त वस्त्राणि । '१०९२ । वसँ आच्छादने ।' इत्यस्य विधौ लोट् । '५२ । झलाञ्जश् झशि । ८ । ४ । ५३ ।' इति सकारस्य दकारः । आध्वं उपविशत । आसेः पूर्ववत् दादेशः । अत्त खादत अन्नादिकम् । '१०८० । अदँ

भक्षणे ।' इत्यस्मात् लोट् । पानादिकं पिबत । पिबतेः '२३६० । पाघ्रा–। ७ । ३ । ७८ ।' इति सूत्रेण पिबादेशः । शेध्वम् स्वपित शयने । सर्वत्र विधौ लोट् ॥

१२३–ते भुक्तवन्तः सुसुखं वसित्वा
वासांस्युषित्वा रजनीं प्रभाते ॥
द्रुतं समध्वा रथवाजिनागैर्
मन्दाकिनीं रम्यवनां समीयुः ॥ ४४ ॥

ते भुक्तेत्यादि—ते भरतादयः सुसुखमिति क्रियाविशेषणम् । भुक्तवन्तः सन्तो वासांसि । वसित्वा परिधाय । रजनीमुषित्वा रजनीं रात्रिं । '३०४६ । वसति क्षुधोः–। ७ । २ । ५२ ।' इतीट् । '५५८ । कालाऽध्वनोः–। २ । ३ । ५ ।' इति द्वितीया । द्रुतं शीघ्रं प्रभाते मन्दाकिनीं नदीं समीयुः संभूय गताः । समध्वा अविच्छिन्नाध्वानः । सङ्गता अध्वन इति प्रादिसमासः । '६५३ । उपसर्गादध्वनः । ५ । ४ । ८५ ।' इति समासान्तष्टच् । रथवाजीति द्वन्द्वैकवद्भावः । तेन सहिता नागा इति शाकपार्थिवादित्वात् समासः । अन्यथा सेनाङ्गत्वात् समुदायस्यैकवद्भावः स्यात् । रम्यवनां रमणीयकाननां रमणीयजलां वा ॥

१२४–वैखानसेभ्यः श्रुतरामवार्तास्
ततो विशिङ्खानपतत्रिसङ्घम् ॥
अभ्रंलिहाऽग्रं रविमार्गभङ्गम्
आनंहिरेऽद्रिं प्रति चित्रकूटम् ॥ ४५ ॥

वैखानसेत्यादि–ततो मन्दाकिनीगमनानन्तरं वै-

स्थानसेभ्यस्तृतीयाश्रमिभ्यः। चित्रकूटे रामोऽस्तीति श्रुतरामवार्त्ताः। चित्रकूटनामानमद्रिं पर्वतं प्रति। '५५२। लक्षणेत्थम्भूताख्यान-।१।४।९०।' इत्यादिना कर्मप्रवचनीयसंज्ञा। '५४८। कर्मप्रवचनीययुक्ते-।२।३।८।' इति द्वितीया। तं लक्ष्यीकृत्य आनंहिरे जग्मुः। अंहतेर्लिटि द्विर्वचनम्। '२१७६। हलादिः शेषः।७।४।६०।'। '२२४८। अत आदेः।७।४।७०।' इति दीर्घः। '२२८८। तस्मान्नुड् द्विहलः।७।४।७१।' इति नुट्। विशिञ्जानपतत्रिसंघं कूजत्पक्षिगणम्। अभ्रंलिहाग्रं अभ्रस्पृक्शिखरम्। '२९४७। वहाऽभ्रे लिहः।३।२।३२।' इति खश्। '२९४२। अरुर्द्विषत्-।५।४।५१।' इत्यादिना मुम्। रविमार्गभङ्गम्। उच्चैस्तरत्वात् रवेर्मार्गभङ्गो यस्मिन्नद्राविति॥

१२५-दृष्ट्वोर्णुवानान् ककुभो बलौघान्
वितत्य शार्ङ्गं कवचं पिनह्य॥
तस्थौ सिसंग्रामयिषुः शितेषुः
सौमित्रिरक्षिभ्रुवमुज्जिहानः॥ ४६॥

दृष्ट्वेत्यादि—बलौघान्दृष्ट्वा सौमित्रिस्तस्थौ स्थितः। अभ्यासस्य '२२५९। शर्पूर्वाः खयः।७।४।६१।' इति खयः शेषः। कीदृशः ककुभो दिश ऊर्णुवानान् आच्छादयतः। ऊर्णोतेरादादिकस्योभयपदिनः शानचि उवङादेशे च रूपम्। शार्ङ्गं शृङ्गस्य विकारं धनुर्वितत्य आरोपितगुणं कृत्वा। '३३३४। वा

ल्यपि । ६ । ४ । ३८ ।' इत्यनुनासिकलोपः । कवचं पिनह्य बद्ध्वा । '१२४१ । णहँ बन्धने ।' इत्यस्य ल्यपि । अपिशब्दाकारलोपस्तु—'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ॥ धाञ्कृञोस्तनिनह्योश्च बहुलत्वेन शौनकिः ॥' इति । सिसंग्रामयिषुः संग्रामयितुमिच्छुः । '२०७१ । संग्रामँ युद्धे ।' इति चौरादिको णिच् । तदन्तस्य सनि प्रथमस्यैकाचो द्विर्वचनम् । शितेषुः तीक्ष्णशरः । अक्षिणी च भ्रुवौ च अक्षिभ्रुवम् । '९४५ अचतुर-। ५ । ४ । ७७ ।' इत्यत्र निपातितः । उज्जिहानः ऊर्ध्वं नयन् । '११६४ । ओँ हाङ् गतौ ।' इत्यस्य जुहोत्यादिकस्य '२४९६ । भृञामित् । ७ । ४ । ७६ ।' इतीत्वम् ॥

१२६-शुक्लोत्तरासङ्गभृतो विशस्त्रान्
पादैः शनैरापततः प्रमन्यून् ॥
औहिष्ट तान् वीतविरुद्धबुद्धीन्
विवन्दिषून् दाशरथिः स्ववर्ग्यान् ॥ ४७ ॥

शुक्लेत्यादि—दाशरथिस्तान् स्ववर्ग्यान् स्ववर्गे भवान् । '१४४३ । अशब्दे यत्खौ । ४ । ३ । ६४ ।' इति यत् । आत्मीया अपि कदाचित् दुष्टबुद्धयो भवन्तीत्याह-वीतविरुद्धबुद्धीन् । औहिष्ट ऊहितवान् । ऊहतेरात्मनेपदिनो लुङि आट् वृद्धिः । तदेवाविरुद्धबुद्धित्वं दर्शयन्नाह-शुक्लोत्तरासङ्गभृतः । शुक्लो

१—'समन्यून्' इति पाठान्तरम् ।

य उत्तरासङ्गः उत्तरीयं तं बिभ्रतीति क्विप्। विशस्त्रान् निरायुधान्। पादैरापतत आगच्छतो मुक्तवाहनत्वात्। शनैर्न त्वरया। प्रमन्यून् प्रकृष्टशोकान् आगतशोकान् वा। विवन्दिषून् वन्दितुमिच्छून्॥

१२७-समूलकाषं चकषू रुदन्तो
रामाऽन्तिकं बृंहितमन्युवेगाः॥
आवेदयन्तः क्षितिपालमुच्चैः-
कारं मृतं रामवियोगशोकात्॥ ४८॥

समूलमित्यादि-ते रामान्तिकं रामसमीपं प्राप्ताश्चकषुः पिष्टवन्तः। समूलकाषं समूलं कषित्वा भूमेरधोभागमुत्खन्य। '३३५५। निमूलसमूलयोः कषः। ३। ४। ३४।' इति कषेर्णमुल्। '३३६७। कषादिषु यथाविध्यनुप्रयोगः। ३। ४। ४६।'। रुदन्तः रोदनं कुर्वन्तः। बृंहितमन्युवेगा विवृद्धशोकवेगाः। '७८६। बृहि वृद्धौ।' इत्यस्य रूपम्। रामवियोगशोकात् कारणात् क्षितिपालं दशरथमुच्चैःकारं कृत्वा। मृतं निधनं गतं आवेदयन्तः। '३३८१। अव्यये यथाभिप्रेताख्यान-। ३। ४। ५९।' इति कृञो णमुल्। यथाभिप्रेताख्यानमिति दीर्घैराख्यातुमभिप्रेतत्वात् उच्चैरावेदयन्ति॥

१२८-चिरं रुदित्वा करुणं सशब्दं
गोत्राऽभिधायं सरितं समेत्य॥

मध्येजलाद् राघवलक्ष्मणाभ्यां
प्रत्तं जलं द्व्यञ्जलमन्तिकेऽपाम् ॥ ४६ ॥

चिरमित्यादि–चिरं महान्तं कालं करुणं सम्मन्युं सशब्दं प्रतिकृत्य रुदित्वा । '२६१७। रलो व्युपधाद्धलादेः–।१।२।२६।' इति कित्वे विकल्पिते '२६०६। रुदविद–।१।२।८।' इत्यादिना नित्यं कित्वम् । सरितं समेत्य नदीं संभूय गत्वा । मध्येजलात् । जलस्य मध्यात् तस्माद्वा श्रात्वोत्थाय अवतीर्य । ल्यब्लोपे पञ्चमी ।' ६७२। पारे मध्ये षष्ठ्या वा ।२।१।१८।' इत्यव्ययीभावः । अपञ्चम्या इति प्रतिषेधात् अम्न भवति । नाव्ययीभावादिति लुक्प्रतिषेधश्च । राघवलक्ष्मणाभ्याम् । अपामन्तिके समीपे जलं प्रत्तं दत्तम् । '३०७८। अच उपसर्गात्तः । ७ । ४ । ४७ ।' गोत्राभिधायं नामाभिधायम् । '३९० । द्वितीयायां च ।७।२।८७ इति णमुल् । द्व्यञ्जलमिति । अञ्जलिपरिच्छिन्नम् । जलमञ्जली द्वौ विगृह्य । तद्धितार्थे समासः '८०४ । द्वित्रिभ्यामञ्जलेः ।५।४।१०२।' इति टच् । ताभ्यां प्रत्येकमञ्जलिप्रदानात् । द्वावञ्जली प्रमाणमस्येत्यस्मिन्वाक्ये प्रमाणप्रत्ययस्य प्रमाणे लुक् द्विगोर्नित्यमिति लुक् । ततः समासान्तो न प्राप्नोति । अतद्धितलुकीत्यधिकारात् ॥

१२६–'अरण्ययाने सुकरे पिता मां
प्रायुङ्क्त, राज्ये बत दुष्करे त्वाम्' ॥

मा गाः शुचं वीर !, भरं वहाऽमुम्,'

आभाषि रामेण वचः कनीयान् ॥ ५० ॥

अरण्ययान इत्यादि—अरण्याय यानं अरण्ययानं तस्मिन् सुकरे सुखसाध्ये पिता मां प्रायुङ्क्त नियुक्तवान् । युजे रौधादिकस्य लङि रूपम् । कर्त्रभिप्राये '२७३५। प्रोपाभ्यां युजेः—।१।३।६४।' इत्यात्मनेपदम् । राज्ये दुष्करे दुःखसाध्ये त्वां प्रायुङ्क्त । एवं च सति हे वीर शुचं शोकं मा गाः । मा कार्षीरित्यर्थः । '२४५८। इणो गा लुङि । २ । ४ । ४५ ।' '२२२३। गातिस्था— । २ । ४ । ७७ ।' इति सिचो लुक् । बत इति खेदे । किन्तु भरममुं पितुर्नियोगम् । '९९४ । भृञ् भरणे ।' इत्यस्मात् '३२३२। ऋदोरप् । ३ । ३ । ५७ ।' वह संपादय । विधौ लोट् । एवं वचः रामेण कनीयान् अनुजो भ्राता भरतः आभाषि भाषितः । कर्मणि लुङ् । ब्रुवीत्यर्थग्रहणात् द्विकर्मकता । अल्पशब्दादीयसुनि '२०१६। युवाल्पयोः—। ५ । ३ । ६४ ।' इत्यादिना कनादेशः ॥

१३०—कृती श्रुती वृद्धमतेषु धीमांस्

त्वं पैतृकं चेद् वचनं न कुर्याः, ॥

विच्छिद्यमानेऽपि कुले परस्य

पुंसः कथं स्यादिह पुत्रकाम्या, ॥५१॥

कृतीत्यादि—वृद्धानां पण्डितानां मतेषु श्रुतानि कृतानि चानुष्ठितानि येनेति । आद्धमनेनेत्यधिकृ-

त्य '१८८८। इष्टादि-।५।२।८८।' इतीनिः । क्तस्येन्वि-
षयस्येति कर्मणि सप्तमी । स्वमते भावक्तान्तादस्त्य-
र्थे इन् । स त्वमेवंविधः धीमान् पैतृकं पितुरागतम् ।
'१४५८।पितुर्यच्च । ४ । ३ । ७९।' इति चकाराट्ठञ्
'१२२१। इसुसुक्तान्तात्कः ।७।३।५१।' चेद्यदि व-
चनं न कुर्याः । मध्यमपुरुषैकवचने लिङि रूपम् । तदा
विच्छिद्यमाने कुले वंशे परस्यापि अन्यस्यापि पुंसः ।
अपिशब्दो भिन्नक्रमः । कथं स्यादिह लोके पुत्रका-
म्या आत्मनः पुत्रेच्छा नैवेत्यर्थः । पुत्रशब्दात् '२६६३
काम्यच्च । ३ । १ । ९ ।' इति काम्यच् । तदन्तादप्र-
त्ययः । टाप् ॥

१३१-अस्माकमुक्तं बहु मन्यसे चेद्,
यदीशिषे त्वं न मयि स्थिते च, ॥
जिहेष्यतिष्ठन् यदि तातवाक्ये,
जहीहि शङ्कां, व्रज, शाधि पृथ्वीम्, ॥ ५२ ॥

अस्माकमित्यादि-अस्माकमुक्तं अस्मत्सम्बन्धि व-
चनं चेद् यदि बहु मन्यसे आद्रियसे । पितृतुल्यो
भ्राता अस्यानुमतः कथमेवं न कुर्यामिति । यदि च मयि
स्थिते नेशिषे न प्रभुत्वं करोषि । प्रभुस्त्वमहं त्वदा-
ज्ञाकर इति । ईशेराद्यादिकस्य '२४३९। ईशः से
। ७ । २ । ७७ ।' इतीडागमः । गुरुवचनमनतिक्रमणी-
यं विशेषतस्तातवाक्यं तस्मिन्नतिष्ठन् वचनमकुर्वाणः

यदि जिह्रेषि लज्जसे । '२४९० । श्लौ । ६ । १ । १० ।' इति द्विर्वचनम् । एतन्निश्चित्याह–जहीहि शङ्कां त्यज विकल्पम् । व्रज गच्छ अयोध्याम् । शाधि पालय पृथ्वीम् । '२४९८ । जहातेश्च । ६ । ४ । ११६ ।' इति ...इ विकल्पिते । '२४९७ । ई हल्यघोः । ६।४।११३ ।' इतीत्वम् । शास्तेः '२४८७ । शा हौ । ६ । ४ । ३५ ।' इति शाभावः । तस्याभीयत्वेनासिद्धत्वात् '२४२५ । हु झल्भ्यो हेर्धिः । ६ । ४ । १०१ ।' ॥

१३२–'वृद्धौरसां राज्यधुरां प्रवोढुं
कथं कनीयानहमुत्सहेय, ॥
मा मां प्रयुक्थाः कुलकीर्तिलोपे'
प्राह स्म रामं भरतोऽपि धर्म्यम् ॥ ५३ ॥

वृद्धौरसामित्यादि–भरतः प्राह । धूर्वहनशीलाः। धूर्न्गनशीला इत्यर्थः । अनेकार्थत्वाद्धातूनाम् । ३१५७। भ्राजभास–। ३ । २ । १७७ ।' इति क्विप् । '२६५५ । राल्लोपः । ६ । ४ । २१ ।' इति वलोपः । राज्यस्य सप्ताङ्गस्य धूर्धात्री । प्रकृतिरिति विगृह्य । '९४० । ऋक्पूः–। ५ । ४ । ७४ ।' इत्यकारप्रत्ययः । '८१२ । परवल्लिङ्गं–। २ । ४ । २६ ।' इति धूरिति स्त्रीलिङ्गम् । ततष्टाप् । कीदृशीं वृद्धौरसां, वृद्धो ज्येष्ठः औरसः पुत्रो यस्याम् । उरसा निर्मित इति छन्दसो निर्मित इत्यनुवृत्तौ '१६४६ । उरसो ऽण् च । ४ ।

४ । ६४ ।' इत्यण् । तां, तिष्ठति रामे पूर्वोक्तुं कथमुत्सहेय ? । कनीयान् सन् । नैवेत्यर्थः । '३१७७ । शकधृष—३ । ४ । ६५ ।' इत्यादिना बहेः सहार्थुपपदे तुमुन् । गर्हायां लडपिजात्वोरित्यनुवृत्तौ '२८०० । विभाषा कथमि लिङ् च । ३ । ३ । १४३ ।' इति लिङ् । सहेरुत्पूर्वस्य आत्मनेपदित्वात् सीयुट् । '२२५७ इटोऽत् । ३ । ४ । १०६ ।' । '२२११ लिङः सलोपोऽनन्त्यस्य । ७ । २ । ७६ ।' अतो मा मां प्रयुक्थाः । मा नियोजय । '२२१६ । माङि लुङ् । ३ । ३ । १७५ ।' '२२८१ । झलो झलि । ८ । २ । २६ ।' इति सिचो लोपः । कुलकीर्तिलोपे । लोपयतीति लोपः । पचाद्यच् । रघुवंशस्य या कीर्तिः तस्या लोप इति समासः । पूर्वैरनाचरितत्वात् । एवं च धर्म्यं धर्मादनपेतं भरतोऽपि प्राह स्म उक्तवान् ॥

पुनश्चाह—

१३३-'ऊर्जस्वलं हस्तितुरङ्गमेतद्,
अमूनि रत्नानि च राजभाञ्जि, ॥
राजन्यकं चैतदहं क्षितीन्द्रस्
त्वयि स्थिते स्यामिति शान्तमेतत्' ॥ ५४ ॥

ऊर्जेत्यादि—एतद्धस्तितुरङ्गं सेनाङ्गत्वादेकवद्भावः । ऊर्जस्वलं बलवत् । ऊर्जनमूर्क् । संपदादित्वात् क्विप् । सा विद्यते यस्येति । '१९२१ । ज्योत्स्नात

मित्रा—।५।२।११४। इत्यादिना घलच्। असुगागमश्च। असूनि च रत्नानि राजभाञ्जि राजन्यानि। एतच्च राजन्यकं क्षत्रियसमूहः। क्षितीन्द्रो राजा अहं त्वयि स्थिते स्यामिति भवामीति शान्तमेतत् अलीकं त्। स्यामिति निमन्त्रणे नियोगकरणे लिङ्॥

१३४–इति निगदितवन्तं राघवस् तं जगाद–
'व्रज भरत! गृहीत्वा पादुके त्वं मदीये, ॥
च्युतनिखिलविशङ्कः पूज्यमानो जनौघैः
सकलभुवनराज्यं कारयाऽस्मन्मतेन'[1] ॥५५॥

इतीत्यादि–इति एवं निगदितवन्तं उक्तवन्तं तं भरतं राघवो रामो जगाद उक्तवान्। किमित्याह–हे भरत मदीये पादुके उपानहौ गृहीत्वा त्वं व्रज गच्छ। विधौ लोट्। अस्मदस्त्यदादित्वे' १३३६। त्यदादीनि च।१।१।७४।' इति वृद्धसंज्ञायां तस्येदर्थे '१३३७। वृद्धाच्छः।४।२।११४।' '१३७३। त्ययोत्तरपदयोश्च।७।२।६८।' इति मदादेशः। श्च पूज्यमानो जनौघैर्जनसमूहैः। च्युतनिखिलविः अपगताशेषविकल्पः। सकलभुवनराज्यं सर्वत्र मण्डले राज्यं कारय अनुष्ठापय। पादुके इति योम्। अस्मन्मतेन अस्माकमभिप्रायेण। अत्र मदाशो न भवति अस्मदो बहुवचनान्तस्य विवक्षित-

१–मालिनीछन्दः। तल्लक्षणे, (२६) श्लोकोक्त टीकनं प्रेक्ष्यम्।

त्वात् । तत्र ह्येकवचन इति वर्तते । ननु कथं मदीय इत्यत्र मदादेशः बहुवचनान्तत्वादिति विरोधः प्रादु-कं रामस्यैव तर्ह्यस्मन्मतेन इत्यत्रापि एकवचनम् । आवयो रामलक्ष्मणयोर्मतेनेति षष्ठीसमासे न दोषः ॥

इति श्रीजयमङ्गलाऽऽख्यया व्याख्यया समलङ्कृत-
श्रीभट्टिकाव्ये प्रथमे प्रकीर्णकाण्डे लक्षणरूपे
तृतीयः परिच्छेदः (वर्गः), तथा लक्ष्य-
रूपे कथानके श्रीरामप्रवासो नाम तृ-
तीयः सर्गः पर्यवसितः ॥

शुद्धाशुद्ध-सूचिनी ॥

[illegible]	पङ्क्तौ	अशुद्धम्	शुद्धम्
[illegible]	१४	बद्ध	बद्ध
[illegible]	६	ऽऽपि	ऽपि
[illegible]	६	वुबोध	बुबोध
[illegible]	११	हा ॥	हा !
[illegible]	१३	करिष्यती''	करिष्यती''–
[illegible]	२४	बव्हाः	बह्वयः
[illegible]	२१	ग च्छ	गच्छ
[illegible]	१४	वुद्धिं	बुद्धिं
[illegible]	१७	शूलविद्या	शूलविद्यया
[illegible]	१६	निवन्धना	निबन्धनाः
[illegible]	२५	वद्धो	बद्धो
[illegible]	१८	सोऽन्य	सोऽन्न
[illegible]	१८	वणिग	वणिज
…२	१५	मयुंक्त	मयुङ्क्ते
…९	१	लक्ष्यम्याः	लक्ष्म्याः
…७	२०	मच्त्ययः	चूमत्ययः
…७	१९	इत्युलक्	इत्यलुक्
[illegible]	७	द्विषः	द्विपद्
[illegible]	११	श्रोतव्यं	श्रोतव्यंच
[illegible]	१२	करण्यम्	करण्येऽपि
[illegible]	११	दुः माप्याम्	दुष्माप्याम्
[illegible]	१४	मैत्त्रीम्	मैत्रीम्
[illegible]	९	येषां ता	येषां ते
…४	११	कृषीवले	कृषीवलै
…५	२	स्तीति	स्तौति तैः
…७	१२	विभक्तता	विभक्ततया

पृष्ठे	पङ्क्तौ	अशुद्धम्	शुद्धम्
४३	१०	जग	जगा–
४४	२	त्वादुष्टा	त्वाद् दुष्टा
४५	२४	राज्ञा	राज्ञो
५७	१३	पाण्वीय	पाण्डवीय
६०	११	उपोद्धाते	उपोद्धात
७२	१५	यतु	यस्तु
७५	१९	मवाह	मवाहैः
९४	१०	सुसाध्यस्यस्त	सुसाध्यस्त
९७	२१	यत्मत्यः।आसनत	यत्मत्ययः।आसन
९८	५	लंकार	लंचकार
११४	११	तन्निमित्तस्यैव	वल्निमित्तस्यैव
१३८	१९	दिवादिभ्यो	दिगादिभ्यो
१४०	४	माणनेति	माणेनेति
१४१	५	शुक्रातुगा	शुक्रावनुगा
१४१	६	गीर्पति	गीष्पति
१४२	३	समास	समासः
१४६	२१	समासान्ते	समासान्तो
१४६	२	तत्त्व	चत्त्वं
१५१	२३	संक्षिप्तस्यति अतो॥	संक्षिप्तस्येति–अ
१५५	९	लिङ्गान्तेषु	लिङ्गात् तेषु
१६२	१५	रत्यं	रपत्यं ॥
१७१	१९	स 'नपुं	स नपुं
१७२	४	व्यधिकरणे	व्यधिकरणो
१७३	८	लिलंङ्घं	लिलङ्घ
१७७	२३	न्तन्यासः	न्तरन्यासः
१८३	१६	पल्यङ्का	पल्यङ्काः